57

राष्ट्रिय संस्कृत संस्थानम्

नवदेहली

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥ ८ ॥

भार्गवतन्त्रम्

(पाञ्चरात्रागमग्रन्थः)

सम्पादकः
डॉ॰ राघवप्रसाद चौधरी

यो ऽनूचानः स नो महान्

राष्ट्रियसंस्कृतसंस्थानम्

Rashtriya Sanskrit Sansthan

(Under the auspices of the Ministry of Education, Govt. of India)

NEW DELHI

●

GANGANATH JHA KENDRIYA SANSKRIT VIDYAPEETHA

TEXT SERIES

●

General Editor

Dr. G. C. TRIPATHI

●

No. 8

BHARGAVA TANTRAM

(A Pancratragama Text)

●

Edited by

Dr. RAGHAVA PRASAD CHAUDHARY

ALLAHABAD.

1981

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)
नवदेहली

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी

अष्टमप्रसूनम्

भार्गवतन्त्रम्

सम्पादकः
डॉ० राघवप्रसाद चौधरी

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरू पार्क
इलाहाबाद-२

भार्गवतन्त्रम्

सम्पादकः
डॉ० राघवप्रसाद चौधरी

गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरू पार्क
इलाहाबाद-२
१९८१

प्रकाशकः
डॉ० गयाचरण त्रिपाठी
प्राचार्यः
गङ्गानाथझा केन्द्रीय संस्कृत विद्यापीठम्
मोतीलाल नेहरू पार्क
इलाहाबाद-२११००२

226.4
चौध।रा।आ

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

मूल्यम्... ३५/-

मुद्रकः
श्री विष्णु आर्ट प्रेस
२५७ चक, जीरो रोड, इलाहाबाद

भार्गवतन्त्रम्

सम्पादकः

डॉ० राघव प्रसाद चौधरी

विषयव्यवस्थापनक्रमः

Foreword	i–ii
उपोद्घातः	क–फ
विषयानुक्रमणिका	क–ट
भार्गवतन्त्रम्	१-१७६
परिशिष्टम्-१	१७७-१८१
परिशिष्टम्-२	१८३-१८५
परिशिष्टम्-३	१८६
परिशिष्टम्-४	१८७
परिशिष्टम्-५	१८८
परिशिष्टम्-६	१८९
परिशिष्टम्-७	१९०-२३६
परिशिष्टम्-८	२३७-२८०
शुद्धिपत्रम्—	२८१

FOREWORD

In the centuries following the composition of principal *Upaniṣads*, the belief in One Supreme Personal God, which had been present in Indian religious thought right since the earliest times (See RV, 1.164, 10.121, 10.129) in dormant form gained unprecedented prominence. This Supreme Personal God was known by the term *Bhagavat* meaning 'The Exalted One'. This, incidentally remains even to this day the most commonly used term for Personal God in our languages. Those who believed in Him and worshipped Him were known as *bhāgavatas*.

The analysis of available literary and the scanty epigraphical evidences seems to point towards the fact that the concept of Bhagavat in its earliest stage was in no way associated with *Viṣṇu* with whom it was identified later. The identification with *Viṣṇu* seems to have proceeded through *Kṛṣṇa-Vāsudeva* who had established himself as 'the most perfect Incarnation' of *Viṣṇu* (*Kṛṣnas tu bhavān svayam*).

After the identification of *Bhagavat* with *Viṣṇu*, the religious ideology of the *Bhāgavata*-system developed assimilating and imbibing elements of the Vedic and the post-Vedic concept of *Viṣnu* on the one hand, as well as the popular mode of worship (*Pujā*) on the other. The followers of *Bhāgavatism*, which must have enjoyed universal appeal by now, slowly ramified themselves into two groups. The first group was formed by the Śrotriyas and Brahmins, i. e. those who leaned heavily on the Vedic tradition. The second group must have been formed by the simple Aryan folk, not deeply embedded in the Vedic tradition, who had been using its age-old mode of worship conducted with various *Upacāras* as an expression of their religious feelings. The texts of these two groups, when codified later, gave rise to two schools of *Bhāgavatism*, namely *Vaikhānasas* and the *Pāñcarātra* respectively It was the *Pāñcarātra*, however, which was to become the more popular and the more widely accepted school since it had a broader base among the masses, having incorporated in itself much of the popular religious practices–the so called *Āgamic* or *Tāntric* rites. Indeed, the very history of Hinduism is a story of the victory of popular religious beliefs over the Vedic, sacerdotal tradition.

The oldest of the extant *Pāñcarātra Saṃhitās* go back to the Gupta period though there are irrefutable evidences to show that the religious texts of the *Bhāgavata-Pāñcarātra* school started coming up even before the commencement of the composition of the *Mahābhārata*. The '*Nārāyaṇīya*' portion of *Śāntiparvan* and the '*Bhagavadgīta*' in the *Bhīṣmaparva* are two such texts incorporated later into the *Mahābharāta*.

Besides, the major *Saṃhitās* of the *Pāñcarātra* school like *Pādma*, *Pauṣkara* and *Iśvara* which deal with all the *major* topics of the theology of

the school viz. *Jñāna* (philosophy) *Yoga* (meditative practices), *Kriyā* (construction of temples, images and their consecration) and *caryā* (ritual), there are smaller compendiums too, which extensively deal with the practical aspect of any one or two of the above mentioned subjects. These are mostly termed as *Kalpas*.

Bhārgavatantra is one of such treatises composed mainly on the basis of the previous more extensive reference works which deal with the ritual of *Pāñcarātra* form of worship in all its aspects. The work has an extent of some 1600 verses which are divided into 25 chapters. It starts with a description of the various forms of temples and their internal lay-out, gives details of the worshipable images and describes extensively the ritual of their consecration. It then proceeds to describe the ritual details of various festivals taking place in a temple and deals summarily with the ritual of temple-worship as well as other allied subjects. The work, thus, is of special importance to the *arcakas* or the temple-worshippers. It is found to be referred to in the five important *Pāñcarātra* works which shows that it was estimated to be a work of considerable merit.

The work is being published here for the first time. It has been scholarly edited on the basis of three, and the only known, manuscripts deposited in Adyar, Madras and Tirupati respectively. Dr. R. P. Chaudhary, the editor of this work has won great praise and name for ably editing the text of *Nāradīya-Saṃhitā*, another *Pāñcarātra* work, much bigger and comprehensive in scope than the previous one (published: Tirupati, 1971). The experience that he gained from editing the *Nāradīya Saṃhitā* he has ably put in the edition of the present work. He has not only written a scholarly introduction to this work in Sanskrit dealing with the history of the *Pāñcarātra* school and the significance of the presnt work but has also added as many as eight valuable appendices to this work which facilitate a scientific and academic exploitation of the Sanskrit text to a greater extent.

I congratulate Dr. R. P. Choudhary for salvaging this work from oblivion and for presenting it to the scholars in a most presentable form and shape. I also feel obliged to him for carrying out the work assigned to him in a superb manner and to the utmost satisfaction of all concerned.

G. N. Jha Kendriya
Sanskrit Vidyapeetha,
Alfred Park, Allahabad–2.

August 23rd, 1981
Śrīkṛṣṇajanmāṣṭami, VS 2038

G. C. TRIPATHI
PRINCIPAL

उपोद्घातः

सुरभारत्याः समुपासकानां सहृदयवर्याणां समक्षं भार्गवतन्त्रस्य समालोचनात्मकमेतत् संस्करणं समुपस्थापयतः मोमुद्यते मे मनः । वैखानसपाञ्चरात्राख्ययोः वैष्णवागमयोरन्यतरस्य पाञ्चरात्रागमस्य एतावत् पर्यन्तं सर्वथा अप्रकाशितोऽयं ग्रन्थः त्रिषु स्थलेषु मातृकारूपेण समुपलब्धः इत्येतद् विवरणं अत्रैवोपोद्घाते यथास्थानमुपस्थापयिष्यते । प्रथममत्र एतद्ग्रन्थसम्बद्धाः केचन विशिष्टाः पाञ्चरात्रागमविषयाः सन्त्यवधेयाः ।

पाञ्चरात्रागमः

तत्र तावत्प्रथमम् आगमशब्दस्य तदनु पाञ्चरात्रशब्दस्य च अर्थविषये कश्चिद्विचार उदेति । पदवाक्यप्रमाणज्ञः भगवान् भर्तृहरिस्तावत् महाभाष्ये विद्यमानं "रक्षोहागमलघ्वसन्देहाः" इति व्याकरणाध्ययनप्रयोजनेषु अन्यतमं प्रयोजनम् 'आगमम्' व्याकुर्वन् अभिहितवान्—"पारंपर्येणाविच्छिन्न उपदेशः आगमः, श्रुतिलक्षणः स्मृतिलक्षणश्च सः" इति[1] । अर्थात् आगमः परंपरया आगतः उपदेशविशेषः तथैव प्रमाणभूतः यथा श्रुतयः स्मृतयश्च प्रमाणभूता इत्यस्याभिप्रायः । सर्वदर्शनतत्त्वज्ञ आचार्यवाचस्पतिमिश्रः आगमस्य सामान्यं लक्षणं निर्दिशन् "आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदयनिःश्रेयसोपायाः सः आगमः" इति प्रत्यपादयत्[2] । अयमभिप्रायः—अभ्युदय इत्युक्ते लौकिकं कल्याणम्, निःश्रेयस् इत्यनेन च मोक्षः, तयोः लाभोपायप्रदर्शकः शास्त्रविशेषः आगमः इति । इत्थम् लौकिककल्याणमोक्षोपायप्रतिपादकं शास्त्रमागमशास्त्रमिति फलितम् । वाराहीतन्त्रे निर्दिष्टमागमलक्षणन्तु इत्थम्—

सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ।।
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमं तद्विदुर्बुधाः ।।

अर्थात् सृष्टिप्रलयदेवतार्चनसर्वसाधनपुरश्चरणषट्कर्मध्यानयोगप्रतिपादकं शास्त्रमागमशास्त्रमित्यर्थः । इत्थमत्रागमशास्त्रे सप्तविषयाणां निरूपणमुक्तम् । तन्त्राणामाधारः नास्ति कश्चिद्ग्रन्थविशेषः । तन्त्राणि तु सर्वथा अपौरुषेयाणि ज्ञानरूपाण्येव । अयमेव ज्ञानविशेषः आगमपदवाच्यः इति तन्त्रशास्त्रस्य सम्मतं मतम् ।

---

१. महाभाष्यत्रिपदीटीका. १. १. १; हिन्दू विश्वविद्यालय सं० बनारस-१९६५ ई०;
२. योगभाष्यम्-तत्त्ववैशारदी व्याख्या. १. ७;

श्रीमदप्पयदीक्षितः ब्रह्मसूत्राणां श्रीकण्ठकृतशैवभाष्यस्य शिवार्कमणिदीपिकाख्यव्याख्यायां वैदिकावैदिकतया आगमस्य द्वैविध्यमाचष्टे । वैदिकागमेषु वेदाध्यायिनः अवैदिकागमेषु वेदानध्यायिनश्च अधिकृताः । इतिहासपुराणमहाभारतपाञ्चरात्रादिकाः वैदिकागमाः, बौद्धाद्यागमाः विषयविवेचनानुसारम् अवैदिकागमत्वेन च स्वीकृताः । वैदिकागमा अपि वैष्णवशाक्तशैवेति भेदेन मूलतः त्रिप्रकारकाः उक्ताः । पाञ्चरात्रागमः वैखानसागमश्चेति वैष्णवागमस्य द्विधा भेदः प्रसिद्धः । दक्षिणाचारवामाचाररूपेण शाक्तागमोऽपि द्विधा प्रसिद्धिं गतः । दक्षिणाचारः प्रायशः वैदिकमार्गानुगामी वामाचारश्च केवलमागममार्गानुगामी च वर्तते । शैवागमः कश्मीरशैवसम्प्रदायत्वेन दाक्षिणात्यशैवसम्प्रदायरूपेण च सर्वत्रागमिकानां मध्ये प्रथित एव । एतदतिरिक्तं कापालकालामुखपाशुपतशैवभेदेन चत्वारः शैवागमाः प्रसिद्धाः सन्त्येव । वैष्णवागमे विष्णुः मुख्याराध्यत्वेन स्वीकृतः । पाञ्चरात्रवैखानसागमशास्त्रयोः प्राधान्येन क्रियाप्रधानाराधनाविषयेऽवधानं दत्तमवलोक्यते । समूर्ताराधने आवश्यकानां तत्त्वानां साङ्गोपाङ्गं विवेचनमत्रागमे प्रतिपादितम् । उभयत्र शाक्तागमे शक्तेः परमाराध्यत्वं दृश्यते । शैवागमे सर्वत्र शिवः सर्वापेक्षया श्रेष्ठः परमतत्त्वरूपः स्वीकृतः वर्णितश्च । संक्षेपतः अधोलिखिताः एताः आगमिकसम्प्रदाय शाखाः ।

आगमः

- १. वैदिकः
  - १. वेदाः
  - २. इतिहासः
  - ३. पुराणानि,
  - ४. विविधागमाश्च
    - १. वैष्णवागमः
      - १. पाञ्चरात्रागमः
      - २. वैखानसागमः
    - २. शाक्तागमः
      - १. दक्षिणाचारः
      - २. वामाचारः
    - ३. शैवागमः
      - १. कापालः
      - २. कालामुखः
      - ३. पाशुपतः
      - ४. शैवः
- २. अवैदिकः
  - बौद्धाद्यागमाः

वैदिकावैदिकद्विविधागमसम्प्रदायेऽयं पाञ्चरात्रागमः वैदिकसम्प्रदायेऽन्तर्भूतः । यतो हि पाञ्चरात्रागमे बहुत्र निश्चिततया वैदिकतत्त्वानां प्राधान्यं दरीदृश्यते । अस्यागमस्य तान्त्रिकत्वकथने मूलं तु अत्रत्याः मण्डलदीक्षामुद्रादिवर्णनविषया वैदिकमन्त्रातिरिक्ता अत्रत्याः केचन हुं फडादिप्रयोगाश्च । वैखानसागमः शुद्धवैदिकागमत्वेन स्वीकृतः । वैखानसागमग्रन्थेषु न कुत्रचिदपि एते मण्डलादितान्त्रिकविषयाः वर्णिताः भवन्ति । प्रायः एतस्मादेव कारणात् पाञ्चरात्रागम

शुद्धवैदिकागमत्वेन न स्वीकृतः[1]। परम्परामनुश्रित्य निगमतान्त्रिकमिश्रेति भेदैः वैष्णवागमः त्रिविधः। वैखानसागमः निगमरूपेणाभिहितः, पाञ्चरात्रम् तान्त्रिकम् भागवतस्तु मिश्रश्चेति[2]। एवमेव वैखानसस्य निगमत्वं पाञ्चरात्रस्य आगमत्वमपि आनन्दसंहिता प्रतिपादयति। वैखानसागमग्रन्थः खिलाधिकारोऽपि पाञ्चरात्रस्य तान्त्रिकत्वं वैखानसस्य च वैदिकत्वं निर्दिशति। अत्रैव वैखानसः सौम्यः पाञ्च-रात्रम् आग्नेयम् चेत्यप्युक्तम्[3]। इत्थं पाञ्चरात्रागमस्य तान्त्रिकत्वं बहुत्र निरूपितम्। वस्तुतः विचार्यते चेत् पाञ्चरात्रस्य सत्यपि तान्त्रिकत्वे वैदिकपरम्परानु-सारित्वं न हीयते। केषुचित् पाञ्चरात्रागमग्रन्थेषु सम्यग् अयं विषयः प्रतिपादितः। तद्यथा—

अत्र मन्त्रास्तु ये केचित् पाञ्चरात्रप्रकाशिताः।
ते सर्वे वैदिकाः ज्ञेयाः रहस्यं वैदिकं त्विदम्॥
पाञ्चरात्रमिति ख्यातं वेदाध्वप्रकटीकृतम्।[4]

विष्वक्सेनमार्कण्डेयसंहिताभ्यामपि पाञ्चरात्रशास्त्रस्य श्रुतिमूलकत्वं प्रतिपादितम्[5]। विष्णुतन्त्रसंहितानुसारमपि पाञ्चरात्रस्य श्रुतिमूलकत्वमस्त्येव[6]। यद्यपि विष्णुसंहिता पाञ्चरात्रागमस्य तन्त्रत्वं प्रतिपादयति तथापि तस्य श्रुतिमूल-कत्वम् आप्तमूलकत्वञ्च स्वीकरोत्येव। अस्य तन्त्रस्य पुराणमन्वादिस्मृतीनामिव प्रमाणत्वमङ्गीक्रियते[7]। एभिः पाञ्चरात्रागमग्रन्थस्थप्रमाणैः पाञ्चरात्रागमस्या-वैदिकत्वं निश्चितमेवापगच्छति। अपि च पाञ्चरात्रप्रक्रियायां वर्णितः व्यावहा-रिकः पक्षः वैदिकश्रौतप्रक्रियया अत्यन्तं प्रभावितः वर्तते इत्यपि अवधेयम्। श्रौत-पाञ्चरात्रप्रक्रिययोः व्यावहारिकपक्षस्य तुलनात्मकपरिशीलनेन स्पष्टमेवायं विषयः अवगम्यते। सामान्यतः अत्रैतदवगन्तव्यं यत् इयमागमिकप्रक्रिया श्रौत-

---

१. **वैखानसं पाञ्चरात्रं वैदिकं तान्त्रिकं क्रमात्** — आनन्द संहिता १४.१

२. **निगमस्तान्त्रिको मिश्रस्त्रिविधः प्रोक्त आगमः।**
निगमो विखनः प्रोक्तः मिश्रः भागवतः स्मृतः। — आनन्द संहिता ६.५

३. **विष्णोस्तन्त्रं द्विधा प्रोक्तं सौम्यमाग्नेयमित्यपि।**
सौम्यं वैखानसं प्रोक्तमाग्नेयं पाञ्चरात्रकम्॥
सौम्याग्नेये तथा प्रोक्ते शास्त्रे वैदिकतान्त्रिके॥ — खिलाधिकारः ४१.१-२

४. नारदीय संहिता. २६.३६-४०;

५. **श्रुतिमूलमिदं शास्त्रं प्रमाणं कल्पसूत्रवत्;** — मार्कण्डेय सं० १.३८
विष्वक्सेन सं० ८.६-७.

६. **श्रुतिमूलानि तान्येव पाञ्चरात्राणि पङ्कज।** — विष्णुतन्त्र सं० १.३६.

७. **वेदमूलतया तन्त्रमाप्तमूलतयापि च।**
पुराणवत् प्रमाणं स्यात् तथा मन्वादिवाक्यवत्॥ — विष्णु सं० २.११.

प्रक्रियायाः छाया इव वरीवर्ति। कालक्रमेण देशादिप्रभावतः अस्यां प्रक्रियायां केचन नूतना अधिका विशिष्टा वा विषयाः सन्ति समाविष्टाः। तथा हि— श्रौतप्रक्रियायागेषु केवलम् अमूर्तम् (अग्नौ होमादिः) आराधनमुक्तम्, पाञ्चरात्रागमप्रक्रियायां प्राधान्येन समूर्तमाराधनं विहितम्। परन्त्वत्र अमूर्ताराधनं न सर्वथा त्यक्तम्। आगमिकप्रक्रियायां प्रतिमायाम् अग्नौ कुम्भे मण्डले च विहितमाराधनं चतुस्स्थानार्चनरूपेण सर्वत्र प्रसिद्धम्। एतदेव चतुस्स्थानार्चनं सर्वापेक्षया उत्तमाराधनत्वेन स्वीकृतम्।[1]

पाञ्चरात्रागमस्य प्राचीनत्वम्—

पाञ्चरात्रागमसंप्रदायः निश्चितमेव प्राचीनः आगमिकप्रक्रियाविशेषः। अस्याः परम्परायाः प्राचीनत्वविषये कैश्चिद्विमर्शकैः विचारः कृतः। प्रसङ्गात् अस्माभिरप्यत्रास्मिन् विषये किञ्चिद्विचार्यते। तथा हि—महाभारतस्य भीष्मपर्वस्थमोक्षधर्मविवेचनप्रसङ्गे सात्वतविधेः अर्थात् पाञ्चरात्रप्रक्रियायाः प्रशस्तिः दृष्टिपथमारोहति[2]। अतः पाञ्चरात्रस्य सामान्यः कालः भीष्मपर्वणः रचनाकालापेक्षया प्राचीनः भवेदिति अनुमीयते। परन्तु महाभारतस्य रचनाकालः सर्वथा विवादरहितः निश्चितः कश्चिदेको न निर्धारितः। आधुनिकविमर्शकानां मते कालक्रमेण विरचितं महाभारतं दीर्घे काले पूर्णताम् अगात्[3]। अतः भीष्मपर्वणः पाञ्चरात्रविधिनिरूपकभागस्य रचनाकालनिर्धारणं नाति सुकरम्। अथापि आलोचकैः निर्धारितमहाभारतरचनाकालात् पूर्वमेव पाञ्चरात्रप्रक्रियायाः सत्ता स्वीकारे नास्ति विवादस्यावसरः।

श्रीमतः सी० बी० वैद्यमहाशयस्य मते दीर्घे काले सम्पन्नापि महाभारतस्य संरचना क्रैस्तवीयतृतीयशताब्दं यावत् पूर्णतामगात्[4]। जार्ज ग्रीयर्सनमते क्रैस्तवीयद्वितीयचतुर्थशतकयोः मध्ये अधुनोपलब्धस्य महाभारतस्य स्वरूपं विरचितम् आसीत्[5]। विन्टरनित्समहाशयः क्रैस्तपूर्वचतुर्थशतकादारभ्य क्रैस्तवीयचतुर्थशतकपर्यन्तं मध्ये विद्यमानं दीर्घं कालं महाभारतस्य रचनाकालं मन्यते[4]। एतन्मतालोडनमपि पाञ्चरात्रसम्प्रदायस्य क्रैस्तवीयचतुर्थशतकात् पूर्वकालिकत्वं

---

१. एकं तु बिम्बकं प्रोक्तं द्विस्थानं बिम्बपावकम्।
त्रिस्थानं कुंभसंयुक्तं चतुस्स्थानं तु मण्डलम्॥ अनिरुद्ध सं० ६.६३-६४
कुंभमण्डलबिम्बाग्नौ पूजनं चोत्तमं भवेत्।
उत्तमाराधनेनैव सर्वदोषक्षयं गतम्॥ अनिरुद्ध सं० ६.६०

२. महाभारतम्. भीष्म प० ६६.४०;

३. जयाख्यसंहिता. प्रस्तावना. पृ० ४२.४३;

४. History of Indian Literetur, Part II, Page 465, 475;

५. जयाख्यसंहिता. प्रस्तावना. पृ० ४३;

साधयति । ब्रह्मसूत्रस्याविरोधाध्यायनामके द्वितीयाध्यायस्थद्वितीये पादे (तर्कपादे) सांख्यवैशेषिकजैनसर्वास्तिवादादिमतानां युक्तिपूर्वकं निराकरणप्रसंगे पाञ्चरात्रमतस्यापि निराकरणमवलोक्यते[1] । ब्रह्मसूत्राणां रचनाकालश्च क्रैस्तवीयषष्ठशतकात् प्राचीनः स्वीकृतः[2] । अतः पाञ्चरात्रप्रक्रिया निश्चितमेव क्रैस्तवीयषष्ठशतकात् पूर्वकाले प्रसिद्धा आसीत् इति वक्तुं शक्यम् ।

केषांचित् शिलालेखानामालोडनेनापि पाञ्चरात्रागमस्य कालविषये किञ्चित् तथ्यमस्माकं समक्षमायाति । तद्यथा--क्रिस्तोः प्राक् द्वितीयशताब्दे लिखिते राजपुतानाप्रदेशस्थघोसुण्डिनामके नगरे उपलब्धे शिलालेखे संकर्षणवासुदेवयोः आलयं परितः प्राकारकल्पनोल्लेखः दृश्यते । क्रिस्तोः अव्यवहितपूर्वशताब्दे समुल्लिखिते नानाघाटग्रामस्थगुहायामुपलब्धे एकस्मिन् शिलालेखस्थमङ्गलश्लोके वासुदेवसंकर्षणशब्दौ समुल्लिखितौ दृश्येते । भगवन्तं वासुदेवं प्रीणयितुं भागवतः होलियोदोरा गरुडध्वजस्तंभं प्रतिष्ठापितवान् इति वेशनगरग्रामे समुपलब्धेन शिलालेखेनावगम्यते । अस्य शिलालेखस्य कालः क्रिस्तोः प्राक् द्वितीयः शताब्दः स्वीकृतः । इत्थम् क्रिस्तोः प्राक् द्वितीयशताब्दे भारतीयसमाजे वासुदेवाराधनस्य प्रचारः तदाराधकानां भागवताभिधानं च स्पष्टमेव सिद्धयति[3] । तदानींतन काले भगवदाराधनविधिप्रतिपादकस्य पाञ्चरात्रशास्त्रस्य सत्त्वम् अपि स्वयमेव साधितं भवति ।

क्रिस्तोः प्राक् चतुर्थे शताब्दे चन्द्रगुप्तशासनकाले भारतभ्रमणार्थमागतेन यवनपर्यटकमेगास्थनिजेन सौरसेनीयः कश्चित् क्षत्रियः वासुदेवाराधकत्वेन वर्णितः । प्राचीनकालादेव वासुदेवाराधनं सात्वतविधिमूलकमिति सर्वविदितम् । सात्वतभागवतशब्दौ च सामान्यतः परस्परपर्यायवाचकौ । महाभारते भीष्मपर्वणि अपि सात्वतविधेः चर्चा दृश्यते । तद्यथा—

ब्राह्मणैः क्षत्रियैः वैश्यैः शूद्रैश्च कृतलक्षणैः ।
सेव्यतेऽभ्यर्च्यते चैव नित्ययुक्तैः स्वकर्मभिः ॥
द्वापरस्य युगस्यान्ते आदौ कलियुगस्य च ।
सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ॥

अयमभिप्रायः येन विधिना भगवान् वासुदेवः आराध्यते स एव विधिः भागवतविधिः । भागवतविधिना भगवदाराधकोऽपि भागवत इत्युच्यते । तस्य मतं भागवतमतम् इति प्रसिद्धम् । इत्थम् भागवतविधिः भागवतः भागवतमतं चैतत्-

---

१. ब्रह्मसूत्रशांकरभाष्यम्. २.२.४२-४५;
२. भारतीयदर्शन. पृ० ३३६;
३. Vaishnavism Saivism and other minor religiouns of India.

त्रयमपि क्रिस्तोः प्राक् तृतीये चतुर्थे च शताब्दे प्रसिद्धमासीत्। अतः एतेषां त्रयाणां विस्तृतविवेचनपरं किञ्चिच्छास्त्रं तदानीमपि उपलब्धमासीदिति स्वतः सिद्धचति। तच्च शास्त्रं पाञ्चरात्रशास्त्रं सात्वतशास्त्रं वेति नाम्ना तदानीं प्रसिद्धं भवेदिति वक्तुं शक्यम्।

क्रिस्तोः प्राक् द्वितीयशताब्दे तमिलभाषायां रचितयोः शिलप्पाधिकार-परिपडलेति ग्रन्थद्वयोः निर्दिष्टं गरुडध्वजसङ्कर्षणवासुदेवानिरुद्धश्रीकृष्णवलदेव-बिम्बानां वर्णनं[1] पाञ्चरात्रप्रक्रियां क्रिस्तोः प्राक् द्वितीयशताब्दात् पूर्वकालि-कत्वं साधयति इति कथनं नायुक्तम्।

क्रिस्तोः प्राक् सप्तमशताब्दे विद्यमानः महान् वैयाकरणः आचार्यपाणिनिः वसुदेवस्य पुत्रः इति प्रवृत्तिनिमित्तमादाय वासुदेवशब्दं व्युत्पादयितुं "वासुदेवार्जुनाभ्यां वुन्[2]" इति सूत्रं व्यरचत्। ननु वसुदेवस्य पुत्रः इत्येतादृशार्थप्रतिपादक-वासुदेवशब्दं व्युत्पादयितुं "गोत्रक्षत्रियाख्येभ्यः बहुलं वुञ्"[3] इति सूत्रे विद्य-माने सति वुन् प्रत्ययविधायकं सूत्रं व्यर्थमिति चेन्न, परमात्मार्थप्रतिपादकं वासु-देवशब्दं व्युत्पादयितुं तस्यावश्यकत्वात्। अन्यथा वासुदेवार्जुनेत्यादि सूत्रस्य वैयर्थ्यं स्पष्टमेव। अतः पाणिनिकालेऽपि परमात्मवाचकः वासुदेवशब्दः प्रसिद्धः आसी-दिति सिध्यति। तथा हि महाभाष्ये भगवता पतञ्जलिना प्रदीपे कैयटेन चोक्तं— 'नित्यः परमात्मा देवताविशेषः इह वासुदेवो गृह्यते इति विशेषः,। "नैषा क्षत्रि-याख्या संज्ञैषा तत्र भवतः[4]"। इत्थं पाणिनेः काले वासुदेवस्य परमात्मवाचकत्वे सिद्धे तस्य आराधनप्रक्रियाविवेचकस्य सात्वतविधेः अर्थात् पाञ्चरात्रप्रक्रियायाः सत्तास्वीकारे न दोषः।

वैखानसागमसम्प्रदाये दैविकमानुषद्विविधवासुदेवयोः पृथक्-पृथक् बिम्बा-दिकल्पनवर्णनमपि देवरूपस्य वासुदेवस्य मानुषवासुदेवस्य च स्पष्टं पार्थक्यं बोधयति[5]।

सात्वतशब्दः ऐतरेयब्राह्मणे[6] शतपथब्राह्मणे[7] चोपलभ्यते इति डॉ० एस० के० अय्यंगारमहाशयानां मतम्। यद्येतन्मतं प्रामाणिकं तर्हि पाञ्चरात्रप्रक्रियायाः कालः क्रिस्तोः प्राक् स्वीकर्तव्यः एव।

---

१. आलवारकलकालनिले. लेखक :—श्रीराघव अय्यंगारः;
२. अष्टाध्यायी-४.३.९८;
३. अष्टाध्यायी-४.३.९९;
४. महाभाष्यम्. ४.३.९८;
५. विमानार्चनकल्पः. पटलः ६०; पृ० ३८४-३८५.
६. ऐतरेयब्राह्मणम्. १.२५.६; ८.१४.३;
७. शतपथब्राह्मणम् ११.५.४-२१;

इत्थम् अङ्गुलग्राहिकतया पाञ्चरात्रागमारंभकालस्य निश्चिततया वक्तुमशक्यत्वेऽपि उक्तैः प्रमाणैः अस्य सम्प्रदायस्य प्राचीनत्वविषये नास्ति संशयः। अयं सम्प्रदायः क्रिस्तो अनेकशताब्दपूर्वकालादेव प्रसृत आसीत् इति कथनं युक्तमेव। यद्यपि दृढप्रमाणाभावे पाञ्चरात्रागमस्योपलब्धग्रन्थानां प्रणयनकालः वक्तुमशक्यः तथापि एम्बार श्रीकृष्णमाचार्यः जयाख्यसंहितायाः लेखनकालं क्रिस्ताब्दस्य सप्तमशताब्दात् पूर्वं मन्यते[1]। बाह्यसाक्ष्यमनुसृत्य नारदीयसंहितायाः लेखनकालः क्रिस्तोः अष्टमशताब्दात् पूर्वं बुद्धावताराच्च अनन्तरं स्वीकृतः[2]।

पाञ्चरात्रागमस्य वैविध्यम्—

दशमशताब्दे आचार्योत्पलः उपनिषच्छ्रुतिसंहितेति त्रीणि विशेषणानि प्रदर्शयन् अस्य पाञ्चरात्रशास्त्रस्य वैशिष्ट्यं बोधितवान्[3]। यद्यपि श्रीप्रश्नसंहितायाः विदुषी सम्पादिका पाञ्चरात्रस्योक्तत्रैविध्यविषये अश्रद्धां प्रादर्शयत्,[4] तथापि पाञ्चरात्रागमस्य केषुचित् ग्रन्थेषु विद्यमानाः पुष्पिकाः अवलोक्य आचार्योत्पलोक्तं त्रैविध्यं युक्तमेव प्रतिभाति। विश्वामित्रसंहितायाः कासुचित् अध्यायान्तपुष्पिकासु 'उपनिषत्' इति शब्दः प्रयुक्तः।[5] पौष्करसंहितायाः पाद्मसंहितायाश्च अध्यायान्तपुष्पिकासु 'महोपनिषत्' इति शब्दः दृश्यते[6]। वाराहसंहितायाः पुष्पिकायामपि 'महोपनिषच्छब्दः प्रयुक्तः[7]।' संहिताशब्दस्य प्रयोगस्तु सर्वत्र प्रसिद्ध एव। नारदीयसंहिता श्रीप्रश्न संहिताप्रभृति पाञ्चरात्रग्रन्थेषु सर्वत्र पुष्पिकासु संहिताशब्दः निर्दिष्टः। श्रुतिशब्दः पौष्करसंहितायाम् ईश्वरसंहितायां च प्रयुक्तः। तत्र तावत् आगमसिद्धान्तस्य लक्षणनिरूपणक्रमे एतच्छास्त्रं श्रुतिस्वरूपम् इत्युच्यते[8]। इत्थम् अद्यापि त्रिविधं पाञ्चरात्रशास्त्रम् अस्माकं समक्षं वर्तते। परन्तु विषयविवेचनदृष्ट्या एषु त्रिषु परस्परं न कश्चिद्भेदः वैशिष्ट्यं वावलोक्यते।

---

१. जयाख्यसंहितोपोद्घातः पृ० ५३;

२. नारदीयसंहितोपोद्घातः पृ० झ-ञ;

३. जयाख्यसंहिता—Introduction, pag-7.

४. श्रीप्रश्नसंहिता – English Introduction, pag-16.

५. विश्वामित्रसंहिता—पृ० ८.

६. पाद्मसंहिता—ज्ञा० पा० अ० १;
पौष्करसंहिता पृ० ३;

७. वाराहसंहिता. मातृका— ५५२. के० सं० विद्यापीठम्, तिरुपति;

८. ईश्वरसंहिता-- २१. ५६६;
पौष्करसंहिता —१३. ५२८;

पाञ्चरात्रग्रन्थेषु अस्यागमस्य अनेके अवान्तरभेदाः उक्ताः। अस्मिन् विषयेऽपि अत्र कश्चिद्विचारः अपेक्षितः। ईश्वरसंहितोक्तप्रकारेण दिव्यं मुनि-भाषितं चेति द्विविधमेतच्छास्त्रम्। भगवान् वासुदेवः मूलवेदाननुसृत्य सात्वतं पौष्करं जयाख्यं चेति दिव्यशास्त्ररूपं संहितात्रयं संकर्षणमुपदिदेश। भगवता संकर्षणेन एतानि दिव्यशास्त्राणि लोके प्रवर्तितानि[1]। एतद्दिव्यं शास्त्रं सात्वत-शास्त्ररूपेणापि प्रसिद्धम्[2]। एकायनवेदशब्देनापि पाञ्चरात्रशास्त्रं प्रसिद्धम्। मोक्षोपलब्धौ केवलमेकस्य पाञ्चरात्रागमस्यैव कारणभूतत्वात् अस्यैकायनवेद इति अन्वर्थं नाम। अयमेकायनवेदः महतः वेदवृक्षस्य मूलं सद्ब्रह्मवासुदेवात्मतत्त्वस्य संश्रयः दिव्यबलादिमन्त्रोपेतश्च वर्तते। संशयरहितत्वात् एतच्छास्त्रम् अविद्या-तिमिरनाशकं चोक्तम्[3]। लोके सात्वतशास्त्रस्य प्रवृत्तिनिर्देशक्रमे तत्तद्युगेषु अनुष्ठानयोग्यधर्माणां संक्षिप्तवर्णनावसरे आदौ कृतयुगे योग्याः मानवादयः भागवतधर्मानुष्ठातारः त्रेतायुगे विविधकामनाभिराक्रान्ता मानवाः व्यामिश्रया-जिनश्च भवन्तीति उक्तम्। व्यामिश्रयाजिभिः त्यक्तः आदिसनातनः भागवतधर्मः तदानीं वासुदेवसमादृतः अन्तर्दधाति। अनन्तरं भगवान् योग्यानामधिकारिणां कृते एतच्छास्त्रं प्रवर्तयति[4]। प्राचीनकाले तोताद्रिशिखरे दीर्घकालपर्यन्तं तपसि संलग्नः शाण्डिल्यः त्रेतायुगस्यान्ते कलियुगस्य चादौ संकर्षणात् एकायनवेदं लेभे। शाण्डिल्यः लब्धमेकायनवेदं सुतन्तुजैमिनिभृग्वौपगायनमौञ्जायनेभ्यश्चायच्छत्। संकर्षणात् शाण्डिल्येनाधीतं शास्त्रं दिव्यशास्त्रम् उच्यते[5]। अनुष्टुभ् छन्दोबद्धतया व्याससमासरूपेण ब्रह्मरुद्रेन्द्रादिभ्यः प्रभुवरेभ्यः दिव्यलोकेषु प्रवर्तितत्वात् एतच्छा-स्त्रं दिव्यशास्त्रमिति।

वक्तृभेदात् सात्विकराजसतामसपौरुषभेदैः मुनिभाषितपाञ्चरात्रशास्त्रस्य चत्वारः भेदाः उक्ताः। एतेषां चतुर्णां लक्षणानि चोक्तानि। तथाहि-पुण्डरी-काक्षात् यथास्थितम् अर्थजातं ज्ञात्वा तदनुरूपं प्रणीतं शास्त्रं सात्विकं शास्त्रम्। सात्विकशास्त्राणामर्थज्ञानपूर्वकं तदनुरूपं च स्वबुद्ध्युन्मेषकल्पितार्थजातबोधकं विज्ञानतत्त्वं सर्वेश्वरात् स्वीकृत्य स्वविकल्पविजृम्भणैः संक्षेपतः ब्रह्मादिना प्रणीतं, पुनः ब्रह्मणः ऋषिभिः संक्षिप्य स्वीकृत्य स्वकल्पितविकल्पेन निर्मितं शास्त्रं राजस-शास्त्रमित्युक्तम्। केवलं स्वविकल्पेन कल्पितं शास्त्रं तामसशास्त्रम्। केवलं मनुजैः निर्मितं शास्त्रं पौरुषं शास्त्रम्[6]।

---

१. ईश्वर संहिता—१. ४७-५१;
२. ईश्वर संहिता—१. ६,
३. ईश्वर संहिता—१. १८-२१;
४. ईश्वर संहिता—१. २६-२८;
५. ईश्वर संहिता—१. ३८-४१;
६. ईश्वर संहिता—१. ५२-६३;

नारायणसंहितायां लक्षणकथनं विनैव ग्रन्थनामनिर्देशपूर्वकं पाञ्चरात्रशास्त्रस्य सात्विकराजसतामसभेदेन त्रैविध्यमुक्तम्।[१] ईश्वरसंहितोक्तसात्विकराजसतामससंहितालक्षणमनुसृत्य नारायणसंहितायां निर्दिष्टानां तत्तत्सात्विकादिसंहितानां परीक्षणं तस्य युक्तायुक्तत्वविवेचनं च विद्यते स्वतन्त्रः कश्चिद्विषयः।

पाञ्चरात्रागमस्यावान्तरभेदाः

स्वरूपविस्तारादिकमवलम्ब्य केषुचित् पाञ्चरात्रागमग्रन्थेषु अस्यागमस्यान्तरिकभेदविषयकः विचारः प्रवर्तितः। यद्यपि तादृशस्वरूपादिविषयमाधृत्य निश्चिततया किमपि दृढ़मतकल्पनं नातीव सुकरं तथापि प्रासंगिकत्वादस्य विषयस्य संक्षिप्तं विवेचनमत्रावश्यकम्। तथा हि ईश्वरसंहितायां पारमेश्वरसंहितायां च आगमसिद्धान्त-मन्त्रसिद्धान्त-तन्त्रसिद्धान्त-तन्त्रान्तरसिद्धान्तश्चेति पाञ्चरात्रागमस्य चत्वारः भेदाः उक्ताः[२]। तत्र तावत् क्रमागतब्राह्मणैः वासुदेवसंकर्षणानिरुद्धप्रद्युम्नेति चातुरात्म्याराधनस्य कर्तव्यत्वेन विधायकः सिद्धान्तः आगमसिद्धान्त इति। सिद्धान्तेऽस्मिन् हृत्पद्मपूर्वकं नानाव्यूहसमवेतद्वादशमूर्तीनामन्यान्यमूर्तीनां प्रादुर्भावानां प्रादुर्भावान्तर्गणानां लक्ष्म्यादिशंखचक्रगरुडदिक्पालानां च गणैः सह अस्त्रादीनां च वर्णनं दृश्यते।

चतुर्मूर्तीनामन्येषां च देवानामुपासनक्रमवर्णनपरं पाञ्चरात्रं सर्वविधफलदायकं मन्त्रसिद्धान्तत्वेन स्वीकृतम्। तन्त्रसिद्धान्ते केवलं वाक्संवृतमन्त्रैः भगवद्रूपस्याराधनमुक्तम्। सिद्धान्तेऽस्मिन् सविग्रहविविधाभरणास्त्राद्यावृतकान्तव्यूहादीनां वर्णनं दृश्यते। तन्त्रान्तरसिद्धान्ते तु व्यूहादिभेदं विना मुख्यानुवृत्तिभेदैः रहितानां परिवारसमूहैः परिवृतानां सिंहादिप्रादुर्भावगणानाम् अर्चनादिप्रकारो विहितः[३]।

ईश्वरसंहितोक्तदिशा नित्योदितव्यूहस्थापनादिविधिप्रकाशकमपौरुषेयं सद्ब्रह्मवासुदेवादियाजिनां लक्ष्यभूतब्रह्मोपनिषदाख्यदिव्यमन्त्रक्रियोपेतं विवेकदम् अनिच्छयाप्यपवर्गदायकं नित्यवासुदेवाभिधानकथितषाड्गुण्योपेतदेववर्णनात्मकं श्रुतिस्वरूपं शास्त्रमागमसद्धिान्तः। अयं सिद्धान्तः कृतयुगे सर्वोत्तम-

---

१. नारायण संहिता मातृका—पृ० १६२-१६३; K. S. V. Tirupati. 662.

२. चतुर्धाभेदभिन्नोऽयं पाञ्चरात्राख्य आगमः।
पूर्वमागमसिद्धान्तं द्वितीयं मन्त्रसंज्ञितम्।
तृतीयं तन्त्रमित्युक्तम् अन्यत्तन्त्रान्तरं भवेत्।
ईश्वर सं० २१.२६०-२६१; पारमेश्वर सं० १९.५२२-५२३;

३. पौष्करसंहिता. ३८.२९०-०००;

धर्मत्वेन स्वीकृतः[1]। त्रेतायुगस्यादौ भोगमोक्षयोः प्रसिद्धये पूर्वं निर्दिष्टादागमसिद्धान्ताज्जाग्रद्व्यूहादिमूर्तिभ्यः मन्त्रसिद्धान्तसंज्ञकं शास्त्रं समुत्पन्नम्। अथ च वासुदेवाद्द्वितीयमूर्तिसंकर्षणे, ततः प्रद्युम्ने ततोऽप्यनिरुद्धे चास्यागमशास्त्रस्य व्याप्तिक्रम उक्तः। अनिरुद्धात् वागीश्वरे तत इन्द्ररुद्रादित्यवह्न्यादिदेवतासु नारदादिषु च व्याप्तमभूदेतच्छास्त्रम्। मन्त्रसिद्धान्तस्य स्वरूपं तु शान्ततरव्यूहशान्तसुषुप्तिस्वप्नजाग्रद्व्यूहकेशवादिमूर्त्यन्तराणां प्रादुर्भावानां हृत्पद्मपीठादौ लक्ष्मीपुष्टयादिशक्तीनां शंखचक्रादिलाञ्छनगरुडादिप्रमुखानां भूतसिद्धादिप्रधानशातृणां नृसिंहादिविभवानां व्यूहानां सूक्ष्माख्याधिकस्य समयिपुत्रकाभिषेकस्यतदीयसमयाचारस्य मूर्तिस्थापनप्रकारस्य मन्त्रमण्डलमुद्राकुण्डादिलक्षणादिकस्य च विस्तृतवर्णनात्मकमुच्यते। तन्त्रसिद्धान्तपाञ्चरात्रं तावत् परव्यूहादिमूर्तिभेदवर्णनं विनैव भूषणोपेतास्त्रविग्रहयुक्तं साङ्गं केवलं वा कान्तव्यूहवर्णनात्मकं शास्त्रमुक्तम्। नृसिंहकपिलक्रोडहंसवागीश्वरादिमुख्यानुवृत्तिभेदेन केवलस्य साङ्गोपाङ्गचक्राद्यस्त्रवरमुकुटादिभूषणैः सह लक्ष्म्यादिकान्तागणानां वा सपरिवारपूजनप्रकारप्रतिपादकं शास्त्रं तन्त्रान्तरसिद्धान्तशास्त्रं कथितम्[2]।

पाद्मसंहितामनुसृत्य चतुर्णामृगादिवेदानामिव पाञ्चरात्रस्य सिद्धान्तादयश्चत्वारो भेदा दृश्यन्ते। यथा शाखाभेदेन ऋगादयो वेदा अनेकधा भिद्यन्ते तथैव वक्तृभेदेन एकैकोऽपि सिद्धान्तः अनेकप्रकारकः।[3] तत्र प्राधान्येन चतुर्मूर्तिवर्णनात्मकं शास्त्रमागमशास्त्रम्। एकमूर्तिवर्णनविधायकं शास्त्रं मन्त्रसिद्धान्तसंज्ञकम्। मुख्यतो नवमूर्तिवर्णनपरं पाञ्चरात्रशास्त्रं तन्त्रसिद्धान्तरूपम्। चतुर्मुखदेवस्य त्रिमुखदेवस्य वार्चनविधिविधायकः सिद्धान्तः तन्त्रान्तरसिद्धान्त उच्यते[4]। पाद्मसंहिता मन्त्रान्तरसिद्धान्तान्तर्भूतेत्येतदपि अत्र प्रतिपादितम्[5]। कोटिजन्मानन्तरं सिद्धानामत्र संस्थितिकारणात् सिद्धान्तशास्त्रमेतदिति ईश्वरसंहितासम्मतं मतम्[6]। मीमांसादिशास्त्रेषु सिद्धप्रयोजनानां मनीषिणामेवाधिकृतत्वादस्य शास्त्रस्य सिद्धान्त इति अन्वर्थं नामेति पाद्मसंहिताया इष्टं मतम्[7]। व्यावहारिकदृष्टया मन्त्रसिद्धान्तलक्षणलक्षिता अनेके पाञ्चरात्रागमग्रन्थाः

---

१. ईश्वरसंहिता. २१.५६१-५६६;
२. ईश्वरसंहिता. २१.५६६-५८१;
परमेश्वरसंहिता. १९.५२९-५४३;
३. पाद्मसंहिता. ज्ञान पाद १.७६-७८;
४. पाद्मसंहिता. ज्ञान पाद. १.८०-८३;
५. " " " १.८६;
६. ईश्वरसंहिता. २१.५८२;
७. पाद्मसंहिता. ज्ञान पाद १.७८-७९;

अद्यत्वे उपलभ्यन्ते । अतः 'अनेकभेदसम्पन्नं मन्त्रसिद्धान्तशास्त्र'मिति कथनं युक्तमेव ।

पौष्करसंहिता कनीयःमध्यमोत्तमभेदेन त्रिविधं पाञ्चरात्रशास्त्रं वर्णयति । ग्रन्थविस्तारानुरोधेन कनीयसादिभेदसम्पन्नं त्रिविधं शास्त्रं पुनरपि पृथक्-पृथक् त्रिधा भिन्नं सत् नवविधम् भवति[1] । तथा हि—शतानुष्टुप् छन्दोबद्धं शास्त्रं पादसंज्ञकं सो तदपेक्षया द्विगुणश्लोकात्मकं मूलम्, सार्धद्विशतश्लोकान्वितं शास्त्रम् उद्धारसंज्ञकमिति त्रयः कनीयःभेदाः उक्ताः । सार्धद्विशतश्लोकसंवलितमुत्तर-संज्ञकम्, तस्मात् द्विगुणश्लोकसंख्यात्मकं शास्त्रं बृहदुत्तरशास्त्रम्, सार्धसहस्रश्लो-कान्वितं शास्त्रं कल्पसंज्ञकमिति मध्यमपाञ्चरात्रस्य त्रैविध्यं प्रतिपादितम् । सार्धत्रिसहस्रश्लोकादारभ्य षट्सहस्रद्वादशसहस्रश्लोकात्मकं वा शास्त्रं संहिता संज्ञकमुक्तम् । लक्षश्लोकादारभ्य सपादलक्षश्लोकात्मकं ततोऽधिकश्लोकान्वितं वा शास्त्रं कल्पस्कन्धशास्त्रम्, बहुलक्षश्लोकान्वितं सार्धलक्षत्रयश्लोकात्मकं वा शास्त्रं तन्त्रमिति त्रय उत्तमपाञ्चरात्रागमभेदा उक्ताः ।

पट्टिकारूपेणेत्थमुपस्थापियुं शक्यम्—

पाञ्चरात्रशास्त्रम्

- कनीयः
  - पादः
  - मूलम्
  - उद्धारः,
- मध्यमम्
  - उत्तरम्
  - बृहदुत्तरम्
  - कल्पः,
- उत्तमम्
  - संहिता
  - कल्पस्कन्धः
  - तन्त्रम्,

अद्यत्वे उपलब्धपाञ्चरात्रग्रन्थेषु कल्पस्कन्धतन्त्रलक्षणलक्षिताः ग्रन्थाः न सन्त्युपलब्धाः । पाद्मपारमेश्वरेश्वरसंहितादयः संहितालक्षणान्विताः अनिरुद्ध-विश्वामित्रशेषसंहितादयः कल्पलक्षणलक्षिताश्च ग्रन्था उपलभ्यन्ते । अधुनोपलब्ध-पाञ्चरात्रग्रन्थेषु एतद्द्विविधग्रन्था एव प्रधानाः । अन्यान्यलक्षणलक्षितग्रन्था न व्यवस्थिततयोपलभ्यन्ते । केषुचित् मातृकासंकलनेषु एकाध्यायात्मकः, अध्याय-द्वयात्मकः, अध्यायत्रयात्मको वा अप्रकाशितपाञ्चरात्रागमग्रन्थः दृष्टिपथमा-रोहति । तत्र कुत्रचित् पुष्पिकासु अध्यायसंख्या निर्दिष्टा कुत्रचित् तस्याः अभावः । अध्यायसंख्याविशिष्टग्रन्थस्य अन्येऽध्यायाः ग्रन्थपातकारणात् विलुप्ता अतोऽनु-पलब्धा इत्यनुमीयते । अध्यायसंख्यारहितः अल्पपरिमाणात्मकः ग्रन्थः पादा-दिलक्षणलक्षितपाञ्चरात्रभेदान्तर्गतो भवेदिति निर्धारणं नायुक्तम् । इत्थम् पाञ्चरात्रागमभेदानां विविधलक्षणमनुसृत्य विशिष्टमध्ययनमावश्यकम् ।

---

१. पौष्करसंहिता. ३९.१२.

पाञ्चरात्रशब्दार्थः—

विविधपाञ्चरात्रागमग्रन्थेषु व्युत्पत्तिप्रदर्शनपूर्वकमनेकविधः पाञ्चरात्रशब्दार्थः प्रतिपादितः। तत्र तावद्विष्णुतन्त्रे देहिनां कृते वियद्वायुवह्निजलपृथ्वीति अविद्यामूलकाः पञ्च रात्रयः प्रोक्ताः। पञ्चवियदादिभोगाद्विनिवृत्तिदायकं शास्त्रं पाञ्चरात्रशास्त्रम्। अस्मिन्नेव तन्त्रे पाञ्चरात्रशब्दस्यापरोऽप्यर्थः प्रतिपादितः। तदनुसारम् अव्यक्तं मनः बुद्धिः अहंकारः चित्तं गन्धादितन्मात्राश्च देहिनां रात्रयः प्रोक्ताः। तैरव्यक्तादिभिः संवलितैः देहैः स्थितानां देहिनां भुक्तिमुक्तिप्रदं साधनं पाञ्चरात्रम् विधानम्। तदाराधनविधिप्रतिपादकं शास्त्रं पाञ्चरात्रमिति[1]। हयशीर्षसंहिता विष्णुतन्त्रे वर्णितं प्रथमं पाञ्चरात्रशब्दार्थमनुवदति[2]।

परमसंहितामते प्राणिनां कृते रात्रिभूतानां महाभूतानां पञ्चगुणानां च निवृत्तिसाधकत्वादेतच्छास्त्रं पाञ्चरात्रमित्युक्तम्। एतदनुसृत्य भूतवर्गः अव्यक्तः पुरुषश्चेति रात्रिसंज्ञकः[3]। कपिञ्जलसंहितापि पाञ्चरात्रशब्दस्य परमसंहितास्थप्रथममर्थं वर्णयति[4]।

श्रीप्रश्नसंहितानुसारम् अज्ञानमेव रात्रिः। पञ्चेति अज्ञाननाशकः। अज्ञाननाशकत्वादस्य शास्त्रस्य पाञ्चरात्रमिति अन्वर्थकं नाम[5]। भारद्वाजसंहितोक्तक्रमे ब्रह्मशिवेन्द्रनागर्षीति पञ्चरात्राणां समावेशात् एतच्छास्त्रं पाञ्चरात्रेति नाम्ना प्रसिद्धम्[6]। अस्यागमस्य सनत्कुमारसंहिताख्ये ग्रन्थे रात्रात्मकः

---

१. वियद्वायुश्च वह्निश्च आपश्चैव धरा तथा।
रात्रयो देहिनां प्रोक्ता अविद्यासंभवास्तथा।
पाञ्चरात्रमिति प्रोक्तमेतच्छास्त्रमथ तथा।
अव्यक्तं च मनो बुद्धिरहंकारश्च चित्तकम्।
तन्मात्राथ गन्धाद्याः रात्रयो देहिनां स्मृताः।
एभिः समन्वितैर्देहैः देहिनां भुक्तिमुक्तिदम्।
साधनं पूजनं त्वेतत् पाञ्चरात्रमिति स्थितम्। १.७८-८१;

२. आकाशवायुतेजांसि पानीयं वसुधा तथा।
एताः वै रात्रयः ख्याताः ह्यचैतन्यास्तेजोत्कटाः। आ० का० ४.२-३

३. परमसंहिता---१.३९-४१;

४. पृथिव्यादीनि भूतानि गुणाः पञ्च महामते।
रात्रयो जन्तवः प्रोक्ताः सर्वशास्त्रेषु निश्चिताः।
तद्भोगाद्विनिवृत्तिश्च पाञ्चरात्रमिति स्मृतम्. १.३१-३२.

५. रात्रिरज्ञानमित्युक्तं पञ्चेत्यज्ञाननाशकम्।
तच्छास्त्रं पाञ्चरात्रं स्यात् अन्वर्थस्यानुरोधतः। २.४०

६. प्रथमं ब्रह्मरात्रं तु द्वितीयं शिवरात्रकम्।
तृतीयमिन्द्ररात्रं तु चतुर्थं नागरात्रकम्।

विभागः द्रष्टुं शक्यः। तत्र नागरात्रं विहाय चत्वारोऽपि रात्राः सन्ति समुपलब्धाः। ईश्वरसंहितामनुसृत्य भगवतः पञ्चायुधोद्भूतेभ्यः शाण्डिल्यौपगायनमौञ्जायन-कौशिकभारद्वाजेभ्यः पृथक् पृथक् एकैकस्मिन् दिने भगवता उपदिष्टत्वात् एतच्छा-स्त्रं पाञ्चरात्रशास्त्रमभूत्। ईश्वरसंहितावदेव मार्कण्डेयसंहितायामपि पाञ्चरा-त्रशब्दार्थः प्रतिपादितः। तद्यथा-सार्धकोटिप्रमाणयुक्तस्य शास्त्रस्य पञ्चसु रात्रेषु विष्णुना उक्तत्वात् पाञ्चरात्रमिति नाम संजातम्[1]। सात्विकाचारसम्पन्न-पाञ्चरात्राधिकारिभिः अनुष्ठितं शास्त्रं पाञ्चरात्रशास्त्रमिति वाशिष्ठसंहिताया मतम्।

पाञ्चरात्रशास्त्रस्य पुरतोऽन्यानि पञ्च शास्त्राणि रात्रित्वं प्राप्नुवन्ति इति कृत्वा एतच्छास्त्रं पाञ्चरात्रशास्त्रमित्युक्तं पाद्मसंहितायाम्। अर्थात् इतर पञ्चशास्त्रापेक्षया अस्य शास्त्रस्योत्कृष्टत्वं बोध्यते[2]। अनिरुद्धसंहितायां निर्दिष्टः पाञ्चरात्रशब्दार्थः सामान्यतः पाद्मसंहितासदृशः। तत्रोच्यते यद्वत् दिवाकाले चन्द्रः तारका च अदृष्टाः भवन्ति तद्वदेव अस्य शास्त्रस्य समक्षं सांख्ययोगादिपञ्च-शास्त्राणि सर्वथाऽकिञ्चित्कराणि सञ्जायन्ते इत्यस्मात्कारणात् एतच्छास्त्रं पाञ्चरात्रमिति। अथवा यथा भगवतो भुवनभास्करस्योदये संजाते तत्तेजसः सम-क्षमन्यानि नक्षत्राणि तिरोहितानि अकिञ्चित्कराणि च भवन्ति तथैव पाञ्चरात्र-शास्त्रस्योदये सर्वाण्यपि अन्यानि शास्त्राणि मलिनानि गौणानि च भवन्ति।[3]

पुरुषोत्तमसंहितानुसारं भक्तानां मुक्तिसाधिकाया भगवद्भक्तेः बोधकं शास्त्रं पाञ्चरात्रमित्युच्यते[4]। विश्वामित्रसंहिता पाञ्चरात्रमित्यस्मिन् पदे विद्यमानेन

एवं ज्ञातमृषिश्रेष्ठ पाञ्चरात्रं पुरा युगे।
पञ्चममृषिरात्रं तु पाञ्चरात्रमिति स्मृतम्। २.१२-१३

१. सार्धकोटिप्रमाणेन कथितं तस्य विष्णुना।
रात्रिभिः पञ्चभिः सर्वं पाञ्चरात्रमिति स्मृतम्। १.२२-२३

२. ज्ञानपादः १.७२;

३. सांख्ययोगादिशास्त्राणि रात्रीयन्ते महान्त्यपि।
तत्सन्निधौ समाख्यासौ तेन लोके प्रवर्तते।
चन्द्रतारागणं यद्वत् शोभते नैव वासरे।
तथेतराणि शोभन्ते पञ्च नैवास्य सन्निधौ।
पञ्चत्वमथवा यद्वद्दीप्यमाने दिवाकरे।
ऋच्छन्ति रात्रयस्तद्वत् इतराणि तदन्तिके।
तस्मात् पाञ्चरात्राख्यं ब्रह्मलोके महीयते॥ १.३५-३८;

४. भगवद्भक्तिरेव स्याद्भक्तानां मुक्तिसाधनम्।
तद्भक्तिबोधकं शास्त्रं पाञ्चरात्रागमस्थितम्। १.४

पञ्चशब्देन पञ्चेन्द्रियाणि तेषां विषयान् गुणांश्चाभिधत्ते। आदानार्थक रा धातुना सह योगे कृते 'पञ्चरा' इत्यस्य शब्दस्य इन्द्रियाणां भूतानां चादाता इत्यर्थः स्वीकृतः। तस्मात् मनुष्याणां त्राणदायकत्वात् अस्य शास्त्रस्य पाञ्चरात्रमिति नामाभूत्। अस्य शास्त्रस्य सान्निध्यमनुसरणं च कुर्वतां जनानां समक्षं सांख्यादि-पञ्च शास्त्राणि रात्रिभूतानि भवन्ति। अथवा रात्रिः इत्युक्ते अज्ञानम्। तच्चा-ज्ञानं यस्य शास्त्रस्य समक्षं पञ्चत्वं प्राप्नोति तच्छास्त्रं पाञ्चरात्रमिति[1]। यद्यपि पाञ्चरात्रशब्दस्यार्थाभिधायकान्येतानि निर्वचनानि अर्थवादपरकाणीव प्रतिभान्ति तथापि अस्य शास्त्रस्य पुरतः सांख्यादिशास्त्राणां पञ्चत्वप्राप्त्यादिप्रतिपादनं व्या-वहारिकदृष्टचा युक्तं प्रतिभाति। यतो हि सांख्ययोगाद्वैतादीनां दार्शनिकसम्प्र-दायानां पुरुषार्थसाधकत्वे सत्यपि अमूर्ताराधनकारणात् सामान्यजनाग्राह्यत्वं स्पष्टम्। पाञ्चरात्रागमस्य तु समूर्ताराधनपरकत्वात् सामान्यजनैरपि सुग्राह्यत्व-मिति कृत्वाऽस्य शास्त्रस्यान्यशास्त्रापेक्षया अधिकजनाकर्षकत्वम् निश्चितमेव उत्कर्षाधायकम्। अतः अस्य समूर्ताराधकस्य शास्त्रस्य समक्षं अन्यानि शास्त्राणि उपेक्षितानि भवन्ति इति तात्पर्यम्।

केषांचित् मते पाञ्चरात्रशब्दे प्रयुक्तः रात्रशब्दः कालवाचकः स्वीकर्तव्यः। अभिगमनोपादानेज्यास्वाध्याययोगाख्यानां वैष्णवाचारनिर्वाहकपञ्चकालानां साङ्गोपाङ्गविवरणविधायकमिदं पाञ्चरात्रम्। इत्थं वैष्णवानाम् पञ्चकाला-धृताचारविधिप्रतिपादकत्वादस्य शास्त्रस्य पाञ्चरात्रमिति नाम्ना प्रसिद्धिरभूत् इत्येतन्मतमपि युक्तं प्रतिभाति।

पाञ्चरात्रागमस्थाः मुख्याः विषयाः—

पाद्मसंहिता तावत् पाञ्चरात्रागमस्थान् विषयान् ज्ञानयोगक्रियाचर्येति चतुर्षु पादेषु विभज्य वर्णयति। नामानुरूपं प्रायः सर्वेष्वपि पाञ्चरात्रागमग्रन्थेषु न्यूनाधिकविस्तारसंकोचरूपेण एते चत्वारः विषयाः सन्ति वर्णिताः। सामान्यतः

---

१. पञ्चेन्द्रियाणि विषयाः पञ्चभूतानि तद्गुणाः।
पञ्चशब्दाभिधेयानि विद्वांसोऽप्याचिचक्षिरे।
रा इत्ययमपि प्रोक्तो धातुरादानवाचकः।
विषयेन्द्रियभूतानामादातारश्च पञ्चशः।
मनुष्याः पालनात्तेषां पाञ्चरात्रमिति स्मृतम्।
सांख्ययोगादयः पञ्च रात्रीयन्तेऽस्य सन्निधौ।
तस्माद्वा पाञ्चरात्रार्थः प्रोच्यते सूरिसत्तमैः।
अथवा रात्रयो यद्वत् सन्निधौ पञ्चताय वै।
नीयन्ते तद्वदन्यानि शास्त्राण्येतस्य सन्निधौ।
इति वा पाञ्चरात्रार्थो विद्वद्भिः क्रियते द्विज॥

ज्ञानसंबद्धाः ग्रन्थावतारसृष्टिक्रमपाञ्चरात्रिकतत्त्वादयः केचन दार्शनिकविषयाः ज्ञानपादेऽन्तर्भाविताः। ध्यानधारणादयः केचन पातञ्जलयोगसमानाः यौगिकविषयाः योगपादेऽन्तर्भाविताः भवन्ति। विषयेऽस्मिन् पाञ्चरात्रिकं वैशिष्टयं तु ध्यानक्रमे वासुदेवस्य ध्येयत्वेन स्वीकरणं यन्नास्ति दृष्टचरं पातञ्जलयोगप्रक्रियायाम्[1]। क्रियापादे समूर्तार्चनसम्पादनार्थमावश्यकानां कर्षणादिप्रतिष्ठान्तविषयाणां विवेचनं तत्र-तत्र पाञ्चरात्रागमग्रन्थेषु द्रष्टुं शक्यम्। तत्र तावत् आलयकल्पनयोग्यभूमिसङ्ग्रहः आलयनिर्माणप्रकारः तस्य विविधाः भेदाः प्रतिमानिर्माणविधौ स्वीकृतानामनेकविधोपादानद्रव्याणां वर्णनम्, प्रतिमाभेदाः तेषां माननिर्देशपूर्वकं लक्षणनिर्माणप्रक्रियादयश्चेत्यनेके वास्तुशास्त्रीयाः शिल्पशास्त्रीयाश्च विषयाः प्रतिपादिताः। अन्तिमे चर्यापादे वैष्णवानां दीक्षा आचारनियमादयः भगवदाराधनसंबद्धाश्च विषया अन्तर्भवन्ति। तत्र प्राधान्येन नित्यनैमित्तिकाराधनानि सामान्यविशिष्टोत्सवप्रक्रियानिरूपणादयश्च वर्तन्ते प्रतिपादिताः।

पाञ्चरात्रागमे वर्णितानां विषयाणां विचारक्रमे डॉ० श्रेडरमहाशयः अत्रत्यान् विषयान् दर्शनमन्त्रशास्त्रयन्त्रशास्त्रमायायोगालयकल्पनप्रतिष्ठाविध्याह्निकक्रमवर्णाश्रमव्यवस्थोत्सवविधिवर्णनञ्चेति दशधा विभज्योपस्थापितवान्[2]। वस्तुतः अस्मिन् शास्त्रे एते मुख्याः विषयाः सन्तीति अस्य शास्त्रस्यालोडनेनापि वक्तुं शक्यम्। अत्र त्यक्तेषु पाञ्चरात्रशास्त्रवर्णितविषयेषु मूर्तिकल्पनदीक्षाप्रायश्चित्तादयः अपि केचन विषया अस्य शास्त्रस्य प्रतिपाद्या अंशाः सन्तीत्यवधेयम्।

भार्गवतन्त्रम् :--

भार्गवतन्त्रम् पाञ्चरात्रागमस्य संक्षिप्तानिरुद्धमार्कण्डेयादिसंहितावदल्पाकारकः ग्रन्थः पञ्चविंशाध्यायेषु १५९८ श्लोकैः पाञ्चरात्रागमस्थान् विषयान् वर्णयति। यद्यप्यत्र ग्रन्थे पाञ्चरात्रागमसम्बद्धाः न सर्वेऽपि विषयाः चर्चिताः तथापि वर्णितानां विषयाणां विविक्ततया स्पष्टं विवेचनं निश्चितमेवास्य तन्त्रस्यान्यतमं वैशिष्टयम्। डॉ० स्मीथमहाशयः उपलब्धं भार्गवतन्त्रमपूर्णं मत्वा अस्य ग्रन्थस्य यत्र तत्र समुपलब्धान् अंशान् एकत्रीकृत्य पूर्णतां विधातुं बद्धादरः दृश्यते[3] परन्तूपलब्धग्रन्थस्यादावन्ते च विद्यमानं प्रस्तावनात्मकमुपसंहारात्मकं च भागं समालोच्य ग्रन्थपूर्णताविषये न जायते संशयोदयस्यावसरः। पौष्करसंहितोक्तदिशा अनेकविधपाञ्चरात्रशास्त्रेष्वन्यतमकल्पात्मके पाञ्चरात्रेऽस्यान्तर्भावः भवेदिति ग्रन्थस्याल्पपरिमाणत्वं तु न दोषाय। इत्थं कल्पपाञ्चरात्रान्तर्गतः समुपलब्धोऽयं भार्गवतन्त्रग्रन्थः पूर्ण एवेति निश्चेतव्यम्।

---

१. पाद्म. सं० योग पाद. अ. ५. १-४;
विष्णुतिलक संहिता. ५. ४-५;

२. Introduction to Pancharatra and Ahirbudhnya Samhita Page 26

३. The Smith Agama Collection. Page-91

भार्गवपरशुरामादगस्त्यं प्रत्यागतत्त्वात् तन्त्रमेतत् भार्गवतन्त्रमिति नाम्ना प्रथितं लोके। भवाब्धेरुद्धर्तुकामाः वेदशास्त्राद्यध्ययनानन्तरमपि मलिनान्तःकरणाः तपोधनाः श्रेष्ठाः मुनयः आत्मन उद्धरणोपायं महेन्द्रशिखरे संस्थितं मुनिशार्दूलमगस्त्यं दृष्ट्वा तेनाधीतमनुष्ठितं च तन्मुखात् सुश्रुवुः। पुरा ऋषिभिः देवैश्च संप्रार्थितः अगस्त्यः कण्टकभूतौ वातापील्वलावुभौ राक्षसौ हत्वा हतप्रभः सन् खिन्नमनसा तपस्तप्तुं हिमवन्तं प्राप्य घोरतपसः अनन्तरमात्मोद्धारज्ञापिकां दैवीं वाणीमाकर्ण्य भगवन्तं भार्गवं ययौ। अगस्त्येन श्रद्धया संप्रीणितः संप्रार्थितश्च भगवान् भार्गवः सर्वोद्धारकं सर्वोत्तमोपायभूतं हर्यर्चनातन्त्रात्मकं भार्गवतन्त्रमगस्त्यायोपादिशत्। स एवोपदेशः भार्गवात् प्रपञ्चे आगतत्वात् भार्गवतन्त्रमिति प्रसिद्धम्।

यद्यपि कुत्रचित् भार्गवतन्त्रं भार्गवसंहितेति नाम्नापि दृष्टचरं भवति तथापि उपलब्धमातृकाणामध्यायान्तपुष्पिकासु बहुत्र भार्गवतन्त्रमित्युल्लेखमवलोक्य अस्यात्र तदेव नामास्माभिरपि निर्धारितं स्वीकृतञ्च। केचन मुख्या एव पाञ्चरात्रागमविषयाः अनतिविस्तरेण वर्णिता अत्र। ग्रन्थे प्रश्नोत्तरक्रमेण उत्तरोत्तरं विषयं ज्ञापयितुं भार्गवः अगस्त्यं संचोदयन् आवश्यकान् पाञ्चरात्रागमविषयान् प्रत्यपादयत्। ग्रन्थावतारात्मिकां प्रस्तावनां विधाय शास्त्रपरिचयञ्चोपस्थाप्य क्रमशः आलयकल्पनसम्बद्धान् वास्तुशास्त्रीयान् विषयान् मूर्तिकल्पनसम्बद्धांश्च वषयान् वर्णितवान्। अनन्तरं भगवत्प्रतिमाप्रतिष्ठाङ्गभूताः तत्तद्विषयाः उत्सवनित्याराधनप्रकारजीर्णोद्धारस्नपनविषयाश्च विविक्ततया प्रतिपादिताः। अष्टाक्षरमन्त्रोद्धारवैष्णवभेददैनन्दिनाचारप्रतिपादकपञ्चकालप्रक्रियावर्णनेन सह ग्रन्थः उपसंहृतः। प्रत्यध्यायं ग्रन्थे वर्णितानां विषयाणां संक्षिप्तः क्रमस्त्वित्थम्—

प्रथमेऽध्याये—प्रस्तावनात्मकेऽस्मिन् अध्याये पाञ्चरात्ररूपस्य भगवदाराधनतन्त्रस्योपयोगः प्रतिपादितः।

द्वितीयेऽध्याये—हर्यर्चनातन्त्रस्य परिमाणम्, तदनुसारं भगवतः समाराधनफलं भगवत आराधनस्य अव्ययसिद्धिदातृत्वञ्च।

तृतीयेऽध्याये आलयनिर्माणोद्देश्यम्, तदर्थं स्वोकार्यस्थलनिर्देशः, पद कल्पनप्रकारः आलयस्याङ्गमानादिनिर्देशः, विंशतिसंख्याकानामालयानां नामकीर्तनं सामान्यलक्षणञ्च। प्राकारस्वरूपादिवर्णनम्। मूलादिबिम्बस्थापनस्य महानसादिकल्पनस्य च स्थाननिर्देशः।

चतुर्थेऽध्याये प्रतिमानिर्माणावसरे उपयोगार्हविविधमानलक्षणनिर्देशः। प्रतिमाभेदाः। विविधदेवप्रतिमानां तत्तदङ्गपरिमाणादिवर्णनम् देवीप्रतिमाकल्पने वैशिष्ट्यं कर्मबिम्बमानादिवर्णनं पीठकल्पनप्रकारनिरूपणञ्च।

पञ्चमेऽध्याये—भगवतः प्रतिष्ठाक्रमे आवश्यकानां संभाराणां विवरणम्। यागशालाकुण्डस्रुक्स्रुवद्वारतोरणादीनां निर्माणप्रकारश्च।

षष्ठेऽध्याये—प्रतिष्ठायां ग्राह्यकालस्याधिकारिणः आचार्यस्य ऋत्विजश्च वर्णनम्। बिम्बनेत्रोन्मीलनं मृत्संग्रहणं भूमिस्तुतिः अङ्कुरार्पणविधिवर्णनञ्च।

सप्तमेऽध्याये—वास्तुपूजाप्रकारः प्रमाणकृतदोषशान्तिनिर्देशः। घृतस्नानम् जलाधिवासप्रकारश्च।

अष्टमेऽध्याये—यागमण्डपालङ्करणं नेत्रोन्मीलनप्रकारः प्रतिसरबन्धविधिः स्नपनार्थं तत्तत्कलशस्थापनस्थाननिर्देशः, भगवतः शयनाधिवासः, कुंभादिस्थापनप्रकारश्च।

नवमेऽध्याये—कुंभे भगवदाराधनविधिवर्णनं तदङ्गभूतहोमविधिः अक्षरन्यासशक्तिन्यासबलसमर्पणादि प्रतिष्ठाङ्गविषयवर्णनञ्च।

दशमेऽध्याये—गर्भगृहे प्रतिमाधारपीठस्थापनक्रमः रत्नन्यासः अष्टबन्धनप्रयोगः बिम्बेषु तत्तद्देवतावाहनं शक्तिनिर्देशः दक्षिणाविध्यादिप्रतिष्ठाङ्गविषयाश्च।

एकादशेऽध्याये—महोत्सवकालः ध्वजारोहणाङ्गगरुडार्चनादिप्रकारः ध्वजारोहणं भेरीताडनदेवताह्वानप्रकारश्च।

द्वादशेऽध्याये—उत्सवाङ्गाङ्कुरार्पणक्रमवर्णनं यागमण्डपादिकल्पनविधिः देवताराधनं होमप्रकारः बलिदानक्रमः वीथिभ्रमणादिविधिः दैनन्दिनोत्सवक्रमः मङ्गलोत्सवमृगयोत्सवतीर्थोत्सवविधिः ध्वजावरोहणं देवानामुद्वासनं च।

त्रयोदशेऽध्याये—मण्डलकल्पनप्रकारः तत्र भगवदाराधनम् मण्डलार्चनाङ्गहोमक्रमः देवतोद्वासनं फलश्रुतिश्च।

चतुर्दशेऽध्याये—विवाहोत्सवफलं तदङ्गभूताङ्कुरार्पणप्रकारः विवाहोत्सवविधिः तदङ्गभूतहोमादिक्रमनिरूपणञ्च।

पञ्चदशेऽध्याये—विविधप्रतिष्ठासम्बद्धसामान्यविषयाः वाहनविमानमण्डपबलिपीठध्वजवेदिपादुकाघण्टामहानसद्वारदेवतावापीकूपाक्षमालाधूपचण्डादीनां च प्रतिष्ठाक्रमः भक्तबिम्बरथयानप्रतिष्ठाप्रकारश्च।

षोडशेऽध्याये—देवालये आराधकेन सम्पाद्यमानभूतशुद्धिमानसयागयोगपीठकल्पनपूर्वकनित्यार्चनक्रमवर्णनम् नित्यार्चनाङ्गभूतहोमनैवेद्यादिकल्पनविधिनिर्देशश्च।

सप्तदशेऽध्याये—होमसम्पादनार्थं कुण्डकल्पनवह्निध्यानादिनिर्देशः। अग्नेः सप्तजिह्वानां वर्णनम् अग्निभेदाः तेषामुपयोगश्च। समिधः प्रमाणादयः। होमद्रव्याणि अग्नौ हरेः आराधनं पूर्णाहुतिविधिश्च।

अष्टादशेऽध्याये—बलिक्रमे तत्तद्देवानां स्वरतालादिनिर्देशपूर्वकमुत्सवभ्रमणावसरे बलिप्रदानविधिः।

एकोनविंशेऽध्याये—जीर्णदेवालयप्रतिमयोः उद्धारे सामान्याः विषयाः। बालालयबालबिम्बकल्पनप्रकारः। बालबिम्बप्रतिष्ठाराधनविधिः। जीर्णबिम्बप्रक्षेपप्रकारः पुनः प्रतिष्ठाक्रमश्च।

विंशेऽध्याये—स्नपनभेदाः स्नपनपीठे पदकल्पनं तत्र स्नपनद्रव्यस्थापनक्रमनिर्देशश्च। स्नपनद्रव्यविवरणम्। प्रतिसरबन्धः स्नपनकलशस्थापनं तत्र तत्तद्देवाह्वानार्चनक्रमः। ब्राह्मवैष्णवपुण्यवासुदेवपारमेष्ठ्यप्राजापत्यकौबेरकल्याणापराजितस्नपनानि तेषां फलश्रुतिश्च।

एकविंशेऽध्याये—पवित्रारोपणोद्देश्यम्, कालनिर्देशः, पवित्रनिर्माणप्रकारः पवित्रनामानि, पवित्राधिवासप्रकारः, चतुस्स्थानार्चनम्, विविधपवित्रारोपणप्रकारः, होमक्रमः फलश्रुतिश्च।

द्वाविंशेऽध्याये—अर्चनक्रमे जायमानदोषनिवारकाणि प्रायश्चित्तानि। बिम्बदोषादौ प्रायश्चित्तानि, अस्पृश्यस्पर्शादौ बिम्बादिपतने च प्रायश्चित्तानि। विविधविघ्ने प्रायश्चित्तानि। पाञ्चरात्रशास्त्रभेदाः सांकर्यनिषेधश्च।

त्रयोविंशेऽध्याये—प्रायश्चित्तेषु सामान्यकृत्यम्, संप्रोक्षणावसरः विधिश्च।

चतुर्विंशेऽध्याये—अष्टाक्षरमन्त्राधिकारिणः। शुद्धमिश्रयोः सामान्यभेदाः। शुद्धवैष्णवलक्षणम्, दीक्षाभेदः स्वरूपञ्च अष्टाक्षरमन्त्रोद्धारक्रमः, तस्य ऋष्यादिः मन्त्रजपे ध्यानप्रकारश्च। मन्त्रोपयोगः फलश्रुतिश्च।

पञ्चविंशेऽध्याये—पञ्चकालविभागः। अभिगमनादिकालानां संक्षिप्तं स्वरूपम्। योगप्रक्रियावर्णनम्। पाञ्चरात्रशास्त्रग्रहणेऽधिकारिणः। शास्त्राध्ययनफलश्रुतिः ग्रन्थोपसंहारश्च।

भार्गवतन्त्रस्य वैशिष्ट्यम्

इत्थमुपरिनिर्दिष्टक्रमेण तन्त्रेऽस्मिन् मुख्याः पाञ्चरात्रागमविषयाः विविक्ततया प्रतिपादिताः दृश्यन्ते। सामान्यतः एकैकस्मिन् अध्याये प्रायः एकैकः विषयः वर्णितः। ग्रन्थस्य प्रारंभे उपोद्घातात्मकः आवश्यकः हर्यर्चनातन्त्रप्राप्तिविषयः तस्य प्रयोजनं तदर्थमपेक्षितालयकल्पनादिवास्तुशास्त्रीयः ततः परं वर्णनप्राप्ता-

वसरः प्रतिमाकल्पनप्रतिष्ठाक्रमश्चात्युपयुक्तेन व्यवस्थितरूपेण च वर्णितः । विषय-वर्णनव्यवस्थापने सर्वत्रौचित्यनिर्वाहः कृतः । यस्य विषयस्य यत्र युक्तियुक्तं वर्णन-स्थानं भवेत् तस्य तत्रैव सन्निवेश इत्येतन्महत्त्वपूर्णं वैशिष्टचमस्य ग्रन्थस्य । यद्यपि प्राधान्येन क्रियाविषयप्रतिपादकेऽस्मिन् तन्त्रे दर्शनसम्बद्धतात्त्विकविषयाणामधिकं विवेचनं नावलोक्यते तथापि तत्त्वहोमादिकेषु केषुचिदवसरेषु तत्त्वानां संहृतिक्रमे पृथिव्यप्वह्निमरुदाकाशमनोतन्मात्राहंकृतिबुद्धिप्रकृतिजीवेति तात्त्विकपदार्थाः सन्ति वर्णिताः[1] । अयं विषयः अन्यत्र पाञ्चरात्रग्रन्थेषु एतदपेक्षया विस्तृततया वर्णितः अत्र तु न तथेत्येवात्र मौलिको भेदः । भार्गवतन्त्रे मन्त्रागमतन्त्रान्तरभेदैः चत्वारः पाञ्चरात्रशास्त्रभेदाः स्वीकृताः । तत्र तावत् परिवारयुतं तद्रहितं वा एक-मूर्त्यर्चनपरं पाञ्चरात्रशास्त्रं मन्त्रसिद्धान्तान्तर्गतं, परिवाररहितवासुदेवादि चतुर्व्यूहार्चनपरं शास्त्रम् आगमसिद्धान्तान्तर्गतं, वासुदेवादिभिः नरनारायणाभ्यां च सह विष्णुनरसिंहसूकरेति नवमूर्त्यर्चनविधिप्रतिपादकं शास्त्रं तन्त्रसिद्धान्ता-न्तर्गतं, नृसिंहकपिलक्रोडहंसवागीश्वरादयः द्वित्र्यादिवदनाः परिवारैः सार्धं विनापि वा एकमूर्त्तिश्च यत्र पूज्यत्वेन वर्ण्यंते तत्तन्त्रान्तरपाञ्चरात्रागमान्तर्गतमिति । एतेषां चतुर्णां लक्षणमपि[2] निर्दिष्टम् । इत्थमत्रापि प्रायः ईश्वरपारमेश्वर-संहितावदेव पाञ्चरात्रागमशास्त्रस्यावान्तरभेदाः सन्ति वर्णिताः । तत्र वर्णितः विषयः विस्तृतः अत्र तु न तथा । तन्त्रभेदविषयेऽत्र निर्दिष्टमेकमन्यद्वैशिष्टचं द्रष्टव्यम् । तथाहि—"

वैखानसं पाञ्चरात्रं भार्गवं शैवमित्यपि ।
तन्त्राण्यमूनि चत्वारि प्रशस्तान्यर्चनाविधौ ।।

२२.९४-९५ ।।

इति लिखन् ग्रन्थकारः अर्चनातन्त्रस्यान्यत्र सर्वथानुपलब्धं विलक्षणमेव भेदं प्रदर्शयति । निश्चितमेव विचित्रमेतद्वैशिष्टचमस्य ग्रन्थस्य । शुद्धवैष्णवानां लक्षणभेदादिप्रतिपादनावसरे प्रतिपादितः कश्चिद्विलक्षणः विषयः अस्मिन् ग्रन्थे दृष्टिपथमारोहति । तथाहि—एतत्तन्त्रमनुसृत्य पाञ्चरात्रमार्गे प्रवृत्तानां कृते दीक्षायाः दहनादिद्वाराङ्गविशोधनादेः अङ्गन्यासादेश्चावश्यकत्वं न मन्यते तन्त्राचार्यः[3] । एतस्मादेव कारणात् भाषालालित्यादिदृष्टचा सुसमीचीनमपि एतत्तन्त्रम् अन्यान्यपाञ्चरात्रग्रन्थ इव पाञ्चरात्रिकसमाजे गौरवं नालभत मुद्रणं प्रकाशनं चास्य ग्रन्थस्य नाभूदिति[4] डॉ० स्मीथमहाशयस्य मतम् ।[5] ग्रन्थेऽस्मिन्

———————————

१. भार्गवतन्त्रम्. ९.४८-५०;

२. भार्गवतत्रम्. २२.८८-९३;

३. भार्गवतन्त्रम्-२४.२५;

४. Pancharatra catalogues.

५. (i) पाद्म संहिता १. १०६

विषयविवरणसंक्षेपकारणात् स्पष्टतायाः तत्र तत्र अभावोऽनुभूते। यथा तृतीयाध्याये-अङ्गणे पीठिकास्थाने कुमुदादीनां स्थाननिर्देशक्रमः ग्रन्थपठनेन न सम्यक् स्फुटीभवति। तथैवान्यत्र केचन विषयाः अतीव संक्षेपतः वर्णिताः वर्तन्ते।

पाञ्चरात्रग्रन्थेषु निर्दिष्टपाञ्चरात्रागमग्रन्थसूचिषु अनेकत्रोल्लिखितत्त्वात् भार्गवतन्त्रस्य प्राचीनत्वविषये न संशयः। तत्र तावत् पञ्चसु पाञ्चरात्रग्रन्थेषु[1] भार्गवतन्त्रस्योल्लेखः दृष्टचरो भवति। यद्यपि भार्गवतन्त्रस्योपलब्धकोशत्रयमाधृत्य अस्य ग्रन्थस्य कालविषयकं न किमपि आन्तरिकं बाह्यं वा प्रमाणमुपलभामहे तथापि श्रेडरमहाशयस्य मतानुसारम् अष्टमशताब्दात् पूर्वं निर्मिते पाद्मतन्त्रे[2] भार्गवतन्त्रस्योल्लेखमवलोक्य तदपेक्षया भार्गवतन्त्रस्य प्राचीनत्वमनुमीयते। इत्थं निश्चितकालनिर्धारणे आन्तरिकसाक्ष्यस्य अभावे सत्यपि बाह्यसाक्ष्यमनुसृत्य अस्य तन्त्रस्याष्टमशताब्दात् पूर्वकालकल्पितत्वसाधने न दोषं पश्यामः।

मद्रासराजकीयप्राच्यमातृकागारे स्थितं 'भार्गवतन्त्रप्रयोग' ग्रन्थमाधृत्य भार्गवतन्त्रं प्रति लोके आराधकानां समादरबुद्धिरासीदिति सुकरतयैवानुमातुं शक्यम्। वस्तुतः अङ्गुलगण्यान् एव पाञ्चरात्रशास्त्रग्रन्थान् अवलम्ब्य प्रयोगात्मकाः ग्रन्थाः सन्ति कल्पिताः। तेष्वन्यतमोऽयं भार्गवतन्त्रग्रन्थ इति निश्चितमेवास्य ग्रन्थस्य वैशिष्ट्यं बोधयति। प्रयोगे निर्दिष्टसंक्षिप्तविषयसूच्यन्तर्भाविताः विषयास्तावत् "**प्रतिष्ठाप्रयोगः पाणिग्रहणप्रयोगः, नित्याराधनप्रयोगश्चेति**"। ग्रन्थारंभस्तु—"**अथ श्री भार्गवतन्त्रस्य प्रतिष्ठाप्रयोगः समारभ्यते ज्ञानानन्दमयं .... हयग्रीवमुपास्महे**"। ग्रन्थस्य समाप्तिपुष्पिका तावत्— "**इति श्री भार्गवतन्त्रप्रयोगः समाप्तः**" इति। इत्थम् प्रयोगग्रन्थस्य प्रारंभं समाप्तिं च दृष्ट्वा अस्यैव भार्गवतन्त्रस्य प्रयोगात्मकः सः प्रयोगग्रन्थ इत्यत्र नास्ति शंकालेशस्यावसरः।

भार्गवतन्त्रस्य भाषा

भार्गवतन्त्रस्य भाषा सामान्यतः समीचीना भावाभिव्यक्तौ सर्वत्र समर्था तत्र-तत्र सुमनोहरा हृदयावर्जिका च। भावाभिव्यक्तौ समर्थायामपि भार्गवतन्त्रीयभाषायां सन्ति केचन अपाणिनीयाः विचित्राश्च प्रयोगाः। भाषायामपाणिनीयत्वं वैचित्र्यं च न केवलमत्रैव ग्रन्थेऽपि तु प्रायः सर्वत्र पाञ्चरात्रागमिकग्रन्थेषु दृष्टि-

---

(ii) पुरुषोत्तम संहिता १.

(iii) मार्कण्डेय संहिता. १.५४

(iv) विश्वामित्र सं० २.

(v) विष्णु तन्त्रम्. १.;

पथमारोहति । प्रसङ्गेऽस्मिन् स्थालीपुलाकन्यायेन सन्ति केचन प्रयोगाः द्रष्टव्याः । तथाहि—

१. सुवन्तप्रयोगे अपाणिनीयं रूपम्—'तिथ्यः' अ० ६. श्लो० २२; 'सर्वात्' २५.३०;
२. कृत्प्रत्ययनियमोल्लङ्घनम्—'स्थाप्य' ३.४३-४४;
३ लिङ्गव्यत्यासः—'स्थानाः' ३.३६; 'भेदानि' ४.१;
४. विशेष्यविशेषणयोः परस्परं लिङ्गव्यत्यासः—'सैकमेखलम्' ५.१६;
५. कारकप्रयोगे वैचित्र्यम्—'आर्द्रां तु बन्धुनाशः स्यात् १७.३६;

संस्करणे आधारभूताः मातृकाः सम्पादनक्रमश्च

अस्य भार्गवतन्त्रसंस्करणस्य सम्पादने आधारतया तिस्रो मातृकाः सन्ति स्वीकृताः । तिस्रः अपि मातृकाः पूर्णाः । परन्तु सम्पादनावसरे प्रतिकृतिरूपाः (Transcription) एव समुपलब्धाः । तासां सङ्केतप्रदर्शनपूर्वकं विवरणं तु अधोलिखितम्—

१. A सङ्केतसंकेतितः अड्यारगवेषणाकेन्द्रस्थायाः (Adyar Rsaerch center) No—43042 मातृकायाः प्रतिलेखः (Transcription) पूर्णः पाठश्च समीचीनः ।

२. M. सङ्केतनिर्दिष्टः मद्रासराजकीयप्राच्यमातृकागारस्थायाः (Madras Gevt. oriantal Mss Library) R. 1733 (a) ग्रन्थाक्षरे 143 पुटात्मकमातृकायाः प्रतिलेखः, पूर्णः शुद्धः समीचीनश्च पाठः, $110\frac{3}{8}\times 9\frac{1}{2}$ इंच परिमितं मानम् । प्रतिपृष्ठं २० पंक्तयः ।

३. T. सङ्केतेन निर्दिष्टः तिरुपतिनगरे सम्पादकेनोपलब्धः प्रतिलेखः । पूर्णः पाठश्च सामान्यतः शुद्धः समीचीनश्च । मूलमज्ञातम् ।

प्रतिलेखेषु न किमप्यान्तरिकं बाह्यं वा तादृशं दृढं प्रमाणमुपलभामहे यदाश्रित्य यस्य कस्यापि कोशस्य मूलकोशत्वं कल्पितं भवेत् । अथापि M. T. कोशयोः परस्परं पाठसाम्यादिकमवलोक्य उभयोः कश्चित् संबन्धः भवेदिति अनुभूयते । तत्र T. कोशः कदाचित् M. कोशस्य प्रतिलेख इति सूक्ष्मेक्षिकया उभयोः पाठपर्यालोचनेनानुमीयते । A. कोशस्थः पाठः सर्वापेक्षया शुद्धः समीचीनश्चेति कारणात् अत्र संस्करणे A. कोश एव मूलकोशत्वेन स्वीकृतः । परन्तु अन्यत्र कोशद्वयोः उपलब्धः समीचीनतरः पाठः न सर्वथोपेक्षितः । तत्र तत्र तुलनात्मकदृष्टचा त्रयाणामपि कोशानां पाठं समालोच्य प्रकरणानुगुणं समीचीनतमः पाठः मूले स्वीकृतः । पाठान्तरप्रदर्शनक्रमे कोशेषूपलब्धानां सर्वथाऽपरिवर्तितरूपग्रहणे सर्वत्र श्रद्धाप्रदर्शिता । पाठकानां सौकर्येण पाठावबोधाय प्रतिपादितविषय-

प्रकृत्यनुरूपं यथास्थानं शीर्षकाणि निवेशितानि । पाठान्तरप्रदर्शने सौलभ्यं विधातुं श्लोकस्थाः प्रथमादिपादाः a: b: c: d: इत्यनेन रूपेण क्रमशः चतुर्धा विभज्य निर्दिष्टाः । पाञ्चरात्रशास्त्रीयगवेषणकर्मणि कृतादराणाम् सौकर्याय ग्रन्थान्ते कानिचन परिशिष्टानि निवेश्य श्लोकानां प्रथमपादस्याकाराद्यनुक्रमणिका संयोजिता । यान्त्रिकासौविध्यकारणात् मुद्रणक्रमे केषांचित् स्वरवर्णानां संयुक्ताक्षराणां च समायोजने दृष्टचराः दोषाः प्रयत्नानन्तरपि अपरिहार्याः अभूवन् । मुद्रणादौ जातान् दोषान् परिहर्तुं शुद्धिपत्रे प्रयत्नः विहितः ।

कृतज्ञताज्ञापनम्

सर्वविधसौविध्यं प्रकल्प्य अस्य ग्रन्थस्य हृदयावर्जकप्रकाशनं कृतवद्भ्यः उदारहृदयेभ्यः विद्यापीठीयप्राचार्येभ्यः श्रीमद्भ्यः डाक्टर गयाचरण त्रिपाठिवर्येभ्यः सादरं कार्तज्ञ्यं समर्प्यते । एतादृशसारस्वतानुष्ठानवेलायां सुरभारतीसमाराधने मम प्रवर्तकानां पूज्यपितृचरणानां श्रीमतां पण्डितरामजीवन चौधरीशर्मणां, भारतीयसंस्कृतेः वास्तुशास्त्रस्य मूर्तिकलायाश्चाकररूपे संस्कृतक्षेत्रे समुपेक्षिते पाञ्चरात्रागमक्षेत्रे कार्यं कर्तुं अस्मत् प्रवर्तकानां श्रद्धेयगुरुवर्याणां डॉ० बी० आर० शर्ममहाशयानां च चरणेषु प्रणामाञ्जलयः समर्प्यन्ते । सम्पादनक्रमे उपकृतवद्भ्यः विद्यापीठेऽस्मिन् प्रवाचकपदमलङ्कुर्वद्भ्यः सुहृद्वर्येभ्यः डॉ० किशोरनाथ झा महाशयेभ्यः व्याख्यातृपदमारूढेभ्यः डॉ० जगन्नाथपाठकमहोदयेभ्यः डॉ० गोपराजू राम महानुभावेभ्यश्च हार्दिकान् धन्यवादान् वितरामि । ग्रन्थमातृकोपलब्ध्यादौ सर्वदा सोत्साहमुपकृतवन्तः विद्यापीठसंग्रहाध्यक्षाः अस्माकं सुहृदः पण्डित श्री जीवेश्वरझाशर्माणः धन्यवादार्हाः सन्तिः । अनुष्ठानेऽस्मिन् उपकारकान् तत्तत्सङ्ग्रहालयान् पुस्तकागारान् प्रत्यपि स्वकीयं धन्यवादं ज्ञापयामि । ग्रन्थस्य मनोरममुद्रणादौ बद्धपरिकराः प्रयागस्थविष्णु आर्ट मुद्रणालयव्यवस्थापका तत्कर्मसम्पादकाश्च सन्ति धन्यवादार्हा इतिशम् ।

गंगा नाथ झा केन्द्रीय संस्कृत विद्यापीठम्.
इलाहाबाद —२
(१६.३.१९८१ ई०)

राघव प्रसाद चौधरी
प्राध्यापकः

विषयानुक्रमणिका

अध्याय—१

[भार्गवतन्त्रस्य प्रयोजनप्रतिपादनाध्यायः]

पृ० १-७

मङ्गलाचरणम् [श्लोक १]—प्रास्ताविकम् [२-१२]—हिमालये अगस्त्यतपश्चर्या आकाशवाणी श्रवणं च [१३-१४]—हरेः आराधनमहत्त्वं मुनेः महेन्द्रगिरिगमनाय निर्देशश्च [१५-१७]—अगस्त्यस्य महेन्द्रगिरिगमनम् [१८-१९]—परशुरामस्य वर्णनम् [२०-२२]—अगस्त्यकृता परशुरामस्तुतिः [२३-४०]—अगस्त्यागमनहेतुकः प्रश्नः अभयप्रदानं च [४१-४५]—अगस्त्येन स्वागमनहेतुनिवेदनम् [४६-५५]—भगवदाराधनतन्त्रश्रवणस्य पाप नाशकत्वम् [५६-६०]—हर्यर्चनातन्त्रविषये अगस्त्योत्थापितजिज्ञासा [६१].

अध्याय—२

[तन्त्रविवरणपूर्वकवासुदेवाराधनफलादिनिरूपणाध्यायः]

पृ० ८-११.

तन्त्रविवरणम् [श्लो० १-६]—शास्त्रविधिना हरेः आराधनफलम् [७-११]—देवालयादिकल्पनस्य तत्तदाराधनादेश्च फलकीर्तनम् [१२-३०]—वासुदेवध्यानस्य सिद्धिप्रदातृत्वम् [३१].

अध्याय—३

[देवालयकल्पनप्रयोजनस्थानादिनिरूपणाध्यायः]

पृ० १२-१७.

—भगवदालयकल्पनविषयकजिज्ञासा [श्लो० १]—भगवदालयनिर्माणस्य प्रयोजनद्वयम् [२-३]—भगवदालयकल्पनयोग्यस्थाननिर्देशः [४-१८]—विंशतिसंख्याकानामालयानां परिगणम् [१९-२१]—देवालयस्य सामान्यं लक्षणम् [२१-२२]—आलयकल्पनक्रमे अर्धमण्डपाद्यायामादिः [२३-२७]—मूलबिम्बादिस्थापनस्थाननिर्देशः [२७-२८]—द्वारपालस्थाननिर्देशः [२८-३१]—परिवारदेवस्थाननिर्देशः [३१-४२]—आलये द्वितीयावरणस्थपरिवारदेवानां स्थानानि [४२-४८]—आलये महानसादिस्थाननिर्देशः [४९-५०]—त्रिविधं वैष्णवविमानम् [५१.].

अध्याय—४

[प्रतिमाङ्गमानादिनिरूपणाध्यायः]

पृ० १८-२९.

—प्रतिमानिर्माणविषये सामान्यजिज्ञासा [१]—रेण्वादिमानविशेषाणां लक्षणम् [२-६]—उपादानद्रव्यभेदानुसारं सप्तविधानि बिम्बानि [७]—बिम्बोत्सेधविषये उत्तमः पक्षः [८-९]—प्रतिमायाः तत्तदङ्गमाननिर्देशः [१०-१६]—बिम्बोत्सेधविषये मध्यमः पक्षः [१७-१९]—बिम्बोत्सेधविषये अधमः पक्षः तत्तदङ्गविस्तारादिकं च [१९-८२]—प्रतिमायाः आभूषणानां विवरणम् [८३-८८]—भगवतः प्रतिमायाः आसीनादिस्वरूपविवेकः [८८-८९]—प्रतिमायाः स्थापनस्थानविवेकः [८९-९०]—देवीप्रतिमास्थापनस्थाननिर्देशः [९१-९२]—देव्याः संख्याविचारः [९३]—देवीनां मूर्तिकल्पने विशेषः [९४-९८]—देवीप्रतिमायाः आभूषणादिनिर्देशः [९९-१०२]—उत्सवादिप्रतिमोत्सेधादिविवरणम् [१०२-१०४]—अङ्गबिम्बकल्पनविचारः [१०४-१११]—पीठकल्पनप्रकारः [१११-११९]—विमाने कीलकल्पनाद्यवसरः [११९-१२०].

अध्याय—५

[प्रतिष्ठाङ्गसंभारविवरणाध्यायः]

पृ० ३०-३४.

—प्रतिष्ठाक्रमे मण्डपादीनां कल्पनादिविषये जिज्ञासा [१]—मण्डपकुण्डस्वरूपादिनिर्देशः [२-११]—कुण्डमेखलाकल्पनप्रकारः [१२-१४]—कुण्डेयोनिकल्पनप्रकारः [१४-१६]—प्रपादिकल्पनक्रमनिर्देशः [१७-१९]—स्रुक्स्रुवोः कल्पनप्रकारः [१९-२१]—तोरणस्नानपीठादिकल्पनक्रमः [२२-२४]—पादुकादिसंभाराणां विवरणम् [२५-४५].

अध्याय—६

[प्रतिष्ठाविषयविवेचनाध्यायः]

पृ० ३५-४१.

प्रतिष्ठाविषयकजिज्ञासोपस्थापनम् [१-२]—प्रतिष्ठाक्रमे यजमानलक्षणम् [३-६]—प्रतिष्ठाक्रमे आचार्यस्य लक्षणम् [७-९]—प्रतिष्ठासम्पादनार्थमृत्विगादिविचारः [१०-११]—आचार्यवरणक्रमे निषिद्धाः [१२-१३]—आचार्यवरणक्रमः [१४-१५]—प्रतिष्ठाक्रमे ग्राह्याग्राह्यकालविवेकः [१६-२७]—अङ्कुरमृत्संग्रहणात् पूर्वं सम्पादनीयानि

कृत्यानि [२८-३५]—अंकुरार्थं मृत्संग्रहक्रमः [३६-४४]—मृत्सङ्ग्रहक्रमे भूस्तुतिः [४५-५०]—मृत्सङ्ग्रहमन्त्रनिर्देशः [५०-५१]—मृदानयनं गुर्वादिसम्मानन च [५१-५५]—पालिकास्थापनमङ्कुरधान्यसंस्कारः तत्तद्देवताराधनञ्च [५६-५८]—होमप्रकारः [६८-७०]—बीजावापरक्षणादिप्रकारः [७०-७४].

अध्याय ७

[वास्तुपूजाबिम्बिजलाधिवासविवरणाध्यायः]

पृ० ४२-४५.

—वास्तुपूजायाः प्रयोजननिर्देशः [१-२]—वास्तुपूजाप्रकारः [३-७]—वास्तुपूजाङ्ग-होमः वास्तुशेषरित्यागादिकञ्च [८-१३]—मानादिप्रयुक्तदोषशान्तिप्रकारः [१४-१९]—बिम्बाधिवासक्रमे घृतस्नानप्रकारः [२०-२५]—जलाधिवासप्रकारः [२५-४३].

अध्याय – ८

[प्रतिष्ठाङ्गभूतप्रतिमानेत्रोन्मीलनादिनिरूपणाध्यायः]

पृ० ४६-५१.

—यागमण्डपालङ्करणप्रकारः [१-५]—अधिवासितबिम्बोत्थापनं यागमण्डपा-नयनञ्च [६-११]—प्रतिमानयनोन्मीलनक्रमः [११-२१]—प्रतिसरबन्धनावसरनिर्देशः [२१-२२]—प्रतिसरपरिकल्पनम् [२३-२४]—कौतुकसंस्कारः कौतुकबन्धनप्रकारश्च [२४-३२]—स्नपनकुंभानां स्थापनक्रमः [३३-३७]—होमाभिषेचनक्रमः [३८-३९]—बिम्बाधिवासनप्रकारः [४०-४३]—कुंभस्थापनप्रकारः [४४-५५].

अध्याय—९

[प्रतिष्ठाङ्गकुंभार्चनादिविधिनिरूपणाध्यायः]

पृ० ५२-६१

—कुंभतोरणाद्याराध्यदेवताविवेकः [१-१२]—तत्तद्वेदपारायणस्थाननिर्देशः [१२-१३]—कुंभे भगवदर्चनं होमप्रकारश्च [१३-२०]—भगवतः वासुदेवस्य ध्यान-प्रकारः [२१-३५[—तत्तद्देवानां होमक्रमनिर्देशः [३६-४०]—होमक्रमे समिधादि-विवेकः [४१-४६]—तत्त्वहोमविधिः [४७-५२]—मकाराद्यक्षरतत्त्वानां प्रतिमाङ्गेषु न्यासक्रमः [५३-६६]—प्रतिमायां शक्तिनिवेशप्रकारः [६६-७२]—चण्डादिपरिवारा णाम् अधिवासनादिविधिः [७३-७७]—एकबेरबहुबेरप्रतिष्ठाविधौ विशेषः [७७-८०]—बलिसमर्पणविधिः [८०-९२]—प्रतिष्ठास्थानात् गन्तुं बलिदेवप्राथनाक्रमः [९३-

९५]—पिण्डिकाद्यधिवासः तदङ्गभूतहोमश्च [९६-९७]—प्रतिसरबन्धः पूर्णाहुतिक्रमः मङ्गलसूचकलक्षणानि च [९८-१००]—रात्रियापनक्रमः [१०१].

अध्याय—१०

[प्रतिष्ठाक्रमे प्रतिमापीठस्थापनादिनिरूपणाध्यायः]

पृ० ६२-६९.

—गर्भगृहे भगवदानयनम् अधारशिलास्थापनञ्च [१-३]—आधारपीठगर्ते बीजरत्नन्यासक्रमः [४-९]—पिण्डिकायां लक्ष्म्याः आवाहनमर्चनं च [१०]—बिम्बार्थं पीठार्थं रत्नन्यासार्थञ्च स्वीकार्याः शिलाः [११]—गर्भगृहे पिण्डिकायुक्तबिम्बस्य निवेशः तत्स्थापनञ्च [१२-१८]—पिण्डिकाप्रतिमयोः संयोजनम् अष्टबन्धकल्पनप्रकारश्च [१९-२१]—मूलबिम्बे परिवारदेवताबिम्बेषु च भगवतः आवाहनम् [२२-३१]—बहुबेरप्रतिष्ठाविधौ ध्रुवादिबिम्बानां स्थाननिर्देशः [३२-३४]—प्रतिष्ठाङ्गभूतकर्मसम्पादनस्थाननिर्देशः [३५-३६]—प्रतिष्ठाक्रमे कुंभन्यासविधिः [३७-३८]—मूलबिम्बे शक्तिनिवेशप्रकारः [३८-४३]—कर्मबिम्बादिषु शक्त्यावाहनक्रमः [४४-४७]—गुर्वादिभ्यो दक्षिणादानादिनिर्देशः [४७-५५]—दक्षिणारहितयागस्य फलराहित्यकथनम् [५६]—प्रतिष्ठाकर्मणः समाप्तौ देशिकस्य गृहानयनम् [५७-५८]—प्रतिष्ठासम्पादकस्य सहायकानां च कृते फलकीर्तनम् [५९-६७]—यागदर्शनमाहात्म्यम् [६७-६८]—प्रतिष्ठान्ते भगवतः स्नपनस्य महोत्सवस्य च निदेशः [६८-६९].

अध्याय—११

[महोत्सवाङ्गध्वजारोहणादिनिरूपणाध्यायः]

पृ० ६९-७४.

—महोत्सवविधिनिरूपणार्थं प्रार्थना [१]—महोत्सवमाहात्म्यम् महोत्सवदिनावधिश्च [२-४]—ध्वजपटे गरुडस्य स्वरूपं तदक्षिमोचनं च [४-८]—गरुडस्य कुंभादीनां च अधिवासनम् [९-१२]—गरुडाधिवासनाङ्गहोमक्रमः [१३-१४]—गरुडावाहनार्चनप्रकारः [१४-२१]—उत्सवाङ्गध्वजारोहणविधिः [२२-३६]—ध्वजारोहणाङ्गब्राह्मणसम्माननम् [३६]—उत्सवप्रतिमापूजनक्रमः [३७]—भेरीताडनदेवताह्वानप्रकारः [३८-५१]—प्रत्याह्वानक्रमः [५२]—उत्सवक्रमे देवताह्वानाङ्ग बलिनिवेदनम् [५३-५५].

अध्याय—१२

[उत्सवविधिनिरूपणाध्यायः]

पृ० ७५-८६.

उत्सवाङ्गभूताङ्कुरार्पणकालः [१]—उत्सवक्रमे प्राकारादीनां शोधनं भूषणं च [२-३]—यागमण्डपवेदिकुण्डकल्पनप्रकारः [४-८]—उत्सवार्थमाचार्यादिवरणादिकम् [८-९]—उत्सवार्थं देवाधिवासप्रकारः [१०-१३]—अधिवासानन्तरं मण्डपे देवस्य स्नपनमर्चनञ्च [१४-१९]—उत्सवक्रमे प्रतिसरबन्धप्रकारः [१९-२२]—कुंभन्यासः तत्र तत्तद्देवानामर्चनक्रमश्च [२२-२६]—यागमण्डपे वेदपारायणादिक्रमः [२७-२८]—यागमण्डपे तत्तद्धोमकुण्डे तत्तद्देवोद्देश्यकहोमक्रमः [२८-४९]—उत्सवक्रमे बलिदानप्रकारः [४०-४५]—उत्सवप्रसङ्गे वीथिकासु भगवतः परिक्रमणप्रकारः [४६-५४]—वीथिपरिक्रमणानन्तरं मन्दिरे भगवत आराधनम् [५४-५७]—भगवतः दैनन्दिनोत्सवक्रमः [५८-६१]—भगवतः मङ्गलोत्सवक्रमः [६२-७३]—मङ्गलोत्सवक्रमे जलद्रोण्यां भगवतः स्नपनप्रकारः [७४-८८]—भगवतः मृगयोत्सवविधिः [८८-९३]—तीर्थयात्रार्थमनुज्ञाप्रार्थनं प्रतिसरबन्धनं च [९४-९७]—तीर्थयात्राक्रमे भगवतः अभिषेकक्रमः [९७-१०१]—तीर्थं प्रति भगवतः आनयनं तत्र स्नानफलकीर्तनम् [१०७-१०८]—तीर्थस्नपनानन्तरं भगवतः अर्चनमानयनं च [१०८-१०९]—उत्सवक्रमे ब्राह्मणभोजनविधानम् [१०९-११०]—उत्सवान्तस्नपनं हविर्निवेदनं तत्तद्धोमप्रकारः अग्निविसर्जनं च [११०-११३]—गरुडाराधनं तदुद्वासनं ध्वजावरोहणं च [११३-११५]—आवाहितदेवोद्वासनम् [११५-११६]—आलये तत्तत्स्थाने उत्सवादिबिम्बानां निवेशः आराधकगमनं च [११७-११८].

अध्याय—१३

[मण्डलकल्पनपूर्वकपुष्पयागविधिनिरूपणाध्यायः]

पृ० ८७-९२.

—मण्डलकल्पनात्पूर्वं भगवतः आराधनम् [१-२]—मण्डलवेदिकाकल्पनप्रकारः [-३ ४]—मण्डलकल्पनार्थं सूत्रपातविधिः [१५]—कर्णिकादिपञ्चक्षेत्रविभागक्रमः [६-८]—मण्डलद्वारक्षेत्रकल्पनप्रकारः [८-९]—मण्डले द्वादशाब्जनिर्माणस्थाननिर्देशः [१०]—मण्डलकोणेषु पाञ्चजन्यकल्पननिर्देशः [११]—कर्णिकाक्षेत्रे द्वादशबिन्दुकल्पननिर्देशः [१२]—मण्डलेऽब्जस्य केसरादिपदनिर्माणप्रकारः [१३-१४]—मण्डलेऽरकल्पनप्रकारः [१५-१६]—मण्डले वर्णकल्पनार्थमुपादानद्रव्याणि [१७-१८]—अब्जकर्णिकादीनां वर्णकल्पनम् [१९-२५]—चक्रमण्डलस्य वर्णकल्पनप्रकारः [२५-२६]—मण्डले भगवतः आराधनम् अनुज्ञायाचनं च [२६-३१]—मण्डले तत्तद्देवानाम् आराधनस्थानविधिनिर्देशः

[३१-४१]—मण्डले भगवतः पुष्पार्चनविधिः [४२-४४]—मण्डलार्चनक्रमे होमविधिः [४४-४५]—मण्डलस्थदेवोद्वासनादिक्रमः [४६-४८]—महोत्सवान्ते गुरोः सम्माननम् [४९-५०]—महोत्सवफलश्रुतिः [५१-५४].

अध्यय—१४

[विवाहोत्सवनिरूपणाध्यायः]

पृ० ९३-९९.

प्रयोजनं विधिं च वर्णयितुम् अगस्त्यस्य प्रार्थना [१]—उद्वाहोत्सवस्य फलकीर्तनम् [२-४]—विवाहोत्सवक्रमे अङ्कुरार्पणदिनम् [५]—देवस्य देव्याश्च कल्याणमण्डपे आनयनम् [५-७]—अङ्कुरार्पणविधिनिरूपणम् [७-१३]—कौतुकबन्धप्रकारः [१३-१५]—रक्षाविधिः [१६-१७]—शुभिकाबन्धनविधिः पुष्पमालिकाबन्धनविधिश्च [१७-१९]—पाणिग्रहणविधिनिरूपणक्रमे प्रोक्षणप्रकारः [२०-२३]—यज्ञोपवीतकल्पनं पादयोः अक्षतार्पणं च [२४]—मधुपर्कनिवेदनापोशनक्रमः [२५-२७]—गोविसर्जनप्रकारः [२७-२८]—अन्ननिवेदनक्रमः [२९]—भगवते देव्याः दानप्रकारः [३०-४४]—उद्वाहहोमप्रकारः [४५-४८]—लाजाहोमप्रकारः प्रायश्चित्ताहुत्यादिप्रकारश्च [४८-५२]—विवाहोत्सवक्रमे दैनन्दिनकृत्यम् [५२ ५४]—विवाहोत्सवाङ्गचतुर्थदिनकृत्यम् [५४-५७]—पञ्चमदिनकृत्यम् [५८]—देवीनां विवाहविधिः [५९].

अध्याय—१५

[विविधप्रतिष्ठाविधिनिरूपणाध्यायः]

पृ० १००-१०४.

विध्यादिदेवानां विमानादीनां च प्रतिष्ठाक्रमविषयकः प्रश्नः [१-३]—विविधप्रतिष्ठाक्रमे सामान्यविषयाः [४]—स्वतन्त्रपरतन्त्रप्रतिष्ठयोः कुंभसंख्यादिविचारः [५-७]—वाहनादिप्रष्ठिाक्रमे विशेषः [८-१४] विमानमण्डपादीनां प्रतिष्ठाक्रमे विशेषः [१५-१९]—बलिपीठप्रतिष्ठाक्रमे विशेषः [२०-२२]—ध्वजप्रतिष्ठायां विशेषः [२२-२३]—वेद्याः प्रतिष्ठाक्रमे विशेषः [२४]—पादुकायाः घण्टायाश्च प्रतिष्ठाक्रमे विशेषः [२५]—महानसप्रतिष्ठायां विशेषः [२६]—द्वारदेवताप्रतिष्ठायां विशेषः [२७]—वापीकूपादिप्रतिष्ठायां विशेषः [२८-३१]—अक्षमालाप्रतिष्ठाक्रमे विशेषः [३२-३४]—धूपादीनां प्रतिष्ठाक्रमे विशेषः [३५]—चण्डादिदेवानां हेतीनां च प्रतिष्ठाक्रमे विशेषः [३६]—भक्तबिम्बप्रतिष्ठाविधिः [३७-३९]—रथादियानप्रतिष्ठायां विशेषः [३९-४०]—गृहार्चाप्रतिष्ठाक्रमः तत्फलञ्च [४१]—मन्दिरे देवस्थापनफलम् [४२].

अध्याय—१६

[समाराधनविधिनिरूपणाध्यायः]

पृ० १०५-११२.

आराधकस्यालयप्रवेशक्रमः [१]—कवाटोद्घाटनं भगवत्प्रबोधनञ्च [२-१०]—निर्माल्यविनियोगः पात्रप्रक्षालनं च [१०-११]—भूतशुद्धिप्रकारः [१२-२२]—अङ्गेषु वर्णन्यासक्रमः [२३-२५]—मानसयागविधिः [२६-२८]—पूजापात्रादिसन्नाहः [२९-३५]—योगपीठकल्पनप्रकारः [३५-४४]—भगवतः नित्यार्चनविधिः [४५-५५]—नित्यार्चनक्रमे नैवेद्यसमर्पणप्रकारः [५५-५९]—नित्याराधनक्रमे होमादिसम्पादननिर्देशः [६०]—नित्यार्चनप्रसङ्गे नीराजनोद्वासनादिक्रमः [६१-६४]—भगवन्निवेदितान्नविनियोगः [६४-६६]—चण्डादिनिवेदितान्नविनियोगादिः [६६-६८].

अध्याय—१७

[अग्निकार्यनिरूपणाध्यायः]

पृ० ११३—१२०.

होमसम्पादनात्पूर्वं कर्तव्यानि कृत्यानि [१-२६]—होमक्रमे वह्न्यादिध्यानस्वरूपम् [२७-२९]—वह्नेः सप्तजिह्वानां नामस्थानादिविवेकः [२९-३५]—अग्नित्रयलक्षणं तेषामुपयोगश्च [३६-३८]—समिधः प्रमाणं दोषयुक्तसमिधः प्रयोगफलनिर्देशश्च [३८-४१]—कामनानुरूपं समिधां होमद्रव्याणां च विवरणम् [४१-४८]—तत्तद्धोमद्रव्यपरिमाणनिर्देशः [४९-५३]—अग्निकुण्डे हरेः आवाहनमाराधनञ्च [५३-५६]—अग्नौ नित्याराधनविध्यादौ विशेषः [५७-६०]—पूर्णाहुतिसम्पादनविधिः [६०-६७]—पूर्णाहुतिविधिः [६८-७५].

अध्याय—१८

[नित्योत्सवबलिसमर्पणविधिनिरूपणाध्यायः]

पृ० १२१-१२४

अग्निकार्यसम्पादनानन्तरमुत्सवाचरणनिर्देशः [१]—नित्योत्सवक्रमे बलिद्रव्यानयनक्रमः [२-६]—बलिदानक्रमनिर्देशः [७-१०]—तत्तद्देवानां स्वरनृत्ततालादिविवेकः [१०-२३]—उत्सवभ्रमणे बलिदानक्रमः [२३-२७]—द्वारपालादिभ्यः बलिदानादिविधिः [२८-३०]

अध्याय—१९

[जीर्णोद्धारविधिनिरूपणाध्यायः]

पृ० १२५-१२९

—जीर्णोद्धारावसरः [१]—सन्धानानर्हे बिम्बादौ विधिः [२-३]—सन्धानावसरे भगवतः आराधनस्थलम् [४]—अजीर्णधामबिम्बत्यागनिषेधः [५-६]—विमानादिजीर्णोद्धारक्रमे शक्त्याबाहनव्यवस्था [६-८]—बालालयकल्पनविवेकः [९-११]—बालबिम्बकल्पनप्रकारः [१२-१३]—अङ्गवैकल्यशान्त्यर्थं होमक्रमः [१४-१६]—बालबिम्बस्थापनक्रमे आचार्यवरणक्रमः [१७-१८]—बालबिम्बप्रतिष्ठाराधनक्रमः [१९-३१]—जीर्णबिम्बप्रक्षेपप्रकारः [३२-३५]—संस्कारानन्तरं पुनः प्रतिष्ठाक्रमः [३५-३९].

अध्याय—२०

[स्नपनविधिनिरूपणाध्यायः]

पृ० १३०-१४२

स्नपनभेदनिर्देशः [१-२]—ब्राह्मादिस्नपनलक्षणम् [३]—स्नपनपीठकल्पनप्रकारः [४-८]—ब्राह्मपदे स्थापनीयानि स्नपनद्रव्याणि [९]—दैवपदे स्थापनीयानि स्नपनद्रव्याणि [१०-११]—मानुषे पदे स्थाप्यानि स्नपनद्रव्याणि [११-१३]—रत्नोदकद्रव्यपरिगणनम् [१४-१५]—फलोदकद्रव्यपरिगणनम् [१५-१६]—लोहोदकद्रव्याणि [१६-१७]—मार्जनद्रव्याणि [१८-१९]—गन्धोदकद्रव्याणि [१९-२०]—षडक्षतद्रव्याणि [२१]—यवाम्बुद्रव्याणि [२२]—पाद्यद्रव्याणि [२३-२४]—अर्घ्यद्रव्याणि [२४-२५]—आचामभाजने निक्षेप्यद्रव्याणि [२६-२७]—पञ्चगव्यद्रव्याणि [२७-२८]—कषायोदकद्रव्याणि [२८-२९]—शान्तिकुंभमङ्गलोदकद्रव्याणि [३०-३३]—सर्वौषधिजलद्रव्याणि [३४-३५]—सर्वगन्धोदकद्रव्याणि [३५-३८]—मूलौषधिद्रव्याणि [३९-४०]—मकरन्दादिस्नपनद्रव्यपरिमाणम् [४१-४२]—चूर्णकुंभद्रव्याणि ४२]—मृत्तिकोदकद्रव्याणि [४३-४५]—प्रतिसरबन्धः शयनक्रमश्च [४६-४७]—स्नानमण्डपे स्नपनबिम्बादिस्थापनम् [४८-५३]—स्नपनकलशेषु तत्तद्देवानामावाहनादिक्रमः [५४-६४]—अग्निहोममन्त्राणां निर्देशः [६४ ७०]—ब्राह्मस्नपनविधिनिर्देशः [७१-७४]—वैष्णवस्नपनविधिनिर्देशः [७४-७६]—पुण्यस्नपनविधिनिर्देशः [७७-८२]—हरिद्रामृत्तिकास्नपनमंत्रनिर्देशः [८३]—महास्नपनभेदाः [८४]—वासुदेवस्नपनविधिः [८५-८९]—पारमेष्ठ्यस्नपनविधिः [९०-९३]—प्राजापत्यस्नपनविधिः [९४-९८]—कौबेरस्नपनविधिः [९८-१०१]—कल्याणस्नपनप्रकारः [१०२-३]—अपराजितस्नपनस्य ऐन्द्रस्नपनस्य च स्वरूपम् [१०३-१०६]—स्नपनजलस्नानादिफलश्रुतिः [१०६-१०८]—स्नपने पादुकातीर्थादिप्रदानिर्देशः [१०९].

अध्याय--२१

[पवित्रारोपणविधिनिरूपणाध्यायः]

पृ० १४३-१४९

कर्मसु जायमानदोषपरिहारविषयकः प्रश्नः [१-२]—पवित्रारोपणस्य दोषपरिहारोपायत्वम् [३]--पवित्रारोपणार्थं कालनिर्देशः [४-६]—पवित्रोपादानद्रव्यसन्नाहः [७-१०]—पवित्रमानं ग्रन्थिसंख्या च [१०-१२]--दशपवित्राणां नामानि लक्षणञ्च [१३-२०]--परतन्त्रबिम्बानां पवित्रमाननिर्देशः [२०-२१]—पवित्रनिर्माणविधिः [२०-२५]—पवित्रोत्सवसम्पादनार्थमनुज्ञायाचनम् [२६-२९]—पवित्राधिवासनविधिनिर्देशः [३०-४०]—पवित्रोत्सवक्रमे भगवतः चतुःस्थानार्चनम् [४०-४४]—पवित्रारोहणप्रकारः [४४-४६]—पवित्रोत्सवद्वितीयदिनकृत्यम् [४७-४९]—पवित्रोत्सवक्रमे होमविधिः [४९-५४]—मण्डलादीनां पवित्रैः भूषणप्रकारः [५१-५८]—अपराह्णे भगवन्तं प्रति क्षमाप्रार्थनम् [५८-६३]—उत्सवक्रमे दैनन्दिनकृत्यम् महोत्सवदिवसश्च [६३-६५]—पवित्रारोहणे वैकल्पिकमन्त्रः [६५]—पवित्रारोहणफलश्रुतिः [६६].

अध्याय– २२

[विविधप्रायश्चित्तनिरूपणाध्यायः]

पृ० १५१-१६२.

पूजावैकल्यादौ निष्कृतिविषयकः प्रश्नः [१]—अशुद्धदेहेन सम्पादिते अर्चने प्रायश्चित्तम् [२-५]—अशुद्धपादादिसमर्चने प्रायश्चित्तम् [५-६]—श्वसनादिपूर्वकसम्पादिते अर्चने प्रायश्चित्तम् [६-७]—लोमादिस्पर्शनादिपूर्वकभगवदर्चने प्रायश्चित्तम् [७-८]—रजस्वलावस्त्रादिस्पर्शानन्तरं सम्पादिते अर्चने प्रायश्चित्तम् [९-११]—मलमूत्रादिदूषिते बिम्बे भगवदर्चने निष्कृतिः [१२-१३]—दुष्टान्ननिवेदने प्रायश्चित्तम् [१३-१५]—अत्युष्णादिहविर्निवेदने प्रायश्चित्तम् [१६]—शवादिदूषिते ग्रामे प्रायश्चित्तम् [१७]—पूजारंभानन्तरं मरणाशौचे विधिः [१८-१९]--निवेदितस्य अन्यस्मै निवेदिते प्रायश्चित्तम् [२०]—अन्यदेवार्चनप्रयुक्तसाधनोपयोगे प्रायश्चित्तम् [२१-२२]—कृम्यादिदूषितपुष्पाद्युपयोगे प्रायश्चित्तम् [२२-२३]—समर्पितावशेषोपयोगे प्रायश्चित्तम् [२३-२४]—पूजायां पर्युषितोदकोपयोगे प्रायश्चित्तम् [२४-२५]—मलादिदुष्टवस्तुप्रयोगे प्रायश्चित्तम् [२५-२६]—कूपदोषे प्रायश्चित्तम् [२६-२७]—विहितोपचारभङ्गे प्रायश्चित्तम् [२७-२८] पूजावैकल्यादौ प्रायश्चित्तम् [२८-२९]—पूजाकालवैकल्ये प्रायश्चित्तम् [३०-३५]—अशास्त्रीयपूजादौ प्रायश्चित्तम् [३५-३७]—अग्निदोषे प्रायश्चित्तम् [३७-३९]—परिवारार्चननाशादौ प्रायश्चित्तम् [३९-४०]—

बलिद्रव्यबलिबिम्बपतने प्रायश्चित्तम् [४१-४२]—अज्ञातजातिचौरैः स्पृष्टेबिम्बे प्रायश्चित्तम् [४३]—मृण्मयादिबिम्बदोषे प्रायश्चित्तम् [४४]—अस्पृश्यैः स्पृष्टे बिम्बे प्रायश्चित्तम् [४५-४७]—वैश्यादिभिः गर्भगृहप्रवेशे प्रायश्चित्तम् [४८-५१]—शूद्रादिसम्पादिते कर्मणि प्रायश्चित्तम् [५२-५४]—मन्दिरे चण्डालादि-प्रवेशे प्रायश्चित्तम् [५४-५६]—खद्योतस्पर्शादौ प्रायश्चित्तम् [५७-६२]—चण्डालादि-कलशादिस्पर्शे प्रायश्चित्तम् [६२-६५]—स्नपनादौ बिम्बपतने प्रायश्चित्तम् [६६-६६]—चाण्डालादिभिः पालिकादिस्पर्शे प्रायश्चित्तम् [७०]—अङ्कुरे अप्राशस्त्यादौ प्राय-श्चित्तम् [७१-७२]—ग्रामादिरहितमन्दिरे प्रायश्चित्तम् [७२]—महोत्सवे वर्षादिभिः शैथिल्ये प्रायश्चित्तम् [७३-७४]—उत्सवे विघ्ने संजाते प्रायश्चित्तम् [७४-७७]—तीर्थ-यात्राहीने उत्सवे प्रायश्चित्तम् [७८]—उत्सवबिम्बचौर्यादौ विधिः प्रायश्चित्तञ्च [७८-८१]—कर्माधिकृतजने विघ्निते विधिः [८१-८२]—पवित्रादिन्यूनाधिक्ये प्रायश्चित्तम् [८३]—जलाधिवासहीनप्रतिष्ठायां प्रायश्चित्तम् [८४]—क्लेशवासावध्यतिक्रान्ते प्रायश्चित्तम् [७५-८६]—सिद्धान्तानां परस्परसांकर्ये प्रायश्चित्तम् [८७]—मन्त्रसिद्धान्त-स्वरूपम् [८८]—आगमसिद्धान्त स्वरूपम् [८६]—तन्त्रसिद्धान्तस्वरूपम् [६०-६१]—तन्त्रान्तरसिद्धान्तस्वरूम् [६१-६३]—सिद्धान्तादीनां परस्परसांकर्यनिषेधः [६३-६४]—तन्त्रचतुष्टयं सांकर्यदोषः एकत्रैकस्यैव ग्राह्यत्वञ्च [६४-६६]—अज्ञाताधिकारिजीर्ण-मन्दिरादौ प्रायश्चित्तम् [१००]—अज्ञाताधिकारिमन्दिरादौ पूजालोपादौ प्रायश्चित्तम् [१०१-१०२]—तन्त्रान्तरानुसारं भगवतः आराधनावसरः [१०३-१०५]—भगवदा-राधनादौ सिद्धान्तादीनां व्यतिक्रमनिषेधः [१०६-१०७]—गृहार्चाक्रमे पूजालोपे प्राय-श्चित्तम् [१०८-११०]—सालग्रामशिलापूजावैकल्यादौ प्रायश्चित्तम् [१११].

अध्याय—२३

[सम्प्रोक्षणनिरूपणाध्यायः]

पृ० १६३-१६५.

—सर्वत्र प्रायश्चित्तेषु सामान्यकृत्यानि [१-७]—सम्प्रोक्षणावसरः [८-१०]—सम्प्रोक्षणसन्नाहः [१०-१६]—सम्प्रोक्षणाङ्गहोमविधिः प्रोक्षणप्रकारश्च [१६-२०]—ब्राह्मणादिसम्माननं दक्षिणाप्रदानं च [२१].

अध्याय—२४

[अष्टाक्षरमन्त्रनिरूपणाध्यायः]

पृ० १६६-१७१.

—रामस्य माहात्म्यकीर्तनं कार्तज्ञ्यज्ञापनञ्च [१-८]—अष्टाक्षरमंत्राधिकारित्व-विषये जिज्ञासा [८-६]—अष्टाक्षरमन्त्राधिकारिलक्षणम् [१०-१६]—शुद्धमिश्रयोः

सामान्यभेदः [१७-१८]—शुद्धवैष्णवानां लक्षणमाचारश्च [१९-२७]—दीक्षया योग्यतोत्पादनं मुख्यादीक्षा च [२७-३५]—जघन्यायाः दीक्षायाः स्वरूपम् [३६-४०]—अष्टाक्षरमन्त्रोद्धारप्रकारः [४१-४४]—अष्टाक्षरमन्त्रस्य ऋष्यादिनिर्देशः [४५-५०]—अष्टाक्षरमन्त्रजपात् पूर्वं ध्येयं भगवत्स्वरूपम् [५१-५५]—अष्टाक्षरमन्त्रोपयोगः तस्य फलश्रुतिश्च [५५-५८].

अध्याय—२५

[पञ्चकालप्रक्रियानिरूपणाध्यायः]

पृ० १७२-१७६

—वैष्णवानां कृते पञ्चकालपरत्वनिर्देशः [१]—पञ्चकालविभागक्रमः [२-३]—अधिगमनादिविधीनां संक्षिप्तवर्णनम् [३-१०]—योगप्रक्रियानिर्देशः [११-१८]—निद्रास्वीकारप्रकारः [१९-२०]—निद्रास्वीकाराभावे विकल्पः अष्टाक्षरमंत्रजपफलञ्च [२१-२३]—अस्य शास्त्रस्य ग्रहणे अधिकारिणः [२४-२६]—अस्य शास्त्रस्याध्ययन फलश्रुतिः [२६-२९]—पाञ्चरात्रोपदेशानन्तरं रामस्यान्तर्ध्यानित्वम् [२९-३२]—विष्णवाराधनफलकीर्तनं ग्रन्थोपसंहारश्च [३३-३७].

भार्गवतन्त्रम्

प्रथमोऽध्यायः

[भार्गवतन्त्रस्य प्रयोजनप्रतिपादनाध्यायः]

[मङ्गलाचरणम्]

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।१।।

[प्रास्ताविकम्]

अगस्त्यं मुनिशार्दूलं महेन्द्रशिखरे स्थितम् ।
प्रणम्य प्रयताः भूत्वा पप्रच्छुर्मुनिपुंगवाः ।।२।।

मुनयः

भगवन् मुनिशार्दूल सर्वशास्त्रविशारद ।
कथमद्य वयं सर्वे तीर्णास्स्म भवसागरात् ।।३।।

अधीतान्यपि शास्त्राणि समधीता त्रयी पुनः ।
तथापि निर्मलं नैव मनोऽस्माकं मुनीश्वर ।।४।।

कथं वयं समुत्तीर्णा भविष्यामो भवाम्बुधेः ।
उपायमद्य नो ब्रूहि येन यामोऽक्षयं पदम् ।।५।।

A. M. आदौ अधोलिखितां पंक्ति निर्दिशति—
"श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः ।

१. c: A. भूतानाम् For विद्यानाम्
M. कोशे प्रथमश्लोकानन्तरम् अधोलिखितः अधिकः पाठः उपलभ्यते—
"वन्दे लक्ष्मीपतिं देवं शङ्खचक्रगदाधरम् ।
विद्यामूर्तिं हयग्रीवं शब्दार्थज्ञानलब्धये ।।
अमृताध्मातमेघाभममृताभरणं विभुम् ।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम् ।। श्री भार्गवसंहिताप्रारंभः ।।"

२. d: A. पपृच्छुः for पप्रच्छुः

एतच्छ्रुत्वा महातेजाः स्वयं स्वायंभुवो मुनिः ।
ऋषिभ्यो वक्तुमारेभे स्वधीतं च स्वनुष्ठितम् ॥६॥

अगस्त्यः

पुरा खलु मया रक्षो जीर्णितं श्राद्धभोजने ।
वातापिरिल्वलः पश्चात् कुपितः सोऽपि मारितः ॥७॥

अहो रक्षोद्वयं नष्टं मया खलु तपस्यता ।
ताभ्यां नष्टं तपोऽस्माकं किं कुर्म इति चिन्तयन् ॥८॥

हिमवन्तमुपासाद्य देवगन्धर्वसेवितम् ।
विसर्पिगाङ्गसलिलं सिद्धविद्याधरार्चितम् ॥९॥

शङ्करज्योतिषाश्लिष्टं पार्वतीतोषकारिणम् ।
नारायणमहायोगिचरणाम्बुजमुद्रितम् ॥१०॥

पुण्यगन्धवहोपेतं पुरुहूतादिवन्दितम् ।
पुरत्रयोपसंहारे चापरूपधरं परम् ॥११॥

फलपुष्पभरानम्रवृक्षषण्डसमाकुलम् ।
अनेकाश्रमसंकीर्णममलं हरिमन्दिरम् ॥१२॥

[हिमालये अगस्त्यतपश्चर्या आकाशवाणीश्रवणं च]

अत्युग्रं तप आतिष्ठं निराहारो जितेन्द्रियः ।
वर्धमाने तदा घोरे तपस्यघहरेऽद्भुते ॥१३॥

आकाशवाणीमश्रौषमतिगम्भीरवादिनीम् ।
स्वल्पाक्षरां च बह्वर्थां परिणामसुखावहाम् ॥१४॥

[हरेः आराधनमहत्त्वं, मुनेः महेन्द्रगिरिगमनाय निर्देशश्च]

आराधितो यदि हरिस्तपसा किं प्रयोजनम् ।
नाराधितो यदि हरिस्तपसा किं प्रयोजनम् ॥१५॥

---

७. d: A. मारुतः for मारितः;

१५. श्लोकादुपरि 'आकाशवाणी' इत्ययं अंशः M. T. कोशे अधिकः ।

१५. A. om. c: d:;

अन्तर्बहिर्यदि हरिस्तपसा किं प्रयोजनम् ।
नान्तर्बहिर्यदि हरिस्तपसा किं प्रयोजनम् ॥१६॥

तपसो विरम ब्रह्मन् महेन्द्रं व्रज पर्वतम् ।
तत्र रामं समासाद्य तस्मात् सुखमवाप्नुहि ॥१७॥

[अगस्त्यस्य महेन्द्रगिरिगमनम्]

एतच्छ्रुत्वाम्बराद्वाणीं मनःश्रुतिसुखप्रदाम् ।
विरम्य तपसो भूयो दक्षिणां दिशमभ्यगाम् ॥१८॥

ततो महेन्द्रमासाद्य पुण्यगन्धर्वसेवितम् ।
रामं कमलपत्राक्षमद्राक्षमृषिभिः सह ॥१९॥

[परशुरामस्य वर्णनम्]

तप्तचामीकरनिभं पिङ्गश्मश्रुजटाधरम् ।
वल्कलाजिनसंवीतं ज्वलत्परशुधारिणम् ॥२०॥

तपन्तमिव चादित्यं शीतयन्तं मृगाङ्कवत् ।
भासयन्तं जगत्सर्वं वासुदेवप्रभौघवत् ॥२१॥

भान्तं ब्रह्म श्रियातीव श्रिया नारायणो यथा ।
भारत्या परमेष्ठीव शर्वो गिरिजया यथा ॥२२॥

[अगस्त्यकृता परशुरामस्तुतिः]

जामदग्न्यं तमालोक्य रामं सर्वाङ्गसुन्दरम् ।
मुदा परमयोपेतः शिरसा समवन्दिषम् ॥२३॥

कृत्तो वनस्पतिरिव पातितो धरणीतले ।
विग्रहो मे मुनिश्रेष्ठाः रामस्य पदपद्मयोः ॥२४॥

अनुज्ञातः समुत्थाय तोषयामास तं प्रभुम् ।
उच्चैः स्वरं समासाद्य पुण्डरीकाक्षविद्यया ॥२५॥

---

१६. c: A. नाराधितो for नान्तर्बहिः;

१७. a: A. विरह for विरम;

२१. b: A. प्रतांक; M. मृगाङ्ग for मृगाङ्क;

२२. a: T. A. श्रित्या for श्रिया;

२३. d: A. समवादिषम् for समवन्दिषम्;

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥२६॥

नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ॥२७॥

महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥२८॥

सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अमूर्ताय नमस्तुभ्यमेकमूर्ताय ते नमः ॥२९॥

अनेकमूर्तये तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥३०॥

चिन्मात्ररूपिणे तुभ्यं नमस्त्रैयन्तमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥३१॥

नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय च ते नमः ।
वरिष्ठाय वसिष्ठाय कनिष्ठाय च ते नमः ॥३२॥

पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कल्पनाक्रोडरूपाय सृष्टिस्थित्यन्तहेतवे ॥३३॥

नमस्ते गुणरूपाय गुणरूपानुवर्तिने ।
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥३४॥

आदिमध्यान्तशून्याय तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥३५॥

लोकयात्राप्रसिद्धचर्थं स्रष्टृब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥३६॥

---

२७. b: M. शान्तोनन्त for शान्तानन्द;

३१. a: A. मन्त्र for मात्र;
b: M. त्रय्य for त्रैय;
c: A. अन्विष्ठाय for अणिष्ठाय;

३४. b: A. अनुवृत्तिने for अनुवर्तिने;

३६. A. om. a: b:,
b: M. सृष्टृ for स्रष्टृ;

विपाकैः कर्मणां क्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥३७॥

नित्यासाधारणानेकलोकरक्षापरिच्छदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥३८॥

यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
इज्याफलात्मने तुभ्यं नमः स्वाध्यायशालिने ॥३९॥

नमः परमहंसाय नमः सर्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥४०॥

[अगस्त्यस्यागमनहेतुकः प्रश्नः अभयप्रदानं च]

एवं स्तुतो जगन्नाथो रामः कमललोचनः ।
अवेक्ष्य कृपया देवो मामुवाच जगत्प्रभुः ॥४१॥

रामः

किमर्थं कुंभतनय महेन्द्रं समुपागतः ।
भीतिवद्भासि योगीन्द्र कुतस्ते भयमागतम् ॥४२॥

इन्द्राद्वा वरुणाद्वापि ब्रह्मणो वा त्रिलोचनात् ।
साक्षान्नारायणाद्वापि न ते भूयादितो भयम् ॥४३॥

वैवस्वतो वा रक्षांसि दानवा वा सपन्नगाः ।
विप्रियं यदि कुर्युस्ते गतिस्तेषां परश्वधः ॥४४॥

तस्मादभीतवत्स्थित्वा ब्रूहि कार्यं ससंभ्रमम् ।
साधयाम्यहमद्यैव दर्शनं मे शुभोदयम् ॥४५॥

[अगस्त्येन स्वागमनहेतुनिवेदनम्]

इत्युक्तो जामदग्न्येन भीतवत् कुंभसंभवः ।
यथावद्वक्तुमारेभे रामायामिततेजसे ॥४६॥

---

३७. b: A. आधुष्ट for अस्पृष्ट;
३९. a: A. यज्याय for यज्ञाय;

न भीतिः ब्रह्मणो देव न विष्णोर्न च शङ्करात् ।
नापि जिष्णोर्न च यमात् वरुणाद्वापि राक्षसात् ॥४७॥

राक्षसेभ्योऽपि न भयं न देवेभ्यो न चासुरात् ।
नान्येभ्यश्च भयं मेऽद्य भीतः पापादिहागतः ॥४८॥

वातापिरिल्वलश्चोभौ राक्षसौ ऋषिकण्टकौ ।
तौ हन्तुमर्थितो देवैः ऋषिभिश्च महात्मभिः ॥४९॥

दत्तं मयाभयं तेभ्यो वधे राक्षसयोस्तयोः ।
निश्चितं मे मनः पश्चाद्रक्षसापि निमन्त्रितः ॥५०॥

राक्षसस्य पितुः श्राद्धे सम्पन्नमपि पृष्टवान् ।
उक्तं मयास्तु सम्पन्नं जठरे पिण्डतां गतः ॥५१॥

जीर्णोऽभून्मम वातापिस्ततः कुपित इल्वलः ।
मुष्टिना हन्तुमारेभे मां मया हुंकृतिः कृता ॥५२॥

तेन दग्धोऽभवद्रक्षः सर्वं तेन हृतं तपः ।
तेन खिन्नोऽगमं शैलं तपसे हिमभूषितम् ॥५३॥

अत्युग्रं तप आतिष्ठं वाणी काव्यशरीरिणी ।
तपसानेन किं ते स्यात् रामेण भव निर्भरः ॥५४॥

तत उत्थाय तपसः त्वामद्य शरणं गतः ।
अनागसं मां भगवन् कृत्वा समवलोकय ॥५५॥

[भगवदाराधनतन्त्रश्रवणस्य पापनाशकत्वम्]

एतच्छ्रुत्वा वचो देवो भगवान् भार्गवो मुनिः ।
प्रत्युवाच ततः प्रीतो मैत्रावरुणये प्रभुः ॥५६॥

---

४७. c: A. T. om. च,
५०. d: T. वि° for °पि;
५५. c: M. ममां for मां;
५६. a: T. M. ततो for वचो;
d: T. M. भृगुः for प्रभुः;

रामः

ऋषीणामग्निकल्पानां देवानां प्रीतये त्वया ।
वातापिरिल्वलश्चोभौ नाशितौ ते तपो बलात् ।।५७।।

निश्शल्या ऋषयश्चापि देवाश्चासन् त्वयानघ ।
तदर्थं च तपस्तप्तं भवता हिमवत्तटे ।।५८।।

अस्मदालोकनेनैव पूतोऽभूर्मुनिपुङ्गव ।
तपोधनक्षयभयं न ते भवति दारुणम् ।।५९।।

या चासीद्धृदये शङ्का रक्षो नाशनिमित्तजा ।
तां च हर्यर्चनातन्त्रं श्रुत्वा नाशय कुम्भज ।।६०।।

[हर्यर्चनातन्त्रविषये अगस्त्योत्थापितजिज्ञासा]

अगस्त्यः

किं तद्धर्यर्चनातन्त्रं तन्त्रं तत्कथमागतम् ।
सर्वं निरवशेषेण उपदेष्टुं त्वमर्हसि ।।६१।।

।। इति श्री भार्गवतन्त्रे प्रथमोऽध्यायः ।।

———

५९. b: M. अभूत् for अभूः;
६०. a: A. M. यदासीत् हृदये for या चासीद्धृदये;
c: A. तं तां M. तत्तां for तां च;

द्वितीयोऽध्यायः

[तन्त्रविवरणपूर्वकवासुदेवाराधनफलादिनिरूपणाध्यायः]

[तन्त्रविवरणम्]

श्रीरामः

अक्षय्यसंख्यं तन्त्रं तत् परस्मिन् ब्रह्मणि स्थितम् ।
सार्धकोटिप्रमाणेन जग्राह भगवान् विधिः ॥१॥

नारदोऽपि च जग्राह कोटचर्धं ब्रह्मणो मुनिः ।
कपिलोऽपि मुनिः पञ्च लक्षमात्रमुपाहरत् ॥२॥

वैनतेयोऽपि जग्राह पादलक्षं जनार्दनात् ।
विंशत्सहस्रं जग्राह पूजातन्त्रं हरेः फणी ॥३॥

चत्वारिंशत्सहस्राणि विखना मुनिरग्रहीत ।
लक्ष्मीः षष्टिसहस्राणि लक्षमेकं वसुन्धरा ॥४॥

शुकः पञ्च सहस्राणि सहस्रं सप्ततेर्हरः ।
चतुर्दश सहस्राणि भगवान् स पराशरः ॥५॥

विष्वक्सेनोऽपि जग्राह ग्रन्थं लक्षद्वयं हरेः ।
अन्ये च बहवः कामं जगृहुर्मुनिपुङ्गवाः ॥६॥

[शास्त्रविधिना हरेः आराधनफलम्]

असंख्यातमिदं शास्त्रं हरेर्जठरपूरितम् ।
संग्रहेणाद्य ते वच्मि तेन पूतो भविष्यसि ॥७॥

---

१. b: अन्तरं M. कोशे 'ग्रहीतारः' इत्यधिकः ।

४. a: M. सहस्रेण for सहस्राणि;
M. om. b: c:

६ c: M. कामात् for कामं;
d: M. जग्रहुः for जगृहुः;

तेन शास्त्रविधानेन पूजयस्व रमापतिम् ।
तेन सर्वं लयं याति कलुषं कलशोद्भव ॥८॥

स्मरणं कीर्तनं विष्णोः पूजनं पादवन्दनम् ।
प्रदक्षिणं दर्शनं च सर्वाघौघविनाशनम् ॥९॥

एकैकमपि पर्याप्तं सर्वपापापनोदने ।
किं पुनर्बहवो यस्य सः पुमान् हरिरेव हि ॥१०॥

यद्यदिच्छन् धिया विष्णुं सेवते भक्तिसंयुतः ।
तस्य तत्तत्करतले नात्र कार्या विचारणा ॥११॥

[देवालयादिकल्पनस्य तत्तदाराधनादेश्चफलकीर्तनम्]

यस्तु विष्णुगृहं कुर्यात् वैकुण्ठं तस्य मन्दिरम् ।
यस्तु बिम्बं हरेः कुर्यात् स तु विष्णौ लयं व्रजेत् ॥१२॥

येन पीठानि कल्प्यन्ते स याने चरते दिवि ।
यच्छत्रं चामरं पीठं पादपीठं तथाम्बरम् ॥१३॥

अन्यान्युपचाराणि करोति कमलापतेः ।
स तु तैस्तैस्तथाकाशे निर्मलेऽम्मरसेविते ॥१४॥

देवैः पर्युपचर्यन्ते स नाघेन विलिप्यते ।
कासारवापिकाकूपतटाकादि करोति यः ॥१५॥

स भूयात् सततं शान्तः स न तापेन लिप्यते ।
कवचायुधभूषास्रक् किरीटादि करोति यः ॥१६॥

उद्यानानि च रम्याणि धरणीं सस्यमालिनीम् ।
सभां च मण्डपं रम्यं सर्वं तस्य परेऽम्बरे ॥१७॥

---

८. d: T. A. कमलोद्भव for कलशोद्भव; अस्य श्लोकस्यानन्तरं M. कोशे 'फलम्' इत्यधिकः ।

१४. a: M. अन्यान्यपि उपचाराणि;
d: A. T. अम्बर for अमर;

१५. b: A. नालेन for नाघेन;

१६. a: b: c: d: M. om.

नैवेद्यं विविधं भक्ष्यं भोज्यं लेह्यं च पानकम् ।
उत्पादयति पश्चात् स सुधाशी भवति ध्रुवम् ॥१८॥

अनिच्छन्नखिलं भोगं यः प्रीत्या कुरुते क्रियाः ।
स भवेदमले धाम्नि परस्मिन्नेव लीयते ॥१९॥

यः सदा देवसदने ध्यायन्नास्ते मुदा हरिम् ।
पुनर्न मातुर्जठरे निवसेत्कलसोद्भव ॥२०॥

पानीयं देवदेवाय यो ददाति गतस्पृहः ।
मातुः स्तन्यं न पिबति पुनः कलससंभव ॥२१॥

तालवृन्तेन देवेशं यो वीजयति भक्तिमान् ।
स न तापत्रयैर्लिप्येतेति शास्त्रविनिर्णयः ॥२२॥

गन्धं ददाति यो भक्त्या नरके स न मज्जति ।
आमोदयति यः सद्म स स्वर्गे मतुहीयते ॥२३॥

दद्याच्च यो अम्बरं विष्णोः नग्नत्वं तस्य नोच्यते ।
आलोक्य हृष्टो विष्णुं यः स सालोक्यं समश्नुते ॥२४॥

दीपान् प्रदीपयेद्यस्तु तद्ध्यानविषयो हरिः ।
मार्जनालेपनैर्यान्ति पापानि विलयं ध्रुवम् ॥२५॥

तोरणैरङ्गवल्याद्यैः मण्डयन् देवमन्दिरम् ।
सर्वदा मण्डितो भूयाद्वैकुण्ठे देवमन्दिरे ॥२६॥

वेदैरङ्गैस्तथा स्तोत्रैस्तोषयेद्यदि शार्ङ्गिणम् ।
सर्वदा तोषितः सर्वैः भवेद्वैकुण्ठसद्मनि ॥२७॥

गीतं नृत्यं तथा वाद्यं कारयेद्यो हरेः प्रियम् ।
स तेन तेन भवति परितुष्टः परे पदे ॥२८॥

---

२०. d: A. T. कमलोद्भव for कलशोद्भव;

२१. d: A. T. कमल for कलश;

२३. b: A. M. न स for स न;

२५. a: T. M. प्रदापयेत् for प्रदीपयेत्;

२६. c: M. सर्वथा for सर्वदा;

२८. a: M. नृत्तं for नृत्यम्;
c: M. सते नते for स तेन तेन;

अनन्तशयने देवे परमानन्दविग्रहे ।
अचला परमा भक्तिर्यस्य स ब्रह्मभाजनम् ॥२९॥

भगवद्भक्तियुक्तेषु भक्तिमान् यो भवेन्नरः ।
स भवेद्भगवत्प्राणस्तस्य स्थानं भवेद्धरिः ॥३०॥

[वासुदेवध्यानस्य सिद्धिप्रदातृत्वम्]

ततस्त्वं शार्ङ्गधन्वानं वासुदेवं सनातनम् ।
ध्यायस्व सततं चित्ते तेन ते सिद्धिरव्यया ॥३१॥

॥ इति भार्गवतन्त्रे द्वितीयोऽध्यायः ॥

---

३१. d: A. न ते सिद्धिरनव्यया;

तृतीयोऽध्यायः

[देवालयकल्पनप्रयोजनस्थानादिनिरूपणाध्यायः]

[भगवदालयकल्पनविषयकजिज्ञासा]

अगस्त्यः

भगवन् भार्गव श्रीमन् सर्वकल्याणविग्रह ।
हरिमन्दिरनिर्माणं कथं कुर्याज्जगत्प्रभो ॥१॥

[भगवदालयनिर्माणस्य प्रयोजनद्वयम्]

श्रीरामः

कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च ।
देवतायतनं कुर्यात् यशोधर्माभिवृद्धये ॥२॥

इष्टापूर्तेन लभ्यन्ते ये लोकास्तान् बिभूषता ।
देवानामालयः कार्यो द्वयमप्यत्र दृश्यते ॥३॥

[भगवदालयकल्पनयोग्यस्थाननिर्देशः]

सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च ।
स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः ॥४॥

सरस्सु नलिनीच्छत्रनिरस्तरविरश्मिषु ।
हंसांसाक्षिप्तकल्हारवीचीविमलवारिषु ॥५॥

हंसकारण्डवक्रौञ्चचक्रवाकविराविषु ।
पर्यन्तनिचुलच्छायाविश्रान्तजलचारिषु ॥६॥

प्रारंभे M. कोशे—'तृतीयोध्याय प्रारंभः । श्रीमते हयग्रीवाय परमात्मने नमः । मन्दिरनिर्माणम् ।" इति पाठः ।

२. b: T. M. आरामानि निवेश्य च;

५. a: M. नफेनी for नलिनी;

६. d: A. M. वारिषु for °चारिषु;

क्रौञ्चक्रौञ्चीकलापाश्च कलहंसकलस्वनाः ।
फुल्लनीरद्रुमोत्तंसास्सङ्गमश्रेणिमङ्गलाः ॥७॥

पुलिनाभ्युन्नतोरस्था हंसहासाश्च निम्नगाः ।
वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु ॥८॥

रमन्ते देवताः नित्यं पुरेषूद्यानवत्सु च ।
पर्वतेषु प्रशस्तेषु तीरेषु च पयोनिधेः ॥९॥

आश्रमेषु मुनीनां च ब्राह्मणाः यत्र नित्यशः ।
तत्र हर्यादयो देवाः वस्तुमिच्छन्ति सर्वदा ॥१०॥

यत्र भूमिः प्रशस्ता स्यात् भूसुराणां मनोहरा ।
सा भवेद्देवतानां च प्रिया कलशसंभव ॥११॥

[देवालयकल्पनक्रमे द्वारादितत्तद्भागानां प्रमाणादिः]

चतुष्षष्टिपदं कार्यं देवतायतनं सदा ।
द्वारं च मध्यमं तत्र समदिक्स्थं प्रशस्यते ॥१२॥

यो विस्तारो भवेद्यस्य द्विगुणा तत्समुन्नतिः ।
उच्छ्रायाद्यस्तृतीयोंऽशस्तेन तुल्या कटिर्भवेत् ॥१३॥

विस्तारार्धं भवेद्गर्भो भित्तयोऽन्यास्समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥१४॥

उच्छ्रायात्पादविस्तीर्णा शाखा तद्वदुदुम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥१५॥

त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते ।
अधश्शाखाचतुर्भागे प्रतिहारौ निवेशयेत् ॥१६॥

---

९. b: पुरुषो for पुरेषू

१०. c: A. तत्र for तत्र;

११. श्लोकानन्तरं M. कोशे 'प्रमाणम्' इत्यधिकः ।

१३. b: A. द्विगुणं for द्विगुणा;
c: A. उच्छ्रायाद्यस्तु तुर्योंऽशः,

१६. d: T. प्रवेशयेत् for निवेशयेत्;

शेषं मङ्गल्यविहगैः श्रीवृक्षस्वस्तिकैर्घटैः ।
मिथुनैः पत्रवल्लीभिः प्रतिमाभिश्च शोभयेत् ॥१७॥

द्वारमानाष्टभागोना प्रतिमा स्यात् सपिण्डिका ।
द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पण्डिका ॥१८॥

[विंशतिसंख्याकानाम् आलयानां परिगणनम्]

मेरुमन्दरकैलासविमानच्छन्दनन्दनाः ।
समुद्रपद्मगरुडनदीवर्धनकुञ्जराः ॥१९॥

गुहराजो वृषो सिंहस्सर्वतोभद्रको घटः ।
हंसो वृत्तश्चतुष्कोणः षोडशाष्टाश्रकस्तथा ॥२०॥
इत्येते विंशतिः प्रोक्ताः प्रासादाः शाङ्र्गधन्वनः ।

[देवालयस्य सामान्यं लक्षणम्]

यथोक्तेन क्रमेणैव तेषां लक्षणमुच्यते ॥२१॥

पूर्वोक्तायामविस्तारावर्धीकृत्य यथावसु ।
चतुर्भागेन वा कुर्यात् सर्वं वित्तानुसारतः ॥२२॥

[आलयकल्पनक्रमे अर्धमण्डपाद्यायामादिः]

गर्भगेहसमायामम् अर्धमण्टपमुच्यते ।
सपादं सार्धयुक्तं वा त्रिपादाधिकसंयुता ॥२३॥

अर्धमण्डपमानेन सार्धं नृत्तार्धमण्डपम् ।
वैपुल्यसदृशं सार्धं द्विगुणं वा यथेच्छया ॥२४॥

तयोर्मण्डपयोरेवमायामो मुनिपुङ्गव ।
अन्तर्मण्डलनामानं प्राकारं प्रथमं विदुः ॥२५॥

---

१७. b: A. वटैः for घटैः;
c: T. पञ्च for पत्र;
१८. श्लोकानन्तरं M. कोशे 'विमानानि' इत्यधिकः ।
१८. a: A. ऊनं for ऊना;
२२. d: T. वृत्त for वित्त; श्लोकादनन्तरं M. कोशे 'अर्धमण्डपादि' इत्यधिकः ।
२३. c: A. M. वार्धयुक्तं for सार्धयुक्तं;
२४. b: M. नृत्तार्थं for नृत्तार्धं;
२५. c: T. अन्तमण्डल मानानाम्; A. तन्मानम् for नामानं;

विमानं वेष्टयेदेतत् यद्वा स्यादर्धमण्डपम् ।
अन्तर्हाराह्वयं वप्रं कारयेत्तदनन्तरम् ॥२६॥
मर्यादाख्यं तृतीयं तत्प्राकारं विधिभाषितम् ।

[मूलबिम्बादिस्थापनस्थाननिर्देशः]

मूलबिम्बं प्रतिष्ठाप्यं गर्भगेहे विधेः पदे ॥२७॥
यद्वा दैवे मानुषे वा ध्रुवस्थापनमाचरेत् ।

[द्वारपालस्थाननिर्देशः]

चण्डप्रचण्डौ संस्थाप्य गर्भद्वारे यथाक्रमम् ॥२८॥

अर्धमण्डपकद्वारे शङ्खचक्रोत्तमाङ्गिनौ ।
अन्तर्मण्डलसंज्ञस्य स्थलस्य द्वारपार्श्वयोः ॥२९॥

जयश्च विजयश्चोभौ कर्तव्यौ मुनिपुङ्गव ।
अन्तर्हाराह्वये धाम्नि द्वारि पद्मगदाधरौ ॥३०॥
दुर्जयप्रबलौ स्थाप्यौ मर्यादाद्वारपार्श्वयोः ।

[परिवारदेवस्थाननिर्देशः]

एकावरणके धाम्नि परिवारान्निमान् शृणु ॥३१॥

नृत्तार्धमण्डपस्याग्रे कल्पनीयो विहङ्गराट् ।
गोपुरस्योत्तरे साले मन्दिराभिमुखे रविः ॥३२॥

तस्यैव दक्षिणे साले चन्द्रमाः परिकल्प्यते ।
वह्नौ कामो यमे ब्रह्मा नैरृते स्याद्गजाननः ॥३३॥

वारुणे षण्मुखो दुर्गा वायौ सौम्ये धनाधिपः ।
ईशाने शंकरं तत्र क्षेत्रपालं प्रकल्पयेत् ॥३४॥

सोमेशयोरन्तराले विष्वक्सेनं प्रकल्पयेत् ।
अङ्गणे दक्षिणे सप्तमातरः श्रीस्तु नैरृते ॥३५॥

---

२६. c: A. अन्तर्धार for अन्तर्हार; T. भार for हार;
३२. d: M. मुखो for मुखे;
३४. c: A. शंकरः for शंकरम्;

इन्द्रादयो लोकपालाः पूज्याः स्वाशासु चाङ्गणे।
गोपुरस्य भवेदन्तर्बहिर्वा बलिपीठिका ॥३६॥

अन्तर्हाराह्वयोपेते विशेषो धाम्नि कथ्यते।
सूर्याचन्द्रमसोः स्थाने विशेषौ पुरुषाच्युतौ ॥३७॥

सूर्याचन्द्रमसौ कल्प्यौ द्वितीयावरणे तथा।
हयग्रीवः स्मरस्थाने स्थाप्यः सङ्कर्षणो विधेः ॥३८॥

वराहो विघ्नराट् स्थाने प्रद्युम्नः षण्मुखस्य च।
कात्यायिन्याः अनन्तः स्यात् अनिरुद्धो नरासने ॥३९॥

नृकेसरी शंकरस्य चाङ्गणे पीठिकासु चेत्।
इन्द्रादयः समभ्यर्च्याः तेषां स्थाने यथाक्रमम् ॥४०॥

चक्री च मुसली शंखी खड्गी चैव गदाधरः।
शार्ङ्गी पद्मी तथा वज्री पूज्या दिव्यास्त्रधारिणः ॥४१॥
प्रथमावरणे येषां स्थाना ये समुदीरिताः।

[आलये द्वितीयावरणस्थपरिवारदेवानां स्थानानि]

ज्ञेयाः द्वितीये ते सर्वे परिवाराः यथाक्रमम् ॥४२॥

मर्यादावरणे धाम्नि गोपुरोभयपार्श्वयोः।
शङ्खं चक्रं तथा स्थाप्य देवदेवायुधोत्तमौ ॥४३॥

उपेन्द्रं गोपुरशिरोभागे स्थाप्य ततः परम्।
आग्नेयादिक्रमेणैव प्राकृतादीन् प्रकल्पयेत् ॥४४॥

---

३७. a: A. T. अन्तर्भार for अन्तर्हार;
b: A. M. ऽथास्ति for धाम्नि;
३८. d: A. स्थाने for स्थाप्यः;
३९. b: A. शरजन्मनः for षण्मुखस्य च;
c: T. अनन्तश्च for अनन्तः स्यात्;
४०. a: A. शाङ्करे for शंकरस्य;
b: A. स्यात् for चा०;
४१. a: b: c: d:,
४२. a: b: c: d: T. om.;

उपेन्द्रः प्राकृतः पुण्यः पुष्करो विश्वभावनः ।
असुरघ्नः कृतान्तश्च भूतनाथोऽष्टमः स्मृतः ॥४५॥

अङ्गणे पीठिकास्थाने कुमुदादीन् प्रकल्पयेत् ।
कुमुदः कुमुदाक्षश्च पुण्डरीकश्च वामनः ॥४६॥

शङ्कुकर्णः सर्पनेत्रः सुमुखस्सुप्रतिष्ठितः ।
विष्वक्सेनं तदाग्नेय्यां क्षेत्रपालं खगेश्वरम् ॥४७॥

प्रधानवेद्यभिमुखं कल्पयेत्कुम्भसंभव ।
महापीठं च तत्रैव ध्वजयष्टिं च शार्ङ्गिणः ॥४८॥

[आलये महानसादिस्थाननिर्देशः]

प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
तृतीयावरणे वापि पाकस्थानं प्रकल्पयेत् ॥४९॥

वारुणे वाऽथवा सौम्ये कूपं शार्वेऽपि वा भवेत् ।
यत्र वाऽपां रसास्सन्ति तत्र कूपं प्रकल्पयेत् ॥५०॥

[त्रिविधं वैष्णवविमानम्]

नागरं द्राविडं चेति वेसरं च त्रिधा मतम् ।
विमानं देवदेवस्य विमलं वैष्णवं स्मृतम् ॥५१॥

॥ इति भार्गवतन्त्रे तृतीयोऽध्यायः ॥[1]

———

४७. a: M. सर्व for सर्प०;

४८. a: M. °करवम् for °मुखम्;

४९. श्लोकतः पूर्वं M. कोशे — 'महानसम्' इत्यधिकः ।

१. अध्यायः इत्यतः अनन्तरम् M. कोशे 'हरिः ओम्' इत्यधिकः ।

चतुर्थोऽध्यायः

[प्रतिमाङ्गमानादिनिरूपणाध्यायः]

[प्रतिमानिर्माणविषये सामान्यजिज्ञासा]

अगस्त्यः

कथं वा वासुदेवस्य निर्मेया प्रतिमा हरेः ।
कति भेदानि बिम्बानां ब्रूहि मे कृपया प्रभो ॥१॥

[रेण्वादिमानविशेषाणां लक्षणम्]

रामः

वातायनपथं प्राप्य ये भान्ति रविरश्मयः ।
तेषु सूक्ष्मा विसर्पन्ति रेणवः परमाणवः ॥२॥

परमाणुरजः केशलीक्षायूकयवाष्टकैः ।
लब्धं मानाङ्गुलं शालित्रिभिर्मानान्तराङ्गुलम् ॥३॥

आचार्यदक्षिणकरे मध्यमाङ्गुलमध्यमे ।
पर्वणोरन्तरं दीर्घं मात्राङ्गुलमुदाहृतम् ॥४॥

विनाङ्गुष्ठेन शेषाभिः मुष्टिमङ्गुलिभिः कृतम् ।
चतुर्धा विभजेदेको भागो मुष्टयङ्गुलिः स्मृता ॥५॥

यत्किञ्चित् प्रतिमामानं विभज्य दशधा पुनः ।
एकं द्वादशधा लब्धं देहलब्धाङ्गुलं भवेत् ॥६॥

[उपादानद्रव्यभेदानुसारं सप्तविधानि बिम्बानि]

रत्नजं शैलजं बिम्बं दारुजं लोहजं तथा ।
मृत्त्रैवस्तुकयोर्बिम्बं चित्रजं चेति सप्तधा ॥७॥

---

२. a: T. प्रथं for पथम्;
c: A. तेषु सूक्ष्माणि सर्पन्ति;

३. b: A. लीक्षलूक for लीक्षायूक;

६. श्लोकात् पूर्वं M. कोशे 'बिम्बभेदः' इत्यधिकः;

[बिम्बोत्सेधविषये उत्तमः पक्षः]

बिम्बानि वासुदेवस्य कथ्यन्ते कलशोद्भव ।
तत्र प्रतिकृतेस्तावत्तदङ्गानां च कथ्यते ॥८॥

उत्सेधमानं मूर्धादिपादान्तमनुपूर्वशः ।
लब्धानां देहतस्तावत् अङ्गुलीनां शतेन च ॥९॥
चतुर्विंशति मानेन प्रतिमां परिकल्पयेत् ।

[प्रतिमायाः तत्तदङ्गमाननिर्देशः]

उष्णीषमङ्गुलमितं केशान्तं त्र्यङ्गुलं मतम् ॥१०॥

दृक्सूत्रान्तं तदारभ्य षट्त्रिंशत् यवसम्मितम् ।
तद्वन्नासापुटान्तं स्यात् तद्वच्च चिबुकावधि ॥११॥

तेन केशान्तमारभ्य मुखमानं मुनीश्वर ।
अष्टोत्तरयवशतं चिबुकावयवावधि ॥१२॥

गलमर्धाङ्गुलं सार्धं त्र्यङ्गुलं कण्ठमिष्यते ।
हिक्कासूत्रं समारभ्य हृदयान्तं मुखेरितम् ॥१३॥

ततः प्रभृति नाभ्यन्तं सार्धं सत्रिदशाङ्गुलम् ।
ततः प्रभृति मेढ्रान्तं तद्वदुत्सेधमिष्यते ॥१४॥

तन्मूलाज्जानुपर्यन्तं त्रिन्यूनं त्रिदशाङ्गुलम् ।
चतुरङ्गुलमुत्सेधं जानुमण्डलमिष्यते ॥१५॥

जानोरधस्तादक्षान्तमूरुमानमुदीरितम् ।
ततस्तालान्तमुत्सेधं चतुरङ्गुलसम्मितम् ॥१६॥

[बिम्बोत्सेधविषये मध्यमपक्षः]

देहलब्धानि यावन्ति दशतालेऽभिपूजिते ।
विभज्य तावदुक्तानि मध्यमे प्रतिमाविधौ ॥१७॥

---

९. a: A. मूर्त्यादि for मूर्धादि;

११. a: A. द्रक्षूतान्तं for दृक्सूत्रान्तं;
b: A. सहितम् for सम्मितम्;

१५. a: b: c: d: A. om;

त्रयोदशाङ्गुलं वक्त्रं त्रिस्थाने चतुरङ्गुलम् ।
षड्विशत्यङ्गुलोत्सेधमूरुमानमुदाहृतम् ॥१८॥
तद्वज्जङ्घासमुत्सेधमुत्तरेणेतरत्समम् ।

[बिम्बोत्सेधविषये अधमः पक्षः तत्तदङ्गविस्तारादिकं च]

अधमे दशताले तु मुखं शतयवं मतम् ॥१९॥

त्रिस्थाने तावदेव स्यात् ऊरुर्यवशतद्वयम् ।
जङ्घा च तत्समोत्सेधा मुख्येनान्यत्समं स्मृतम् ॥२०॥

विंशद्यवशतं पादं द्राघिमा कमलापतेः ।
अङ्गुष्ठं वेदमानं स्यात् तदायामा च तर्जनी ॥२१॥

एकत्रिंशद्यवायामा मध्यमाङ्गुलिरिष्यते ।
त्रिंशद्यवानामिका स्यात्कनिष्ठा त्र्यङ्गुलात्मिका ॥२२॥

यवैश्च पञ्चभिर्युक्ता पार्ष्णी च चतुरङ्गुला ।
हिक्कान्तयोरधो बाहुरङ्गुलिस्सप्तविंशतिः ॥२३॥

ततश्च मणिबन्धान्तं षड्विंशत्यङ्गुलायतम् ।
यवद्वयेन च युतं मणिबन्धात्तलं पुनः ॥२४॥

मध्यमाङ्गुलिपर्यन्तम् अङ्गुलं सप्त कथ्यते ।
पञ्चाङ्गुलमथाङ्गुष्ठं तर्जनी तद्वदायता ॥२५॥

षड्यवैश्चाधिकायामा मध्यमा तु षडङ्गुला ।
आयता षड्यवैश्चापि तर्जन्यानामिका समा ॥२६॥

कनिष्ठाङ्गुष्ठतुलिता मांसलग्नं नखं स्मृतम् ।
एकाङ्गुला नखायामा शिष्टा षड्यवसम्मिता ॥२७॥

---

१८. b: A. M. त्रिस्थानं for त्रिस्थाने;
२०. a: A. M. त्रिस्थानं for त्रिस्थाने;
२१. b: A. द्रढिमा for द्राघिमा;
२२. d: A. त्र्यङ्गुलोऽपि च, M. त्रियङ्गुलापि च for त्र्यङ्गुलात्मिका,
२३. c: M. हिक्कान्ततः for हिक्कान्तयोः
२७. d: A. वर्जिता for सम्मिता,

बाहुवच्चोपबाहुः स्याच्चतुरङ्गुलमायतम् ।
चतुर्यवं चोर्ध्वकण्ठं नालं पञ्चाङ्गुलायतम् ॥२८॥

लिङ्गं पञ्चाङ्गुलायामं मुष्कं तु चतुरङ्गुलम् ।
सार्धाष्टाङ्गुलविस्तारं ललाटं तदनन्तरम् ॥२९॥

द्वादशाङ्गुलविस्तारं बालचन्द्रसमाकृतिः ।
ततस्तु कर्णयोर्मध्यं सार्धं सत्रिदशाङ्गुलम् ॥३०॥

दशाङ्गुलमधस्तस्य विस्तारं चिबुकस्य तु ।
सपादं द्व्यङ्गुलं पूर्णं चापतुल्याकृतिर्भवेत् ॥३१॥

मूलमध्याग्रविस्तारो ग्रीवायाः क्रमशो भवेत् ।
नवाङ्गुलं तथैकोनं सार्धसप्ताङ्गुलं तथा ॥३२॥

हिक्कान्ततोरधो बाहुर्मूलयोरन्तरं भवेत् ।
यवैश्चतुर्भिर्विस्तीर्णं स चत्वारिंशदङ्गुलम् ॥३३॥

कक्षयोर्मध्यविस्तारस्त्र्यङ्गुलः सार्धविंशतिः ।
अष्टादशाङ्गुलं मानं स्तनयोरपि चान्तरम् ॥३४॥

षोडशाङ्गुलविस्तारं तुन्दमध्यमुदाहृतम् ।
अष्टादशाङ्गुला श्रोणिरधरोदरमिष्यते ॥३५॥

कटिप्रदेशविस्तारस्त्र्यङ्गुलः सार्धविंशतिः ।
ऊरुमूलस्य विस्तारस्सार्धं सत्रिदशांङ्गुलम् ॥३६॥

अग्रमेकाङ्गुलं सार्धं द्व्यङ्गुलं मध्यमिष्यते ।
द्व्यङ्गुलो मूलविस्तारो लिङ्गस्य समुदाहृतम् ॥३७॥

विस्तीर्णं त्र्यङ्गुलं मूलं मध्यमर्धाधिकं पुनः ।
विस्तीर्णमग्रमुष्कस्य द्वात्रिंशद्यवसम्मितम् ॥३८॥

विस्तीर्णमेकादशभिरङ्गुलैरूरुमध्यमम् ।
अग्रं दशभिरेव स्यात् विस्तीर्णं कलशोद्भव ॥३९॥

नवाङ्गुलं जानुचक्रं सार्धमर्धेन्दुसन्निभम् ।
मूलं नवाष्टौ मध्ये स्याज्जङ्घाग्रं सार्धसप्तकम् ॥४०॥

---

३५. b: A. भुज for तुन्द,

विस्तीर्णो नालिकाभागः सार्धश्च चतुरङ्गुलैः ।
अङ्घ्रिमूलस्य विस्तारस्त्र्यङ्गुलस्सचतुर्यवः ॥४१॥

सार्धपञ्चाङ्गुलं मध्यमग्रं सार्धषडङ्गुलम् ।
सार्धमष्टाङ्गुलं मूलं बाहू सप्ताङ्गुलौ पुनः ॥४२॥

मध्येऽग्रे तुल्यविस्तारे प्रकोष्ठावयवं पुनः ।
सार्धेन सप्तभिर्मूले विस्तीर्णं सार्धपञ्चभिः ॥४३॥

मध्ये चतुर्भिरग्रे स्यान्मणिबन्धस्य तूच्यते ।
पञ्चाङ्गुलार्धसहितस्तद्वत् करतलं स्मृतम् ॥४४॥

अङ्गुष्ठे मूलविस्तारो द्व्यङ्गुलो मध्यमाङ्गुलम् ।
सषड्यवममुष्याग्रमङ्गुलेनैव सम्मतम् ॥४५॥

तर्जन्या मूलविस्तारो नवभिः सम्मितो यवैः ।
मध्यमेकाङ्गुलं सप्त यवमग्रमुदाहृतम् ॥४६॥

मूलं दशयवं मध्यं मध्यमायाः यवा नव ।
अग्रमेकाङ्गुलं प्रोक्तमितरा तर्जनी समा ॥४७॥

मूलमष्टौ कनिष्ठायाः यवाः सप्तैव मध्यमे ।
षड्यवोऽग्रेऽङ्गुलाग्रेभ्यः पादोना नखविस्तृतिः ॥४८॥

मध्ये करतले रेखा मध्यमामूलमास्थिता ।
कनिष्ठामूलमारभ्य रेखा मध्यमगा भवेत् ॥४९॥

मध्यमाङ्गुलितर्जन्योर्निमातव्या विचक्षणैः ।
अङ्गुष्ठमूलमारभ्य तर्जन्यन्तश्च मध्यमा ॥५०॥

तयोश्च रेखयोर्मध्ये तर्जनी मूलगामिनी ।
रेखा कल्प्या यथाशास्त्रं शास्त्राभिज्ञेन शिल्पिना ॥५१॥

ललाटस्य च विस्तारस्सपादस्त्र्यङ्गुलो भवेत् ।
तस्याधस्ताद्भ्रुवौ कल्प्यौ चत्वारिंशद्यवायतौ ॥५२॥

---

४१. a: M. नलका for नालिका;
४३. a: A. मध्येश्चे for मध्येऽग्रे;
४७. b: T. M. मध्यमायाथवा नव;
५२. d: M. यवायतम् for यवायतौ;

मध्ये यवेन विस्तीर्णे यूकाग्रे चापसन्निभे ।
तयोर्मध्यं नव यवम् अष्टादशयवायतम् ॥५३॥

चक्षुःकनीनिकायामो विस्तारश्च यवः स्मृतः ।
अङ्गुलं श्वेतबिम्बस्य विस्तारं कृष्णमण्डलम् ॥५४॥

यवोनमङ्गुलं ज्योतिस्तन्मध्ये यवसम्मितम् ।
यूकमानं तु तन्मध्ये दृष्टिः पक्ष्मावली पुनः ॥५५॥

अशीति पक्ष्मरोमाणि वक्त्राग्राण्यसितानि च ।
द्वयङ्गुलं चक्षुषोर्मध्यं मध्यं च श्रुत्यपाङ्गयोः ॥५६॥

चत्वारिंशद्यवं कर्णविस्तारो द्वयङ्गुलो भवेत् ।
ऊर्ध्वकर्णस्य चायामस्सहार्धचतुरङ्गुलः ॥५७॥

नालं पञ्चाङ्गुलमितं विस्तारः षड्यवं पुनः ।
पश्चाच्चतुर्यवा पाली नालतुल्यं प्रकल्पयेत् ॥५८॥

श्रवणस्य च पिप्पल्या मध्यगर्तं चतुर्यवम् ।
त्रिवक्रकर्णपिप्पल्या गल्लपात्रमिव स्थितम् ॥५९॥

बन्धनं त्र्यङ्गुलं रन्ध्रं नेत्रसूत्रसमुन्नतम् ।
नासिकामूलमध्याग्रविस्तारः कथ्यते क्रमात् ॥६०॥

अङ्गुलं चाङ्गुलं सार्धं द्वयङ्गुलं सचतुर्यवम् ।
अङ्गुलेनोन्नतं मूलं तेन सार्धेन मध्यमम् ॥६१॥

द्वाभ्यां यवाभ्यां मूलेन द्वयङ्गुलेनाग्रमुत्तमम् ।
षड्यवं सुषिरं तस्य पुटमध्यं चतुर्यवम् ॥६२॥

---

५३. a: b: c: d: om. M.

५६. a: T. पक्ष for पक्ष्म;
b: A. वक्त्रा ग्राह्याण्यसितानि च;
c: A. द्वयङ्गुले for द्वयङ्गुलम्;

५८. c: A. लाली for पाली;

५९. a: A. om च; b: c: A. om; d: A. गल० for गल्ल०;

६१. c: T. अङ्गुष्ठेन for अङ्गुलेन;

६२. b: T. M. उन्नतम् for उत्तमम्;

पुटपार्श्वस्य विस्तारो द्वियवः परिकीर्तितः ।
उत्सेधोऽर्धाङ्गुलस्तस्य नासिका तिलपुष्पवत् ॥६३॥

उत्तरोष्ठायतं सार्धं चतुरङ्गुलमिष्यते ।
विस्तारोऽर्धाङ्गुलस्तस्य पर सार्धाङ्गुलायतम् ॥६४॥

विस्तीर्णमङ्गुलं तस्य पाली चैकयवायता ।
चिबुकोऽष्टादशयवः विस्तारायामसम्मितः ॥६५॥

गुल्फं पादाङ्गुलोत्सेधं दर्पणोदरसन्निभम् ।
विस्तीर्णावियवौ तुल्यौ राजदन्तौ चतुर्यवौ ॥६६॥

द्वात्रिंशद्दशनाः कल्प्याः यथाशास्त्रं विचक्षणैः ।
जिह्वा षडङ्गुलायामा विस्तीर्णा त्र्यङ्गुलैर्भवेत् ॥६७॥

रेखात्रयाङ्किता ग्रीवा हिक्कासूत्रात् स्तनस्थितिः ।
एकादशाङ्गुलं वृत्तं द्व्यङ्गुलं स्तनमण्डलम् ॥६८॥

चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् ।
चतुर्यवं नाभिगर्तं दक्षिणावर्तमिष्यते ॥६९॥

अध्यर्धमङ्गुलं वृत्तमक्षमर्धाङ्गुलोन्नतम् ।
उष्णीषात्पृष्ठकेशान्तमेकाधिकदशाङ्गुलम् ॥७०॥

उष्णीषात्पार्श्वकेशान्तं द्वादशाङ्गुलमानकम् ।
कर्णयोरन्तरं विद्यात् सार्धं सत्रिदशाङ्गुलम् ॥७१॥

मूलमध्याग्रभागेषु पृष्ठग्रीवा यथाक्रमम् ।
विस्तीर्णा नवभिः सार्धैरङ्गुलैर्नवभिस्तथा ॥७२॥

अष्टभिश्च भवेत्तस्या अधस्तात् ककुदस्थितिः ।
आयामोत्सेधविस्तारैः ककुदन्तं चतुर्यवम् ॥७३॥

षट्त्रिंशदङ्गुलं बाह्वोर्मध्यं विस्तार पृष्ठतः ।
षड्विंशतिश्चाङ्गुलानां कक्षयोरन्तरं भवेत् ॥७४॥

पृष्ठमध्यस्य विस्तारो ब्रह्मन् सप्तदशाङ्गुलः ।
विस्तीर्णौ पञ्चविंशत्या श्रोणीपार्श्वौ तथाङ्गुलैः ॥७५॥

---

६३. c: A. उत्सेधार्ध for उत्सेधोऽर्ध०;
६५. d: T. M. विस्तारो यवसम्मितः;

कटिप्रदेशविस्तारर्ष्षड्विंशत्यङ्गुलो भवेत् ।
षट्त्रिंशदङ्गुलं मध्ये ककुदस्य कटेस्तथा ॥७६॥

द्व्यङ्गुलोन्नतिरेतस्य स्फीतौ तन्मध्यमाङ्गुलम् ।
अष्टाङ्गुलं स्तने मूलं मध्यं सप्ताङ्गुलं भवेत् ॥७७॥

अग्र्यं त्र्यङ्गुलविस्तारम् ऊर्वोर्मूलादिषु त्रिषु ।
भवेत्क्रमेण विस्तारः सार्धः सत्रिदशाङ्गुलः ॥७८॥

द्वादशाङ्गुलयुक्तः स्यात् तथैव द्वादशाङ्गुलः ।
जान्वष्टाङ्गुलविस्तारं सार्धमष्टाङ्गुलं भवेत् ॥७९॥

जङ्घामध्यस्य विस्तारो नलका चतुरङ्गुला ।
चतुर्यवाधिका चैव गुल्फश्च चतुरङ्गुलः ॥८०॥

विस्तारमानं त्रिगुणं सर्वेषां नहनं मतम् ।
अभीतिदो वा वरदो मुख्यो वामेतरः करः ॥८१॥

स्तनसूत्रसमं कार्यं अङ्गुलाग्रं करस्य तु ।
तयोर्भवेदन्तरालं द्वादशाङ्गुलमानकम् ॥८२॥

[प्रतिमायाः आभूषणानाम् विवरणम्]

अङ्गुष्ठतर्जनीमध्ये सनालं कमलं भवेत् ।
वरदे कमलाकारं लिखेत् करतलोदरे ॥८३॥

अधोमुखे वामहस्ते मुख्ये कुर्याद्गदां शुभाम् ।
जघन्ययोस्तु करयोः शङ्खं चक्रं निवेशयेत् ॥८४॥

बाहुष्वष्टसु देवस्य तानि तान्यायुधान्यपि ।
निवेशयेद्यथाकामं शिल्पशास्त्रविचक्षणः ॥८५॥

किरीटं कुण्डले हारान् यज्ञसूत्राङ्गुलियके ।
कौस्तुभं वनमालां च श्रीवत्सं दक्षिणोरसि ॥८६॥

---

७६. d: A. तदा for तथा,

७७. c: T. मूले for मूलम्;

७९. a: b: T. M. om.;

८५. d: A. M. शिल्पी for शिल्प;

८६. b: T. अङ्ग for यज्ञ;

अङ्गदे कटके रम्ये काञ्चीदाम च नूपुरे ।
दुकूलमन्तरीयं च सोत्तरीयं निवेशयेत् ॥८७॥

देशकालोपलाल्यानि भूषणानि निवेशयेत् ।

[भगवतः प्रतिमायाः आसीनादिस्वरूपविवेकः]

आसीनं वा शयानं वा तिष्ठन्तं वा यथारुचि ॥८८॥

आरुढं पक्षिराजे वा कल्पयेद्विष्णुविग्रहम् ।

[प्रतिमायाः स्थापनस्थानविवेकः]

एवं गर्भगृहे देवं ब्रह्मस्थाने निवेशयेत् ॥८९॥
यद्वा दिव्ये मानुषे वा द्वारसूत्रे निवेशयेत् ।

एवं संस्थापयेद्देवं प्रतिष्ठासमये सुधीः ॥९०॥

[देवीप्रतिमास्थापनस्थाननिर्देशः]

अष्टौ देवीः श्रियाद्याश्च पार्श्वयोर्विनिवेशयेत् ।
श्रीर्दक्षिणे धरा वामे देव्यौ देवस्य कल्पयेत् ॥९१॥

रतिस्सरस्वती तुष्टिर्देव्यो देवस्य दक्षिणे ।
कीर्तिः प्रीतिश्च शान्तिश्च वामे देवस्य संस्थिताः ॥९२॥

[देव्याः संख्याविचारः]

अष्टभिर्वा चतसृभिर्द्वाभ्यां यद्वैकयापि वा ।
विना वा देवदेवेशं सश्रीवत्सं निवेशयेत् ॥९३॥

[देवीनां मूर्तिकल्पने विशेषः]

देवीनान्तु श्रियादीनां विशेषश्चैष कल्पने ।
रेखात्रयाङ्किता ग्रीवा हिक्कासूत्रात्स्तनस्थितिः ॥९४॥

एकादशाङ्गुलं वृत्तं द्व्यङ्गुलं स्तनमण्डलम् ।
चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् ॥९५॥

---

८७. b: T. दामन For दाम च;

९२. d: M. वामदेवस्य for वामे देवस्य

अष्टादशाङ्गुलमुरस्स्तनयोरपि मण्डलम् ।
अङ्गुलैः पञ्चदशभिः परिच्छिन्नं यथातथम् ॥९६॥

नवाङ्गुलश्च विस्तारः उत्सेधश्चापि तादृशः ।
द्वादशाङ्गुलविस्तारः स्तनयोर्मध्य इष्यते ॥९७॥

कृष्णमण्डलविस्तारो द्व्यङ्गुलं परिकीर्तितम् ।
श्रोणी षडङ्गुला यामा योनिस्सार्धाङ्गुलत्रयम् ॥९८॥

[देवीप्रतिमायाः आभूषणादिनिर्देशः]

अबलानुगुणैरन्यैरम्बरैरपि भूषणैः ।
भूषयेन्मकुटं यद्वा धम्मिल्लं वा प्रकल्पयेत् ॥९९॥

अस्वतन्त्राः यदा देव्यः द्विभुजाः पार्श्वभूमिषु ।
चतुर्भुजास्ताः स्वातन्त्र्ये द्विभुजा वा यथामति ॥१००॥

दक्षिणेतरभागस्था दक्षिणे पुष्पधारिणी ।
वामेतरस्थिता देवी वामे कमलधारिणी ॥१०१॥

अन्येन चोरुविश्रान्ताः कल्पयेच्छिल्पतन्त्रवित् ।

[उत्सवादिप्रतिमोत्सेधादिविवरणम्]

मूलबिम्बतृतीयांशसममुत्सवकौतुकम् ॥१०२॥

स्नपनप्रतिमा चापि तदुत्सेधाः प्रकीर्तिताः ।
बलिबिम्बप्रतिकृतिः शयनोत्थानकौतुकम् ॥१०३॥

कर्मबिम्बं च निर्मेयं मूलतालप्रमाणतः ।

[अङ्गबिम्बकल्पनविचारः]

ब्राह्मे भागे ध्रुवे न्यस्ते नैवाङ्गपरिकल्पना ॥१०४॥

लौकिकेनैव बिम्बेन कुर्यान्नैमित्तिकं बुधः ।
ध्रुवबेरार्धमानेन कौतुकं लोहनिर्मितम् ॥१०५॥

---

९६. d: T. M. यथा तथा for यथातथम्;

१०१. c: d: om. M.;

१०३. c: A. बलितीर्थ प्रतिकृती;

लौकिकं तेन कुर्वीत सर्वां देवक्रियां सुधीः ।
चक्रेण बलिदानं स्यात् तथा तीर्थावगाहनम् ॥१०६॥

कूर्चेन शयनं कार्यं ब्राह्मे मूलार्चनाविधौ ।
दैवे वा मानुष्ये स्थाप्ये ब्राह्मे कर्माणि विन्यसेत् ॥१०७॥

नित्यं नैमित्तिकं काम्यं सर्वं तेनैव पूर्यते ।
स्थानयानासनविधौ ध्रुवबिम्बं यथाक्रमम् ॥१०८॥

कर्मार्चादीनि तद्वत् स्याद् ध्रुवे तु शयिते पुनः ।
तिष्ठेद्वासीत वा कामं कर्माद्यर्चा यथामति ॥१०९॥

नित्योत्सवप्रतिकृतिः सर्वत्रैव स्थिता भवेत् ।
कर्मादिबिम्बषट्कं च श्रीभूमिसहितं भवेत् ॥११०॥

यद्वा श्रीभूमिसहितमेकं वा मखकौतुकम् ।

[पीठकल्पनप्रकारः]

अर्चायामं त्रिधा कृत्वा पीठमेकेन कल्पयेत् ॥१११॥

उपानहादिपञ्चाङ्गयुक्तं वृत्तं सुखावहम् ।
अथवा चतुरश्रं वा विस्तारतुलितायति ॥११२॥

पीठोत्सेधं त्रिधा कृत्वा पद्ममेकेन कल्पयेत् ।
दलैर्द्वादशभिर्युक्तमष्टाभिर्वा यथारुचि ॥११३॥

पादमानं दलायामं केवलं वा सरोरुहम् ।
पीठं वा केवलं वापि कल्पयेत्कलशोद्भव ॥११४॥

आसीनेऽश्रायतं यद्वा कुर्याद्वृत्तायतं तु वा ।
प्रतिमार्धेन वा पीठं तृतीयांशेन वा तथा ॥११५॥

पद्मं बहुदलैर्युक्तं कर्णिकाकेसरान्वितम् ।
लम्बमानपदाधारं कमलं तत्र कल्पयेत् ॥११६॥

---

१०७. c: T. मानुषे for मानुष्ये;

१०८. b: A. तैरेव for तेनैव;

c: A. स्नान for स्थान;

१०९. c: A. तिष्ठेष्वासीत वा for तिष्ठेद्वासीत वा;

सङ्कोचितप्रसव्याङ्घ्रेरितरं लम्बयेदधः ।
मूलबेरत्रिपादेन पादेनार्धेन वा भवेत् ॥११७॥

उच्छ्रायः परिवाराणाम् एवं वैकुण्ठभाषितम् ।
अंसतुल्या हरेर्देवी ब्रह्माद्या परिवारवत् ॥११८॥

बलिपीठानि सर्वाणि पिण्डिकामानमानतः ।

[विमाने कीलकल्पनाद्यवसरः]

एवं प्रकल्प्य बिम्बानि विमाने कीलकल्पनम् ॥११९॥

ततस्तु कलशन्यासः प्रतिष्ठा तदनन्तरम् ।

॥ इति भार्गवतन्त्रे चतुर्थोऽध्यायः ॥

———

११७. a: A. M. संकुञ्चित for संकोचित;

११८. b: A. इत्थम् for एवं;
c: T. हंस for अंस०;

पञ्चमोऽध्यायः

[प्रतिष्ठाङ्गसंभारविवरणाध्यायः]

[प्रतिष्ठाक्रमे मण्डपादीनां कल्पनादिविषये जिज्ञासा]

अगस्त्यः

कथं नु भगवन् विष्णोः प्रतिष्ठां कारयेत्सुधीः ।
संभाराः के च सम्भार्यास्तत्र योग्याः ब्रवीतु मे ॥१॥

[मण्डपकुण्डस्वरूपादिनिर्देशः]

श्रीरामः

प्रासादस्याग्रतः कुर्यादधिवासनमण्डपम् ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥२॥

तृतीयावरणे यद्वा देशे योग्यावकाशके ।
बाहुदण्डैश्च दशभिश्चतुरश्रं मनोहरम् ॥३॥

चतुर्द्वारसमायुक्तं कल्पयेच्छिल्पवित्तमः ।
तन्मध्ये पञ्चभिर्हस्तैः चतुरश्रा मनोहरा ॥४॥

हस्तोच्छ्रायाथवार्धेन चतुरश्रेष्टकाचिता ।
तालत्रयात् बहिस्तस्याः कुण्डानि परिकल्पयेत् ॥५॥

चतुरश्रं भवेत्प्राच्यां याम्ये चापसमाकृतिः ।
वृत्तकुण्डं तु वारुण्यां सौम्ये कोणत्रयान्वितम् ॥६॥

---

१. c: A. M. संभार्याः के च संभाराः;
d: A. तत्प्रयोग्याः for तत्र योग्याः;

४. a: M. चक्षु for चतु°;
c: M. व्यस्तैः for हस्तैः;
d: A. चतुरश्रं मनोहरम्;
M. चक्षु for चतु°;

६. b: T. यामे for याम्ये;

चतुर्विंशाङ्गुलं सूत्रं विस्तारायामसम्मितम् ।
प्राग्भागे कल्पितं कुण्डं चतुरश्रं विधीयते ॥७॥

षष्ठ्यङ्गुलं भवेच्चापं ज्या तु षट्त्रिंशदंगुला ।
चापकुण्डं भवेदेतद्दक्षिणे वेदिका भुवः ॥८॥

द्वात्रिंशदङ्गुलं सूत्रं त्रिगुणेन प्रकल्पयेत् ।
उत्तरे वेदिकाभूमेः त्रिकोणं विद्यते स्फुटम् ॥९॥

पक्षसंख्याङ्गुलं सूत्रं मध्यतो भ्रामयेद्यदि ।
वृत्तकुण्डं भवेदेतद्वारुणे वेदिका भुवः ॥१०॥

सूत्रपातं पुरा कृत्वा विंशत्या चतुरङ्गुलैः ।
अगाधमवनीं खात्वा द्व्यङ्गुलं तद्बहिः पदे ॥११॥

[कुण्डमेखलाकल्पनप्रकारः]

मेखलायास्त्रयं कुर्यात् दृढयेष्टकया सुधीः ।
अथवा प्रकृतेर्बाह्ये चतुरङ्गुलमानतः ॥१२॥

मेखलायास्त्रयं कुर्यात् सुपक्वेष्टकया दृढम् ।
प्रथमा तालमाना स्यात् मध्यमाष्टाङ्गुलोन्नता ॥१३॥

चतुरङ्गुलमानैव चरमा मेखला भवेत् ।

[कुण्डे योनिकल्पनक्रमः]

पश्चिमे वाथवा याम्ये भागे योनिं प्रकल्पयेत् ॥१४॥

पक्षसंख्याङ्गुलायामां काहलाकृतिसन्निभाम् ।
मूलसूक्ष्मोर्ध्वविस्तीर्णां मध्ये निम्नां शिरो भुवि ॥१५॥

अश्वत्थदलवद्दृश्यां प्रतिकुण्डं प्रकल्पयेत् ।
मुमुक्षोर्नैव योनिः स्यात् कुण्डं वा सैकमेखलम् ॥१६॥

[प्रपादिकल्पनक्रमनिर्देशः]

प्रपां वा परिकुर्वीत चतुर्द्वारसमन्विताम् ।
समध्यवेदिकुण्डाढ्यामैशान्यां स्नानमण्डपम् ॥१७॥

---

१६. d: T. सैव मेखला for सैकमेखलम् ।

अङ्कुरार्पणभूभागं कल्पयेत सुरक्षितम् ।
दृढास्तिरस्करिण्यश्च बन्धनीया यथाविधि ॥१८॥

द्विहस्ता वा त्रिहस्ता वा वेदिका स्नानमण्डपे ।

[स्रुक्स्रुवोः कल्पनप्रकारः]

स्रुक्स्रुवौ कल्पनीयौ च रम्भापुष्पदलाननौ ॥१९॥

सूच्यग्रे सूकरमुखं घृतकुल्या निवेशनम् ।
सर्पिः कुण्डबभृद्वक्त्रं न सूकरमुखं स्रुवे ॥२०॥

मुखादधस्तात् कण्ठं च बाहुदण्डायतावुभौ ।
कन्दं वा कमलं वापि तयोर्मूले प्रकल्पयेत् ॥२१॥

[तोरणस्नानपीठादिकल्पनक्रमः]

तोरणानि च चत्वारि शूलत्रययुतानि च ।
अधः शाखाविहीनानि कल्पयेत्कलशोद्भव ॥२२॥

द्वाविंशत्यङ्गुलायामं तदर्धेन च विस्तृतम् ।
घनं चापि तदर्धेन कल्पयेदष्टमङ्गुलम् ॥२३॥

बिम्बप्रमाणानुगुणं स्नानपीठं प्रकल्पयेत् ।
ऋत्विजां पूजकानां च देशिकस्यासनानि च ॥२४॥

[पादुकादिसंभाराणां विवरणम्]

पादुके पादसदृशौ सर्वं स्याद्यज्ञवृक्षजम् ।
श्रीवत्सं पूर्णकुंभं च भेरीं दर्पणमण्डलम् ॥२५॥

मत्स्ययुग्मं तथा शंखं चक्रं काश्यपनन्दन ।
प्रत्येकमष्टावेतानि विलिखिदष्टमङ्गले ॥२६॥

कूर्माकारं लिखेत्तत्तदासनेष्वधिकारिणाम् ।
श्वेतौ रक्तौ तथा पीतौ नीलावष्टाविमे ध्वजाः ॥२७॥

---

१८. c: A. तिरस्करिण्याः for तिरस्करिण्यः;

२०. c: A. सर्पिः कडुबभृद्वक्त्रम्;

d: A. स्रवे for स्रुवे;

महाकुंभोपकुंभाश्च करकं मणिकं तथा ।
कलशाश्चापि सम्भार्याः दीपस्तम्भास्तथा घृतम् ॥२८॥

तैलं च दीपपात्राणि वर्तिनी सुगुणान्यपि ।
चन्दनानि सुगन्धानि पुष्पाणि सुरभीणि च ॥२९॥

वस्त्राणि च दुकूलानि कम्बलान्याविकानि च ।
व्याघ्रकृष्णाजिनादीनि शोभनान्यक्षतानि च ॥३०॥

समिधश्च कुशाः काशाः धान्यानि शयनासनम् ।
शिरोपधानं गण्डूषं तूलिकारत्नकम्बलम् ॥३१॥

विविधानि च धान्यानि रत्नानि विविधानि च ।
स्वर्णादिसप्तलोहानि गाः सवत्साः मनोहराः ॥३२॥

धूपद्रव्याणि कर्पूरं घनसारं च गुग्गुलम् ।
ताम्बूलं क्रमुकं माला हाराश्च कुसुमैः कृताः ॥३३॥

फलानि मकरन्दं च पयोदधि च शर्करा ।
गुडं च नेत्र सामग्री शलाके द्वे च हेमजे ॥३४॥

कुंभप्रतिकृतिः पञ्च भूषणानि च कङ्कणम् ।
कटाहं च जलद्रोणी सौवर्णकमलानि च ॥३५॥

तन्तवश्चापि कुंभानां पालिकाश्च घटादयः ।
शरावाश्चापि सामान्या मृद्भाण्डानि शुभान्यपि ॥३६॥

कन्यकारुचिराश्चापि रूपवत्यः स्वलङ्कृताः ।
धूपपात्रं दीपपात्रं घण्टाकर्पूरपङ्कजम् ॥३७॥

पाद्याचमनयोः पात्रमर्घ्यमावाहनाह्वयम् ।
नैवेद्यपात्रं पानीयभाजनं च प्रतिग्रहम् ॥३८॥

पादुकादर्पणं स्वर्णकङ्कतं घटदीपकम् ।
नीराजनस्याञ्जनस्य बलिदानस्य भाजनम् ॥३९॥

व्यजनं चातपत्रं च चामरं पुष्पभाजनम् ।
पिटकानि खनित्रं च करीषं काष्ठसंचयः ॥४०॥

---

२८. d: T. वृतम् for घृतम्,

३५. c: A. वा for च;

हविः पात्रं मेक्षणं च धमन्यो व्यजनानि च ।
आज्यपात्रं चरुस्थाली प्रणीता प्रोक्षणी तथा ॥४१॥

अष्टबन्धनवस्तूनि लाङ्गलं हेमनिर्मितम् ।
दक्षिणार्थं धनं पूर्णं वाद्यानि विविधान्यपि ॥४२॥

रूपवत्यश्च गणिकाः नृत्तगीतविशारदाः ।
वेदवेदाङ्गनिपुणाः ब्राह्मणाः भगवन्मयाः ॥४३॥

यात्रापीठं च देवस्य यानानि विविधान्यपि ।
बाहुप्रदीपाः विविधाः शुभदो मत्तवारणः ॥४४॥

सूत्राण्यपि शलाकाश्च सम्भार्या यज्ञकर्मणि ।

॥ इति भार्गवतन्त्रे पञ्चमोऽध्यायः ॥

---

४३. b: A. गीति for गीस,

षष्ठोऽध्यायः

[प्रतिष्ठाविषयविवेचनाध्यायः]

[प्रतिष्ठाविषयकजिज्ञासोपस्थापनम्]

प्रतिष्ठा कीदृशी ब्रह्मन् प्रतिष्ठाता तु कीदृशः ।
को वा कालः प्रतिष्ठायाः शुभदः सर्वदेहिनाम् ॥१॥

कीदृशोऽप्यधिकारी वा कथं वा तत्समाप्यते ।
जामदग्न्यपरं धामन् कृपया ब्रूहि मे प्रभो ॥२॥

[प्रतिष्ठाक्रमे यजमानलक्षणम्]

श्रीरामः

श्रद्धया परया युक्तः कल्याणहृदयः स्वयम् ।
आस्तिको देवदेवेशे न्यस्तचित्तः स्वयं प्रभुः ॥३॥

अप्रमेयं धनं धान्यम् उत्साहश्च इमे त्रयः ।
वसन्त्यविरतं यत्र स प्रतिष्ठापको भवेत् ॥४॥

परिशुद्धश्च दक्षश्च कृतज्ञो गुरुपङ्क्तिषु ।
अलोभयति कार्याणि यः स एवारभेत् क्रियाम् ॥५॥

चातुर्वर्ण्योऽनुलोमो वा ज्ञातिभिः सकलैर्युतः ।
आचार्यं पुरतः कृत्वा प्रतिष्ठां तेन साधयेत् ॥६॥

[प्रतिष्ठाक्रमे आचार्यस्य लक्षणम्]

पाञ्चरात्रविदं शान्तं सर्वसिद्धान्तकोविदम् ।
निःस्पृहं निर्जितद्वन्द्वं सर्वदोषविवर्जितम् ॥७॥

ऋजुबुद्धिं सदा ब्रह्मध्यानैकनिरतं शुभम् ।
आद्यवर्णं भागवतं नारायणपरायणम् ॥८॥

---

३. d: T. प्रभौ for प्रभुः;

४. a: A. अप्रमेयधनं धान्यम्;

प्रतिष्ठोत्सवकार्येषु प्रायश्चित्तादिकर्मसु ।
निपुणं वरयेत्पूर्वमाचार्यत्वे सुबुद्धिमान् ॥९॥

[प्रतिष्ठासम्पादनार्थमृत्विगादिविचारः]

ततस्तेनैव गुरुणा ऋत्विजः षोडशाथवा ।
अष्टौ वा चतुरो यद्वा त्रीन् द्वौ वा वरयेत् सुधीः ॥१०॥

अलाभे ऋत्विजां यज्ञं गुरुरेकः समापयेत् ।
एकाध्वरविधानेन यथावत्कलशोद्भव ॥११॥

[आचार्यवरणक्रमे निषिद्धाः]

वानप्रस्थो यतिश्चापि ब्राह्मणादितरे त्रयः ।
नैवाधिकारिणः सर्वे पञ्चसंस्कारवर्जिताः ॥१२॥

न कुण्डगोलकौ नैव भवेयुरनुलोमजाः ।
कर्माधिकारिणो नैव जात्या ब्राह्मणयोनयः ॥१३॥

[आचार्यवरणक्रमः]

विधुरोऽप्यधिकारी स्यात् गुरुत्वे ज्ञानगौरवात् ।
एवं विचार्य सकलमाचार्यं वरयेत्पुरा ॥१४॥

समये यजमानस्तु गां भुवं काञ्चनं तथा ।
नारिकेलं च कर्मादावाचार्याय प्रदापयेत् ॥१५॥

[प्रतिष्ठाक्रमे ग्राह्याग्राह्यकालविवेकः]

प्रतिष्ठाकालमधुना वक्षे श्रृणु मुनीश्वर ।
मुख्यं पूर्वायनं प्रोक्तं जघन्यं दक्षिणायनम् ॥१६॥

ध्रुवबेरप्रतिष्ठायां मुख्यमेवायनं वरम् ।
जघन्यं कर्मबिम्बानां दोषाय न कदाचन ॥१७॥

प्रतिष्ठाकरणे त्याज्यं पितृमासचतुष्टयम् ।
मासेष्वन्येषु सर्वेषु कारयेदविचारयन् ॥१८॥

बाल्यं च सोमपुत्रस्य मौढ्यं च गुरुशुक्रयोः ।
उपरागयुतं मासं सर्वथा परिवर्जयेत् ॥१९॥

---

१७. b: T. परम् for वरम्;

यद्वा पक्षं पुरस्ताच्च परस्ताच्च परित्यजेत् ।
दुर्दिनं रविसङ्क्रान्तिमतिमासं मलाह्वयम् ॥२०॥

गण्डातिगण्डयोगानि सर्वथा परिवर्जयेत् ।
अर्कारवारौ मन्दस्य वारं विष्टं च वर्जयेत् ॥२१॥

अमारिक्ताष्टमीतिथ्यः वर्जनीयाः प्रयत्नतः ।
कृत्तिका भरणी जेष्ठा सर्वरौद्रद्विदैवतम् ॥२२॥

त्रीणि पूर्वाणि पितृभं निन्दितानि परित्यजेत् ।
आसुरं मारुतं चित्रा श्रविष्ठा शततारकम् ॥२३॥

नात्युच्चं नातिनीचं च समं ग्राह्यं मनीषिभिः ।
पापदृग्योगसहितमष्टमे ग्रहसंयुतम् ॥२४॥

दशमे पापसंयुक्तं तल्लग्नं परिवर्जयेत् ।
एवं विलोक्य नितरां सह मौहूर्तिकैर्गुरुः ॥२५॥

विलोक्य गुणसंवाधं गुणग्रामं च शास्त्रतः ।
यजमानग्रामधाम्नामनुकूले समाचरेत् ॥२६॥

ईदृशं मङ्गलदिनं विनिश्चित्य द्विजोत्तमैः ।
आरभेत प्रतिष्ठातुं देशिकः शास्त्रसारवित् ॥२७॥

[अङ्कुरमृत्संग्रहणात् पूर्वं सम्पादनीयानि कृत्यानि]

तदर्थं यजमानश्च ऋत्विजश्च गुरूत्तमः ।
अनुकूले शुभे काले स्नायासुः क्षुरकर्मणा ॥२८॥

स्नाताश्शुद्धाम्बरधरास्सर्वालङ्कारभूषिताः ।
आहूय रथकारं च कुलालमपि शिलिपनः ॥२९॥

आचार्यस्तोषयित्वा तान्विसृज्यानु च शिलिपना ।
नेत्राण्युन्मीलय विधिवत् कर्मबिम्बेषु शिलिपनः ॥३०॥

तोषयित्वा धनैर्वस्त्रैः मनः प्रह्लादनैरपि ।
निर्गमय्याथ पुण्याहं वाचयेत्सर्वशुद्धये ॥३१॥

---

२२. d: T. सर्प for सर्व०;

२३.. d: T. तत० for शत०;

२६. c: A. यज्ञान for यजमान;

गोमयालेपिते भूमौ रङ्गबल्या परिष्कृते ।
धान्यपीठे न्यसेत् कुंभं साक्षतं सूत्रवेष्टितम् ॥३२॥

शरावकूर्चपत्राढ्यं तत्रावाह्य श्रियः पतिम् ।
गायत्र्या चैव वैष्णव्या समभ्यर्च्याक्षतादिभिः ॥३३॥

अब्लिङ्गैः पवनैर्मन्त्रैः पवमानैः पवित्रकैः ।
शान्तिमन्त्रैश्च ऋत्विग्भिः जप्त्वा व्याहृतिविद्यया ॥३४॥

पीठं संक्षालितं बिम्बमासादितशुभोदकैः ।
प्रोक्षयेदङ्कुरायाथ मृत्सङ्ग्रहमाचरेत् ॥३५॥

[अंकुरार्थं मृत्सङ्ग्रहक्रमः]

आजानुपादौ प्रक्षाल्य हस्तौ चामणिबन्धनात् ।
त्रिराचम्य मृदा पुण्ड्रैरलङ्कृत्य पवित्रवान् ॥३६॥

पिटकं च खनित्रं च शोधयित्वा शुभोदकैः ।
वस्त्रैर्गन्धैश्च माल्यैश्च खनित्रं भूषितं पुरा ॥३७॥

शिरसा धारयेदृत्विगथवा परिचारकः ।
ब्राह्मणैः शाकुनं सूक्तं पठद्भिः वाद्यमङ्गलैः ॥३८॥

बाहुप्रदीपैर्विमलैः पूजोपकरणैः सह ।
दिशं प्राचीमुदीचीं वा शुभां भूमिं समाश्रयन् ॥३९॥

आसीनः प्राङ्मुखो भूत्वा प्राणानायम्य देशिकः ।
भूतग्रामं विशोध्याथ पुण्याहमपि वाचयेत् ॥४०॥

'व्याहृत्या' प्रोक्षयेद्भूमिं खनित्रं पिटकं तथा ।
'भूमिसूक्तेन' धरणीम् ऋत्विग्भिरभिमन्त्रयेत् ॥४१॥

समुद्रवसनां देवीं पर्वतस्तनमण्डिताम् ।
रत्नगर्भां गुरुर्ध्यायेत् वसुधां सस्यसालिनीम् ॥४२॥

---

३२. a: A. आलिपिते for आलेपिते;

३३. c: T. गायत्र्यृचैव for गायत्र्या चैव;

३८. d: A. प्राद्य० for वाद्य०;

४१. d: T. अपि for अभि;

४२. d: A. सस्यमालिनीम् for सस्यसालिनीम् ।;

आवाह्य भूमिमन्त्रेण भूमिं भूमौ समर्चयेत् ।
अर्घ्यपाद्यादिभिर्गन्धैः पुष्पैर्नानाविधैरपि ॥४३॥

धूपैर्दीपैश्च नैवेद्यैः विविधै रसनाप्रियैः ।
स्तोत्रेणाभिष्टुयाद्देवीं वसुधां रत्नमण्डिताम् ॥४४॥

[मृत्सङ्ग्रहक्रमे भूस्तुतिः]

सर्वभूतधरे कान्ते सर्वलोकनमस्कृते ।
विष्णुपत्नि जगद्धात्रि वसुधे सस्यमालिनि ॥४५॥

पुण्यकाननकेशाढ्ये पर्वतस्तनमण्डिते ।
समुद्रवसने देवि नदीविषयवासिनि ॥४६॥

वल्मीकश्रवणे वेदभाषिणि श्रुतिसेविते ।
फुल्लाम्बुजेक्षणे देवि प्रसीद हरिवल्लभे ॥४७॥

नमस्ते भुवनेशाने नमः सर्वसुरार्चिते ।
नमो भार्गवि मे मातः प्रणतोऽस्मि वसुन्धरे ॥४८॥

विष्णुशक्तिसमुद्भूते शङ्खवर्णे महेश्वरि ।
अनेकरत्नसङ्कीर्णे भूमि तुभ्यं नमो नमः ॥४९॥

इति स्तुत्वा च नत्वा च ध्यात्वा विमलचेतसा ।

[मृत्सङ्ग्रहमन्त्रनिर्देशः]

'अश्वक्रान्ते'ति मन्त्रेण खनित्रेण गुरूत्तमः ॥५०॥

मृदं समग्रां गृह्णीयात् प्राङ्मुखः क्रोडविद्यया ।

[मृदानयनं गुर्वादिसम्माननं च]

तां मृदं मूलमन्त्रेण पिटके वेत्रनिर्मिते ॥५१॥

आच्छाद्य नव वस्त्रेण मन्त्रेणा'स्त्रे'ण देशिकः ।
स्वयं गृहीत्वा शिरसा ब्राह्मणैः स्वस्तिपाठकैः ॥५२॥

विविधैर्मङ्गलैरन्यैः प्रविशेन्मन्दिरं गुरुः ।
धाम प्रदक्षिणीकृत्य अङ्कुरार्पणमण्डपे ॥५३॥

विन्यसेत्तां मृदं पश्चात् यजमानो गुरुं तथा ।
ऋत्विजो वस्त्रगन्धाद्यैः पुष्पैः पञ्चाङ्गभूषणैः ॥५४॥

हारोपवीतकटककेयूराङ्गुलिभूषणम् ।
पञ्चाङ्गभूषणमिदं कथितं कमलोद्भव ॥५५॥

[पालिकास्थापनमङ्कुरधान्यसंस्कारः तत्तद्देवताराधनञ्च]

अथ तेऽलङ्कृताः सम्यक् अङ्कुरार्पणभूतले ।
पुण्याहं वाचयित्वाथ प्रोक्षयेत् पालिकादिकम् ॥५६॥

पालिका द्वादशाहृत्य तासां कण्ठं तृणादिभिः ।
बद्ध्वाऽपूर्य मृदा पश्चादङ्कुरार्पणभूतले ॥५७॥

गोमयेन समालिप्तां रङ्गवल्या परिष्कृताम् ।
आसाद्य धान्यैः सम्पूर्णैः पीठं तत्र प्रकल्पयेत् ॥५८॥

प्रागायतानि पञ्चैव तथा तिर्यञ्चि पातयेत् ।
सूत्राणि षोडशपदे मध्ये पदचतुष्टयम् ॥५९॥

सोमकुंभाय सम्मार्ज्य परितः पालिकास्पदम् ।
'पौरुषे'णैव मन्त्रेण पालिकास्थापनं चरेत् ॥६०॥

सोमकुंभमलङ्कृत्य गन्धैः पुष्पैश्च साक्षतैः ।
सूत्रैर्वस्त्रैश्शरावेण कूर्चेन च यथाक्रमम् ॥६१॥

विन्यस्याङ्कुरधान्यानि गोधूमव्रीहिसाढकी ।
मुग्दं सचणकं राजमाषं च सतिलं तथा ॥६२॥

माषं कलुत्थमेतानि धान्यानि नव चाहरेत् ।
संक्षाल्य 'विष्णुगायत्र्या' चाप्लुत्य पयसा गवाम् ॥६३॥

'ऋतं सत्ये'ति मन्त्रेण ब्रह्मावाह्य समर्चयेत् ।
गन्धोदकेन सम्पूर्य सोमकुम्भं सरत्नकम् ॥६४॥

'सन्ते पयांसि' मन्त्रेण सोममावाह्य पूजयेत् ।
पालिकासु द्वादशसु विष्णोरावाहनं चरेत् ॥६५॥

---

५५. a: b: c: d: A. om.

५६. b: T. तथा तिर्यग्विपातयेत्;

६३. a: A. कलोत्थम् for कलुत्थम्;

६४. b: A. समर्पयेत् for समर्चयेत्;

'तदस्योरु' 'प्रतद्विष्णु'र्यस्योरु'च परे उभे।
'विचक्रमे' 'ध्रुवासोऽस्य' 'त्रिर्देवश्च' 'प्रविष्णकम' ॥६६॥

'अतो देवा' 'इदं विष्ण'रिति मन्त्रैर्यथाक्रमम।
पालिकासु सकूर्चासु प्रागादीशावसानकम् ॥६७॥

आवाह्य गन्धपुष्पाद्यैरर्चयित्वा ततः परम।

[होमप्रकारः]

प्राग्भागे पालिकावेद्याः स्थण्डिलं परिकल्पयेत् ॥६८॥

अग्निं संसाध्य विधिवत् सर्पिषाष्टोत्तरं शतम्।
'सन्ते पयांसि'मन्त्रेण हुत्वा सम्पातमाहरेत् ॥६९॥

'इदं विष्णुरि'ति श्रुत्या हुत्वा पूर्णाहुतिं गुरुः।

[बीजावापरक्षणादिप्रकारः]

सम्पाताज्येन संसिञ्चेद्बीजपात्रं च पालिकाः ॥७०॥

सोमकुंभे पुनः सोममभ्यर्च्य च निवेद्य च।
'द्वादशाक्षर'मन्त्रेण बीजावापं समाचरेत् ॥७१॥

आचार्यो वापयेद्बीजं तूष्णीमन्ये च ऋत्विजः।
'मूर्धानमि'ति मन्त्रेण मृद्भिराच्छादयेत्ततः ॥७२॥

'इमं मे वरुणे'त्येव पयसा सेचयेदपि।
अनिर्वाणं ततो दीपं रक्षेन्नक्तं दिवं मुदा ॥७३॥

सोमकुम्भार्चनं नित्यं यावत्कर्म समाप्यते।
पालिकाराधनं कुर्यात् सायं प्रातर्निवेदयेत् ॥७४॥

॥ इति भार्गवतन्त्रे षष्ठोऽध्यायः ॥

---

६६. b: A. उरं for उरु; T. परो for परे;

सप्तमोऽध्यायः

[वास्तुपूजाबिम्बजलाधिवासविवरणाध्यायः]

[वास्तुपूजायाः प्रयोजननिर्देशः]

रामः

अङ्कुराण्यर्पयित्वैवं वास्तुपूजां समाचरेत् ।
विमानमण्डपादीनां प्राकाराणाञ्च शुद्धये ॥१॥

शान्तये सर्वदोषाणां क्रियमाणस्य कर्मणः ।
निर्विघ्नेन समाप्त्यर्थं वास्तुपूजा प्रशस्यते ॥२॥

[वास्तुपूजाप्रकारः]

कुशैः काशैस्तृणैश्चापि वास्तुनाथस्य विग्रहम् ।
कृत्वा सर्वाङ्गसम्पूर्णं वाससा भूषणेन च ॥३॥

कुसुमैरप्यलङ्कृत्य मण्डपे दक्षिणे भुवि ।
सप्तदर्भकृतं कूर्चं कृत्वोरसि नियोजयेत् ॥४॥

पुण्याहवारिभिः प्रोक्ष्य पूजयेद्वास्तुनायकम् ।
वास्त्वीशाष्टाक्षरेणैव कूर्चे आवाह्य देशिकः ॥५॥

'असुनीते'ति मन्त्रेण कुर्यात्प्राणं प्रतिष्ठितम् ।
अर्घ्यैः पाद्यैस्तथाचामैर्गन्धैः पुष्पैस्तथाक्षतैः ॥६॥

धूपैर्दीपैश्च नैवेद्यैस्ताम्बूलैर्वासनायुतैः ।
अर्चयित्वा यथाशास्त्रं तोषयित्वा यथावसु ॥७॥

[वास्तुपूजाङ्गहोमः वास्तुशेषपरित्यागादिकञ्च]

पश्चिमे वास्तुनाथस्य जुहुयाज्जातवेदसि ।
'पञ्चोपनिषदै'र्मन्त्रैः सर्पिषा जुहुयाच्छतम् ॥८॥

शम्यपामार्गखदिरसमिद्भिश्च यथाक्रमम् ।
'वास्त्वीश'मूलमन्त्रेण ह्यष्टावष्टौ पृथक् पृथक् ॥९॥

'वास्तोस्पते प्रतीत्यादि' ऋग्भिश्चापि चतसृभिः ।
चरुणा जुहुयादग्नौ ततो 'वास्त्वीश'मूलतः ॥१०॥

अष्टोत्तरशतं वारान् सर्पिषा जुहुयात्पुनः ।
'इदं विष्णु'रिति श्रुत्या हुत्वा पूर्णाहुतिं ततः ॥११॥

दग्ध्वा वास्तुप्रतिकृतिं 'परिवाजे'ति वै ऋचा ।
पर्यग्निकरणं कृत्वा धाम तन्मण्डपादिकम् ॥१२॥

ईशानभागे ग्रामस्य वास्तुशेषं परित्यजेत् ।
ततः स्नात्वा विधानेन पुण्याहप्रोक्षणं चरेत् ॥१३॥

[मानादिप्रयुक्तदोषशान्तिप्रकारः]

मानोन्मानप्रमाणादेर्हानिवृद्ध्यघशान्तये ।
प्रतिमालयपीठानां शान्तिहोमं समाचरेत् ॥१४॥

पीठे बिम्बानि विन्यस्य क्षालयित्वा शुभोदकैः ।
पीठानि च तथा धामाद्यालिंपेद्गोमयादिभिः ॥१५॥

बिम्बानां पुरतो वह्निं प्रतिष्ठाप्य समीदलैः ।
साक्षतैर्व्याहृतीभिश्च होमश्चाष्टोत्तरं शतम् ॥१६॥

पूर्णाहुत्यवसाने तु वह्न्युपस्थानमाचरेत् ।
'नमस्तुभ्यं भगवते जातवेदःस्वरूपिणे ॥१७॥

नारायणाय हव्यस्य कव्यस्य च यथाक्रमम् ।
होत्रे यष्टव्यदेवानामात्मने परमात्मने ॥१८॥

सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः ।'
इत्युपस्थाय मेधावी शुद्धस्नपनमाचरेत् ॥१९॥

[बिम्बाधिवासक्रमे घृतस्नानप्रकारः]

बिम्बानां पुरतः कुंभं धान्यपीठे निवेशयेत् ।
सूत्रवेष्टितसर्वाङ्गं गन्धवस्त्राद्यलङ्कृतम् ॥२०॥

---

१५. c: A. यामात् for धामाद्;
d: A. आलिपेत् for °द्यालिंपेत्;

१६. a: A. परतो for पुरतो;

१८. b: A. यथातथम् for यथाक्रमम्;

१९. c: T. उपस्थाप्य for उपस्थाय;

आढकद्वयमात्रेण गोधूतेन प्रपूरितम् ।
सकूर्चं पल्लवयुतं शरावेणावकुण्ठितम् ॥२१॥

संस्थाप्य कृत्वा पुण्याहं प्रोक्षयित्वा यथाविधि ।
वासुदेवं समावाह्य 'द्वादशाक्षर'विद्यया ॥२२॥

अभ्यर्च्य गन्धपुष्पाद्यैर्नैवेद्यान्तं यथाक्रमम् ।
'घृतं मिमिक्षि' मन्त्रेण घृतेन स्नपनं चरेत् ॥२३॥

'मानस्तोके'ति मन्त्रेण स्नापयेदुष्णवारिभिः ।
ततो बिम्बानि सर्वाणि भूषयित्वा नवाम्बरैः ॥२४॥

भूषणैर्गन्धमाल्यैश्च यथाविधि यथावसु ।

[जलाधिवासप्रकारः]

जलाधिवासं कुर्वीत नद्यादौ मङ्गलोदके ॥२५॥

जलाधिवासायोग्यानां त्रिवस्तुकमृदात्मनाम् ।
चित्राणां पटजानां वा गुरूणां च शिलादिषु ॥२६॥

छायाधिवासं कुर्वीत प्रतिष्ठातन्त्रसारवित् ।
जलद्रोण्यां कटाहे वा समुद्धृत्य महज्जलम् ॥२७॥

धान्यराशौ विनिक्षिप्य गन्धैस्तदधिवास्य च ।
गङ्गाद्यास्सरितस्तत्र समावाह्य समर्चयेत् ॥२८॥

अष्टाविंशतिभिर्दर्भैः कृतं कूर्चं विनिक्षिपेत् ।
तत्र देवं समावाह्य पूजयित्वा यथाविधि ॥२९॥

संहारक्रममाचार्यः संस्मरेत्तत्र तन्त्रवित् ।
चक्रमुद्रां दर्शयित्वा रक्षाकुम्भार्चनं चरेत् ॥३०॥

धान्यपीठेऽथ तत्पार्श्वे तोयपूर्णान् घटान् नव ।
सालङ्कारान् सकरकान् सरत्नान् लोहसंयुतान् ॥३१॥

संस्थाप्य मध्ये ब्रह्माणं करके चायुधेश्वरम् ।
इन्द्रादिदिक्पतीनन्यकलशेष्वर्चयेद् बुधः ॥३२॥

---

३०. b: A. देशिकः for तन्त्रवित्;

सर्वाण्यङ्गानि बिम्बस्य वेष्टयेन्नववाससा ।
'रक्षोहणे'ति मन्त्रेण सिद्धार्थान् विकिरेद्बुधः ॥३३॥

देवीनां तु श्रियादीनां त्रयोविंशतिभिः कुशैः ।
पञ्चविंशतिभिर्दर्भैः रुद्रस्य परमेष्ठिनः ॥३४॥

द्वाविंशद्भिः कुशैः कूर्चं कुर्यादन्यामृताशिनाम् ।
आरोप्य याने बिम्बानि वेदवाद्यसमन्वितम् ॥३५॥

सर्वमङ्गलसंयुक्तं प्रापयेच्च नदीतटम् ।
तीरे निवेश्य नद्यादेः प्रोक्ष्य पुण्याहवारिणा ॥३६॥

शोषयेद्वायुबीजेन 'वह्निमन्त्रेण' दाहयेत् ।
सुधाक्षरेण संप्लाव्य गङ्गामावाह्य पूजयेत् ॥३७॥

एवं शुद्धे नदीतोये पीठं तत्र विनिक्षिपेत् ।
कल्पयित्वा योगपीठं बिम्बं प्राक्शिरसं न्यसेत् ॥३८॥

शाययेच्च समभ्यर्च्य संहारं चिन्तयेत्ततः ।
चक्रमुद्रां प्रदर्श्याथ नदीतीरे यथापुरम् ॥३९॥

रक्षाकुम्भार्चनं कुर्यात् सिद्धार्थान् दिक्षु पातयेत् ।
आरोपयेदनिर्वाणान् दीपान् अपि सुवर्चसः ॥४०॥

त्रयी प्रवर्तनं कुर्यात् ब्राह्मणैः वेदपारगैः ।
तस्मिन् जले न कुर्वीरन् स्नानपानादिकाः क्रियाः ॥४१॥

वाद्यानि च विचित्राणि घोषयेयुः समन्ततः ।
त्रिरात्रमेकरात्रं वा यद्वा यामं मुहूर्तकम् ॥४२॥

जलाधिवासं कुर्वीत तत्र नद्याद्यसंभवे ।
कटाहे वा जलद्रोण्यां बिम्बानामधिवासनम् ॥४३॥

॥ इति भार्गवतन्त्रे सप्तमोऽध्यायः ॥

---

३३. d: A. बलिः for बुधः,

३५. b: T. अन्यावृताशि° for अन्यामृताशि०;

३९. c: A. प्रदृश्य for प्रदर्श्य;

४३. b: A. तत्तु for तत्र;

अष्टमोऽध्यायः

[प्रतिष्ठाङ्गभूतप्रतिमानेत्रोन्मीलनादिनिरूपणाध्यायः]

[यागमण्डपालङ्करणप्रकारः]

श्रीरामः

यागमण्डपमासाद्य यजमानेन देशिकः ।
स्थूणांश्च मण्डपे तस्मिन् वासोभिर्वेष्टयेन्नवैः ॥१॥

वितानयेच्छुभैर्वस्त्रैः पताकाभिश्च भूषयेत् ।
मुक्तादामभिरन्यैश्च कदलीक्रमुकादिभिः ॥२॥

सफलैर्दर्भमालाभिर्मणिकाञ्चनभूषणैः ।
शोभयेन्मण्डपं सर्वं तोरणानि च बन्धयेत् ॥३॥

खात्वा द्वितालं धरणीं द्वारे द्वारे चतुर्दशम् ।
स्थापयेदपि पूर्वादिपताकाश्चापि बन्धयेत् ॥४॥

अश्वत्थोदुम्बरवटप्लक्षक्लृप्तानि वै क्रमात् ।
शोभयित्वा यथादृश्यं दीपानुद्दीप्य सर्वतः ॥५॥

[अधिवासितबिम्बोत्थापनम् यागमण्डपानयनं च]

अपराह्णे तु सम्प्राप्ते काले संकलिपते गते ।
उत्थाप्य बिम्बान्युदकात् कुम्भाच्च कलशादपि ॥६॥

उद्वास्य देवताः सर्वाः प्रतिमास्तीरविष्टरे ।
निवेश्य प्राङ्मुखं शुद्धैर्वारिभिः क्षालयेद्गुरुः ॥७॥

लोहजानि च बिम्बानि तिन्त्रिणीफलवारिणा ।
वस्त्राभरणपुष्पाद्यैरलङ्कृत्य विचक्षणः ॥८॥

यानमारोप्य विप्रेन्द्रैर्वेदवाद्यादिमङ्गलैः ।
प्रादक्षिण्येन वै धाम्नो गमयेद्यागमण्डपम् ॥९॥

---

५. b: A. सप्तानि for क्लृप्तानि;

उत्तरे विष्टरे बिम्बं प्राङ्मुखं विनिवेशयेत् ।
तत उत्थाप्य कूर्चानि बिम्बे तां शक्तिमुद्वसेत् ॥१०॥

कुम्भेभ्यः देवताः सर्वाः पूर्ववच्च विसर्जयेत् ।

[प्रतिमानयनोन्मीलनक्रमः]

नयनोन्मीलनं कुर्यात् बिम्बानां तु यथाविधि ॥११॥

सौवर्णं राजतं चापि पात्रयुग्मं शलाकया ।
राजत्या स्वर्णमय्या च धान्यराशौ निवेशयेत् ॥१२॥

सौवर्णं पूर्वदिग्भागे पश्चिमे राजतं न्यसेत् ।
परितः कलशानष्टौ चणकैः [परिपूरितान् ॥१३॥

स्थापयेद्वाचयेत्पश्चात् पुण्याहं प्रोक्षयेदपि ।
आवाहयेन्मधुघटे 'उद्वयं तमसे'त्यृचा ॥१४॥

आदित्यमितरेऽपीन्दुं 'सोमोधेंन्वि'ति [विद्यया ।
सम्पूज्य गन्धपुष्पाद्यैर्द्वे पात्रे सशलाकिके ॥१५॥

'मधुत्रयेण' च मधु 'सविराजेति' वै घृतम् ।
कन्यकारुचिराश्चाष्टौ गाः सवत्साः मनोहराः ॥१६॥

स्थापयित्वाथ तत्पार्श्वे त्रयी घोषं प्रवर्तयेत् ।
शलाकया च सौवर्ण्या मध्वाक्तमुखया गुरुः ॥१७॥

उन्मील्य दक्षिणं नेत्रं राजत्या च घृताक्तया ।
उन्मीलनं तु वामाक्ष्णः दक्षिणोत्तरयोर्मनुः ॥१८॥

'चित्रं देवा' च 'तच्चक्षु'रिति मन्त्रद्वयं स्मृतम् ।
एवमुन्मील्य नेत्रे द्वे आच्छादनपटं त्यजेत् ॥१९॥

मकरन्दश्च सर्पिश्च चणकं चापि कन्यकाः ।
गाः सवत्साश्च देवाय दर्शयेद्देशिकोत्तमः ॥२०॥

———————

१३. d: T. अभि० for परि०;
१८. b: A. घृतात्तया for घृताक्तया;
१९. a: T. चित्रं देवानां तच्चक्षु०;
२०. a: A. मकरन्दं for मकरन्दः;

सर्वेषामपि बिम्बानामेवमुन्मीलनं दृशाम् ।

[प्रतिसरबन्धनावसरनिर्देशः]

कौतुकं तु करे धार्यं स्नपनेऽम्बवधिवासने ॥२१॥

प्रतिष्ठायां च बिम्बानाम् आचार्यस्यापि ऋत्विजाम् ।
तत्प्रकारमितो वक्ष्ये शृणु कुम्भसमुद्भव ॥२२॥

[प्रतिसरपरिकल्पनम्]

सौवर्णं वाथ कौशेयं कार्पासं वा यथावसु ।
सप्तभिर्पञ्चभिर्वापि सूत्रैः प्रतिसरं भवेत ॥२३॥

निष्कप्रमाणस्वर्णेन कौतुकं परिकल्पयेत् ।

[कौतुकसंस्कारः कौतुकबन्धनप्रकारश्च]

कमले तण्डुलैः पूर्णे ताम्बूलीदलशोभिते ॥२४॥

कदलीनारिकेराद्यैः फलैश्च परिमण्डिते ।
विन्यस्य तत्र सूत्राणि प्रोक्ष्य पुण्याहवारिभिः ॥२५॥

सुदर्शनं हेतिराजं तत्रावाह्य समर्चयेत् ।
सुदर्शनषडर्णेन सप्तवाराभिमन्त्रणम् ॥२६॥

अङ्गुष्ठानामिकाभ्यां तु चन्दनक्षोदवारिणा ।
आलिपेत् कौतुकं सम्यगपराजितविद्यया ॥२७॥

मूलमन्त्रेण देवस्य बध्नीयाद्दक्षिणे करे ।
देवीनां तु श्रियादीनां वामे कौतुकमङ्गलम् ॥२८॥

आचार्याणां मूर्तिपानामङ्कुरार्पणकर्मणि ।
कौतुकं दक्षिणे हस्ते येन दीक्षा प्रसिध्यति ॥२९॥

मन्त्रस्तु देवदेवीनामन्यासां वा मुनीश्वर ।
बन्धने स्व स्व विद्यैव चक्रमन्त्राभिमन्त्रणम् ॥३०॥

विश्वेतातेति मन्त्रेण बन्धनं कौतुके गुरोः ।
ऋत्विजामपि सर्वेषां यो ब्रह्मेत्यभिमन्त्रणम् ॥३१॥

वृहत्सामेति मन्त्रेण रक्षैषां धूपभस्मना ।
प्रणम्य पुण्डरीकाक्षं द्वादशाक्षरविद्यया ॥३२॥

[स्नपनकुंभानां स्थापनक्रमः]

स्नानपीठें तु बिम्बानि समारोप्य गुरूत्तमः ।
कलशान् सप्तदश च धान्यपीठे निवेशयेत् ।।३३।।

घृतकुम्भं पदे ब्राह्मे सोष्णमम्बु दिवस्पतौ ।
फलोदकं यमपदे स्नानीयं वारुणे दिशि ।।३४।।

सौम्ये भवेदक्षताम्बु वह्नौ तु मणिजीवनम् ।
यातुधाने लोहतीर्थं गन्धतीर्थं तु मारुते ।।३५।।

सोमैशानयोरक्षतयवे प्राच्यां पादाम्बु कल्पनम् ।
अर्घ्यतीर्थं पदे याम्ये आचामं वारुणे दिशि ।।३६।।

पञ्चगव्यमुदीचीने दध्यग्नौ नैर्ऋते पयः ।
मारुते मधु भूतेशे काषायाम्बुप्रकल्पनम् ।।३७।।

[होमाभिषेचनक्रमः]

देवतावाहनं कृत्वा तत्तन्नामभिरष्टधा ।
आवृत्य जुहुयादग्नौ सम्पातं तत्र सेचयेत् ।।३८।।

मन्त्रस्तु वैष्णवः सूक्तः पुंसूक्तेनाभिषेचनम् ।
घृतकुम्भस्य मन्त्रस्तु गायत्री वैष्णवी मता ।।३९।।

[बिम्बाधिवासनप्रकारः]

शाययेद्वेदिकामध्ये शालितण्डुलकल्पिते ।
सतिले मञ्चमारोप्य कृष्णाजिनपरिष्कृतम् ।।४०।।

तूलिकां तत्र विन्यस्य रत्नकंबलमण्डिताम् ।
क्षौमं च चित्रवस्त्रं च गण्डूषाणि च विन्यसेत् ।।४१।।

---

३४. a: T. भवेत् for पदे;
३६. a: A. अक्षतयवे सोमेशाने;
c: A. प्राच्यां for याम्ये;
३९. b: T. वा० for °ना०;
४१. d: A. गण्डूकानि for गण्डूषाणि;

शिरोपधानं च तथा सुगन्धैरधिवासयेत् ।
'इदं विष्णु'रिति प्रायैर्मन्त्रैः परमपावनैः ॥४२॥

शाययेद्देवदेवेशं सांगं वै दक्षिणे शिरः ।
कम्बलैश्च दुकूलैश्च प्रतिमां छादयेद्गुरुः ॥४३॥

[कुम्भस्थापनप्रकारः]

आशास्वष्टस्वष्टकुम्भान् सूत्रवस्त्रादिवेष्टितान् ।
सकूर्चान् पल्लवयुतान् सरत्नान् स्वर्णसंयुतान् ॥४४॥

वेष्टितान् वस्त्रयुग्मेन यद्वैकेन समष्टिना ।
गन्धोदकेन सम्पूर्णान् धान्यपीठे निवेशयेत् ॥४५॥

शालीनां तण्डुलानूर्ध्वं तेषामूर्ध्वं तिलं भवेत् ।
अन्तरान्तरवस्त्राढ्यं धान्यपीठमिदं स्मृतम् ॥४६॥

तत्तत्प्रतिकृतिं तत्र सौवर्णीं विनिवेशयेत् ।
कुम्भानामन्तरालेषु विन्यसेदष्टमङ्गलान् ॥४७॥

अपिधाय शरावेण नालिकेरादिभिः फलैः ।
अलङ्कृत्य यथायोग्यं महाकुम्भं तु पश्चिमे ॥४८॥

करकेण समायुक्तं नवरत्नसमन्वितम् ।
सर्वलोहयुतं सर्वगन्धयुक्तं सकूर्चकम् ॥४९॥

पिप्पलच्छदसंयुक्तं मूलप्रतिमयान्वितम् ।
सूत्रवेष्टितसर्वाङ्गं जम्बीरफलसान्तरम् ॥५०॥

वेदिकायां धान्यपीठे सशरावं निवेशयेत् ।
अलङ्कुर्याद्विशेषेण वस्त्रयुग्मेन वेष्टयेत् ॥५१॥

तस्य दक्षिणपार्श्वे तु तादृशं करकं न्यसेत् ।
तोरणानामुभयतः द्वारकुम्भौ निवेशयेत् ॥५२॥

---

४२. b: T. अपि for अधि०;

४८. c: A. यथायोगं for यथायोग्यम्;

अलङ्कुर्याद्यथायोगं पूरयेद्गन्धवारिणा ।
महाकुम्भं च करकं पूरयेद्गन्धवारिभिः ॥५३॥

एवं संस्थाप्य मेधावी वेदघोषे प्रवर्तिते ।
तूर्यवादित्रनिनदे प्रवृद्धेऽति कुतूहले ॥५४॥

आवाहयेन्महाकुम्भे वासुदेवं सनातनम् ।

॥ इति भार्गवतन्त्रेऽष्टमोऽध्यायः ॥

---

५३. a: T. युगं for योगम्;

नवमोऽध्यायः

[प्रतिष्ठाङ्गकुंभार्चनादिविधिनिरूपणाध्यायः]

[कुंभतोरणाद्याराध्यदेवताविवेकः]

श्रीरामः

गम्भीरवेदनिर्घोषवादित्रध्वनिमण्डिते ।
दिगन्तरे द्विजगणे प्रसन्नवदनान्विते ॥१॥

मङ्गलालापचतुरे संहृष्टवनिताजने ।
आकाशे निर्मले ज्योत्स्नामङ्गले चन्द्रमण्डले ॥२॥

सुखस्पर्शे गन्धवहे निर्मले मानसे गुरोः ।
सुमुहूर्ते शुभे लग्ने कुम्भावाहनमाचरेत् ॥३॥

पुण्याहं वाचयेत् सार्धं ब्राह्मणैः वेदपारगैः ।
प्रोक्षयेदखिलान् कुंभान् यागद्रव्याणि तोरणान् ॥४॥

भूतशुद्धिं पुरा कृत्वा मानसं यागमाचरेत् ।
पूर्वस्मिन् तोरणे पूज्यो महेन्द्रः पाकशासनः ॥५॥

ध्वजयोरन्तरयोस्तत्र पार्श्वयोर्वेष्टयेद् गुरुः ।
कुमुदं कुमुदाक्षं च पौर्वापर्येण पूजयेत् ॥६॥

कुंभयोरुभयोस्तत्र पूजयेत्पूर्णपुष्करौ ।
धर्मराजं तथा याम्ये तोरणे ध्वजयोस्तथा ॥७॥

पुण्डरीको वामनश्च कुंभयोरुभयोरपि ।
आनन्दो नन्दनश्चोभौ पूजनीयौ यथाक्रमम् ॥८॥

वारुणे तोरणे चापि वरुणं देवमर्चयेत् ।
पार्श्वयोर्ध्वजयोर्देवौ शङ्कुश्रुतिसुनेत्रकौ ॥९॥

कुंभयोर्वीरसेनं च सुषेणं च समर्चयेत् ।
सौम्ये तु तोरणे सोमं बद्धयोर्ध्वजयोस्तयोः ॥१०॥

---

६. a: T. रक्तयोः for रन्तरयोः;

12588

सुमुखं सुप्रतिष्ठं च सम्भवप्रभवौ तथा ।
कुम्भयोरर्चयेद्द्वौ दक्षिणादित्रयो ध्वजाः ॥११॥

पीतनीलास्तथा श्वेताः कल्पिताः कलशोद्भव ।

[तत्तद्वेदपारायणस्थाननिर्देशः]

ऋचं प्राच्यां यजुर्याम्ये सामनाम च वारुणे ॥१२॥

अथर्वणं तथोदीच्यां पाठयेद्ब्राह्मणोत्तमः ।

[कुंभे भगवदर्चनं होमप्रकारश्च]

आवाहनं तु सर्वत्र योगपीठपुरस्सरम् ॥१३॥

शायितानां तु बिम्बानां परितः स्थापितेष्वपि ।
कुम्भेष्वावाहनं कुर्यात् प्रागाद्याशापुरस्सरम् ॥१४॥

विष्णवादिमूर्तिरष्टौ च तदस्येत्यादिभिः क्रमात् ।
अष्टभि'र्विष्णुसूक्त'स्य तेषां पूजा यथाक्रमम् ॥१५॥

ततस्तु परमात्मानं वासुदेवं सनातनम् ।
महाकुम्भे समावाह्य 'द्वादशाक्षर'विद्यया ॥१६॥

सुदर्शनं च करके सहस्रादित्यसन्निभम् ।
आवाह्य पूजयेद्धीमान् अर्ध्याद्यैः स्व स्व विद्यया ॥१७॥

अर्ध्यं पाद्यं तथाचामं स्नानवस्त्रोपवीतके ।
गन्धं पुष्पं धूपदीपौ अर्चनं चाक्षतं स्तुतिः ॥१८॥

नैवेद्यं परमान्नादि ताम्बूलं गन्धवस्तुभिः ।
नीराजनं स्तुतिश्चान्ते नमस्कारं प्रदक्षिणम् ॥१९॥

एवं समाप्य तां पूजां ततः कुण्डेऽग्निमर्चयेत् ।
समिद्भिश्चरुभिश्चाज्यैर्बीजैश्चाहुतिमाचरेत् ॥२०॥

---

११. d: A. त्रये for त्रयो;
१२. a: A. पीताः for पीत०;
१७. a: T. om. च;

[भगवतः वासुदेवस्य ध्यानप्रकारः]

अगस्त्यः

राम राम जगन्नाथ वासुदेव सनातन ।
कथं ध्यायेद्वासुदेवं ब्रूहि मे कृपया विभो ॥२१॥

श्रीरामः

वासुदेवमजं शान्तं कोटचर्केन्द्वग्निसन्निभवम् ।
अनेकहस्तचरणमनेकाक्षिशिरोमुखम् ॥२२॥

अतीन्द्रियममर्यादम् अत्यद्भुतवपुर्धरम् ।
भासयन्तं दिशः सर्वाः देहनिर्यत्प्रभाचयैः ॥२३॥

अनेकाभरणैर्युक्तमनेकायुधमण्डितम् ।
नानावर्णमयं देवं स्वयं सुरभिविग्रहम् ॥२४॥

ऋषिभिश्च मरीच्याद्यैर्ब्रह्माद्यैरपि दैवतैः ।
अचिन्त्यमहिमानं तमिन्दिराद्यैरभिष्टुतम् ॥२५॥

को वा ध्यातुं क्षमो लोके को वा स्तोतुं भुवि क्षमः ।
तथापि परमेशानं पुरुषं भक्तवत्सलम् ॥२६॥

चतुर्भुजमुदाराङ्गं शङ्खचक्रगदाधरम् ।
किरीटहारकटककाञ्चीकुण्डलमण्डितम् ॥२७॥

श्रीवत्सकौस्तुभस्वच्छयज्ञसूत्राङ्गुलीयकम् ।
दिव्यपीताम्बरधरं कलक्वणितनूपुरम् ॥२८॥

अष्टभिश्चापि देवीभिः प्राञ्जलीभिश्च सेवितम् ।
पक्षीन्द्रविष्वक्सेनाभ्यां परिवारैश्च सेवितम् ॥२९॥

अतिप्रसन्नवदनं बालकं तिलकोज्वलम् ।
अभयप्रदमासीनं शेषभोगासने शुभे ॥३०॥

दिव्यगन्धविलिप्ताङ्गं नानामाल्योपशोभितम् ।
स्मितेन विजितज्योत्स्नं नीलनीरजलोचनम् ॥३१॥

---

२२. b: T. कोटचकेन्द्वाग्नि for कोटचर्केन्द्वग्नि;
२५. b: T. ब्राह्मणैः for ब्रह्माद्यैः;
३१. d: A. नीरद for नीरज;

कम्बुकण्ठं महासत्वं पीनोत्तुङ्गांसशोभितम् ।
उत्तुंगपीनविपुलसमस्निग्धमहोरसम् ।।३२।।

पुष्टोदरं मग्ननाभिं पृथुश्रोणीभराञ्चितम् ।
ऊरुद्वयकृतद्वन्द्वरंभासरंभलक्षितम् ।।३३।।

चरणद्वन्द्वविजितविकसत्सरसीरुहम् ।
अङगुष्ठनखनिर्यद्भिर्भानुभिर्जितभास्करम् ।।३४।।

आजानुदीर्घैः पृथुलैः हस्तैरायुधधारिणम् ।
ध्यात्वैवं वासुदेवं तं कुर्यादावाहनक्रियाम् ।।३५।।

[तत्तद्देवानां होमक्रमनिर्देशः]

मथितं मणिजं यद्वा लौकिकं वा हुताशनम् ।
'द्वादशाक्षर'मन्त्रेण प्रोक्षयित्वा सर्सपिषा ।।३६।।

पर्यग्निकरणं कुर्यात् कुण्डानां दर्भमुष्टिभिः ।
उद्दीप्य ज्वलनं सम्यक् 'परिवाजती'त्यृचा ।।३७।।

संस्कुर्यात्पश्चिमे कुण्डे ज्वलन्तं जातवेदसम् ।
प्रागादिषु च कुण्डेषु प्रत्यक् कुण्डात् समाहरेत् ।।३८।।

अग्निमध्ये तु कुण्डेषु योगपीठं प्रकल्पयेत् ।
शुनासीरे वासुदेवं याम्ये सङ्कर्षणं तथा ।।३९।।

प्रद्युम्नं वारुणे कुण्डे अनिरुद्धमुदक्पदे ।
एवमावाह्य देवेशं पूजयेत्सर्पिषा ततः ।।४०।।

[होमक्रमे समिधादिविवेकः]

चतस्रः समिधः प्रोक्ता प्रागादिषु यथाक्रमम् ।
पलाशखदिराश्वत्थविल्वोदुम्बरभूरुहाः ।।४१।।

---

३३. b: T. अञ्जितम् for अञ्चितम्;

३६. d: A. प्रोक्षयित्वाथ सर्पिषा;

४०. a: A. प्राचेतसे तु वरुणम्;

४१. d: T. °रुहाम् for रुहाः;

अलाभे सर्वकुण्डेषु पालाश्येकैव शस्यते ।
पायसं कृसरं चापि गुडान्नं च यथाक्रमम् ॥४२॥

हरिद्रान्नं च पूर्वादिकुण्डेषु चरवः स्मृताः ।
पायसान्नेन वा कुर्यात् शुद्धान्नेनाथवा भवेत् ॥४३॥

तिलशालियवा वेणुर्होमे बीजान्यनुक्रमात् ।
तिलैर्वा सर्वकुण्डेषु बीजालाभे समाचरेत् ॥४४॥

वासुदेवादिभिर्मन्त्रैर्होमाः प्रागादिवह्निषु ।
समिद्भिराज्यैश्चरुभिः बीजैः कार्याश्च मूर्तिपैः ॥४५॥

अष्टोत्तरशतं होमः प्रत्येकं कलशोद्भव ।
एवं जुह्वत्सु ऋत्विक्षु मूर्तिहोमं यथाक्रमम् ॥४६॥

[तत्त्वहोमविधिः]

तत्त्वहोमं स्वयं कुर्यात् ब्राह्मकुण्डे गुरूत्तमः ।
पुरस्ताद्देवदेवस्य बिम्बं भूतमयं स्मरेत् ॥४७॥

अर्घ्याद्यैरुपचर्याथ तत्त्वसंहारमाचरेत् ।
संहरेत्पृथिवीमप्सु तां वह्नौ तं च मारुते ॥४८॥

तमाकाशे च मनसि तच्च तन्मात्रया सह ।
तदीयैश्चापि तत्त्वैश्च तन्मनोऽहंकृतौ हरेत् ॥४९॥

अहंकृतिं ततो बुद्धौ प्रकृतौ तां समाहरेत् ।
तां च जीवे ततोऽभ्यर्च्य पुनरुत्पादयेद्गुरुः ॥५०॥

प्राचीनकुण्डे जुहुयात् तत्त्वानि कपिलाघृतैः ।
वर्मणा परिषिच्यादौ सृष्टिपन्थानमास्थितः ॥५१॥

———————

४२. b: T. पलाश्ये for पालास्ये;

४३. a: A. हरिद्रान्नेन for हरिद्रान्नं च;
c: A. कार्या for कुर्यात्;

४५. b: A. T. होमः for होमाः; वग्निषु for °वह्निषु;

४७. a: M. यथा for स्वयम्;

४८. a: T. उपचार्य for उपचर्य;

तत्त्वव्याहृतिभिः कुर्यात् पृथगष्टोत्तरं शतम् ।
अष्टाविंशति वाष्टौ वा प्रतिमन्त्राहुतिर्भवेत् ॥५२॥

[मकाराद्यक्षरतत्त्वानां प्रतिमाङ्गेषु न्यासक्रमः]

जीवमन्त्रो मकारः स्यात् भकारः प्रकृतिर्भवेत् ।
बुद्धितत्त्वं बकारः स्यात् फकारः स्यादहंकृतिः ॥५३॥

मनस्तत्त्वं पकारः स्यात् प्रतिमाहृदयस्थिताः ।
नकारश्शब्दतन्मात्रं श्रोत्रैकविषयं भवेत् ॥५४॥

धकारः स्पर्शतन्मात्रं त्वचि नित्यं प्रतिष्ठितम् ।
दकारो रूपतन्मात्रं नेत्रयोर्विषयं भवेत् ॥५५॥

थकारो रसतन्मात्रं जिह्वायामेव वर्तते ।
तकारो गन्धतन्मात्रं वर्तते नासिकाञ्चले ॥५६॥

णकारः श्रोत्रतत्त्वं स्यात् श्रोत्रयोर्नित्यमावसेत् ।
ढकारस्तु त्वगात्मा स्यात् त्वचि सर्वत्र वर्तते ॥५७॥

डकारो नेत्र तत्त्वात्मा नित्यं नयनयोर्वसेत् ।
जिह्वात्मा तु ठकारः स्यात् जिह्वारूपं जगत्त्रये ॥५८॥

घ्राणात्मा तु टकारः स्यात् नासिकाग्रे निवेशितः ।
ञकारो वाङ्मयो वर्णो वाचि नित्यं प्रतिष्ठितः ॥५९॥

झकारः करतत्त्वं स्यात् करयोर्विधिनिर्मितः ।
जकारः पादतत्त्वार्णः नित्यं पादतले स्थितः ॥६०॥

छकारः पायुतत्त्वात्मा पायुमूलमुपाश्रितः ।
चकारो मेहनात्मा स्यात् मेहने सन्निवेशितः ॥६१॥

ङकारः पृथिवीतत्त्वम् पादाज्जानुप्रवर्तकम् ।
अप्तत्त्वं तु घकारस्स्यात् जानोर्गुह्यावधिस्थितः ॥६२॥

---

५३. d: A. हकारः for फकारः;
५७. a: A. तत्वात्मा for तत्त्वं स्यात्;
५९. a: T. प्राण for घ्राण;
६२. b: M. T. पादं for पादात्;

तेजस्तत्त्वं गकारः स्यात गुह्यादानाभि वर्तते ।
खकारो वायुतत्त्वात्मा नाभेर्नासान्तमास्थितः ॥६३॥

ककारोऽम्बरतत्त्वात्मा ततो ब्रह्मबिलावधि ।
एवं तत्त्वाक्षरः प्रोक्तः प्रणवादि समुद्धरेत् ॥६४॥

प्रणवस्तत्त्वमन्त्रश्च नतिश्च स्थाननाम च ।
चतुर्थ्यन्तं समुद्धृत्य वह्निजायां गुरूत्तमः ॥६५॥

हुत्वा सम्पातमाहृत्य तत्तदङ्गेषु सेचयेत् ।

[प्रतिमायां शक्तिनिवेशप्रकारः]

एवं हुत्वा ततः प्राणवायुहोमं समाचरेत् ॥६६॥

प्राणं हुत्वा सुषुम्नायामिलायां तदनन्तरम् ।
अपानं पिङ्गलायान्तु समानं गन्धसंज्ञिके ॥६७॥

उदानं हस्तिजिह्वायां व्यानवायुं निवेशयेत् ।
पूषायामपि नागेन्द्रं यशस्विन्यां तु कच्छपम् ॥६८॥

अलम्बुसायां कृकरं देवदत्तं कुहूपदे ।
धनञ्जयं तु कैशिन्यां हुत्वा हुत्वा स्वविद्यया ॥६९॥

सम्पातं सेचयेद्बिम्बे तत्र शक्तिं निवेशयेत् ।
शङ्खं चक्रं गदापद्मं शाङ्गं श्रीवत्सकौस्तुभे ॥७०॥

वनमालां खगेशं च हुत्वा सम्पातसेचनम् ।
'असुनीते'ति मन्त्रेण अष्टोत्तरशताहुतीः ॥७१॥

हुत्वा प्राणप्रतिष्ठार्णं शिरस्केनाज्यसेचनम् ।
सम्पातसेचने काले तत्तच्छक्तिं निवेशयेत् ॥७२॥

[चण्डादिपरिवाणाम् अधिवासनादिविधिः]

चण्डादीनां च पीठानां परिवारगणस्य च ।
अन्येषामपि सर्वेषां धान्यपीठेऽधिवासनम् ॥७३॥

---

६४. b: M. om. ततो;

७०. c: M. गदां पद्माम् for गदापद्मम्;
d: M. शाङ्गं for शार्ङ्गम्;

७१. d: A. °हुतिम् for °हुतीः;

कृत्वा तत्तद्विद्ययैव हुत्वा चाष्टोत्तरं शतम् ।
सर्पिषाऽहृत्य सम्पातं तत्तद्बिम्बेषु सेचयेत् ॥७४॥

एवं निरवशेषेण कृते होमे यथाविधि ।
शान्तिहोमं ततः कुर्यात् सर्वदोषापनुत्तये ॥७५॥

ओं भूर्भुवः सुवः स्वाहेत्यष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं यद्वा सर्पिषा पूर्ववर्हिषि ॥७६॥

हुत्वा सम्पातमादाय सर्वेष्वङ्गेषु सेचयेत् ।

[एकबेरबहुबेरप्रतिष्ठाविधौ विशेषः]

ब्राह्मे पदे स्थापनीये ध्रुवबेरे मुनीश्वर ॥७७॥

वेदिकादिघटाम्बोभिरब्लिङ्गैः प्रोक्षयेत्ततः ।
आग्नेयादिघटाम्भोभि'र्विष्णुगायत्रियो'क्षणम् ॥७८॥

बहुबेरे तु सदनं प्रविश्यैवोक्षणं भवेत् ।
ततश्चतुर्विधान्नं च हरये विनिवेदयेत् ॥७९॥

प्रणवेनोपचारांस्तान् सर्वानपि समाचरेत् ।

[बलिसमर्पणविधिः]

बिम्बमुत्थाप्य तेजस्वी प्राङ्मुखं विनिवेश्य च ॥८०॥

अभ्यर्च्य गन्धपुष्पाद्यैः बलिदानं समाचरेत् ।
माषोदनेन भूतेभ्यः सर्वेभ्योऽपि यथाविधि ॥८१॥

गोमयालेपिते भूमितले सम्यगलङ्कृते ।
आद्याश्च कर्मजाश्चैव भूताः प्रागादिषु स्थिताः ॥८२॥

पर्वतेष्वप्यरण्येषु वृक्षाग्रेषु वसन्ति ये ।
आलयेषु च तीर्थेषु ऋषीणामाश्रमेषु च ॥८३॥

---

७४. b: M. वा for चा;
७८. a: A. दिग्घट for °दिघट;
c: A. दिग्घट for °दिघट;
७९. c: T. विधान्तम् for विधान्नम्;
८०. a: T. उपचारान्तान् For उपचारांस्तान्;

कूपेषु च तटाकेषु ये वसन्ति गृहादिषु ।
उत्तमाः मध्यमाश्चापि राजसास्तामसास्तु वा ॥८४॥

बल्यर्थिनः समायान्तु तेभ्यः पूजां करोम्यहम् ।
इदमर्घ्यमिदं पाद्यमिदमाचमनीयकम् ॥८५॥

स्नानमेतत् सगन्धोदं वस्त्रमेतत्सुनिर्मलम् ।
इदं गन्धमिदं पुष्पम् इदं धूपं सदीपकम् ॥८६॥

अनर्घमक्षतमिदं गृह्णन्तु बलिदेवताः ।
माषौदनं तत् सघृतं दधिमिश्रं गुडान्वितम् ॥८७॥

भक्ष्यैश्च विविधैर्युक्तं पायसेन च मिश्रितम् ।
ताम्बूलपूगसहितं मधुद्रवसमन्वितम् ॥८८॥

भोक्तुं त्रिपुरुषैर्योज्ञं मिश्रयेत्पयसा गवाम् ।
विभज्य तत्त्रिधा धीमान् बलिदानं समाचरेत् ॥८९॥

कुर्वन्ति विघ्नं ये भूताः धर्मकार्येषु ये भुवि ।
ये हरन्ति च पुण्यानि तेभ्यस्तेभ्यः अयं बलिः ॥९०॥

विनियुज्य च कार्येषु फलार्थं विन्दते च ये ।
राजसा मध्यमगुणाः तेभ्यस्तेभ्यः अयं बलिः ॥९१॥

यागादिषु प्रवृत्तेषु दृष्ट्वा तुष्टिमवाप्नुयुः ।
ये भूताः उत्तमगुणाः तेभ्यस्तेभ्यः अयं बलिः ॥९२॥

[प्रतिष्ठास्थानात् गन्तुं बलिदेवप्रार्थनाक्रमः]

दत्त्वैव बलिमाचार्यः प्रार्थयेद्बलिदेवताः ।
प्रतिष्ठा देवदेवस्य क्रियते परमात्मनः ॥९३॥

इतः प्रभृति युष्माभिर्नैषा वस्तुं क्षमा मही ।
तस्मादन्यत्र गच्छध्वं बलिदानेन तोषिताः ॥९४॥

---

८५. a: T. अधीनाः for अर्थिनः;

८७. c: A. माषोदकम् for माषौदनम्;

९१. b: A. फलार्धं विभजेत ये;

९२. c: A. ते for ये;

९४. b: T. वस्तु मही क्षमा for वस्तुं क्षमा मही;

देशिकः प्रार्थयेदेवं विनीतो बलिदेवताः ।
ते तुष्टाः बलिदानेन प्रार्थिताः यान्ति निश्चयम् ॥९५॥

[पिण्डिकाद्यधिवासः तदङ्गभूतहोमश्च]

पिण्डिकां देवदेवस्य धान्यपीठेऽधिवासयेत् ।
रत्नान्यपि च लोहानि धान्यान्यप्यधिवासयेत् ॥९६॥

पृथक् पृथक् भाजनेषु वासोभिर्वेष्टयेन्नवैः ।
विष्णुगायत्रियाज्येन होमश्चाष्टोत्तरं शतम् ॥९७॥

[प्रतिसरबन्धः पूर्णाहुतिक्रमः मङ्गलसूचकलक्षणानि च]

हेमसूत्रं प्रतिसरं प्रतिष्ठार्थं गुरूत्तमः ।
बन्धयेद्देवदेवस्य हस्ते पुण्याहपूर्वकम् ॥९८॥

ततः पूर्णाहुतिं कुर्युः कुण्डे कुण्डे यथाक्रमम् ।
पुण्यगन्धवहो धूमः ज्वालादक्षिणमण्डला ॥९९॥

अग्निः कनकवर्णाभः यद्वा कमलसन्निभः ।
आचार्यस्य मनस्तुष्टिरिमे मङ्गलसूचकाः ॥१००॥

[रात्रियापनक्रमः]

गीतवादित्रनिर्घोषैः ब्रह्मघोषैश्च मङ्गलैः ।
नयेयुस्तां निशामृत्विक् यजमानगुरूत्तमाः ॥१०१॥

॥ इति भार्गवतन्त्रे नवमोऽध्यायः ॥

---

९८. a: A. कुंभ for हेम;

दशमोऽध्यायः

[प्रतिष्ठाक्रमे प्रतिमापीठस्थापनादिनिरूपणाध्यायः]

[गर्भगृहे भगवदानयनम् आधारशिलास्थापनञ्च]

श्रीरामः

प्रभातायां तु शर्वर्यां निर्मले भास्करोदये ।
शुभे मुहूर्ते सम्प्राप्ते मञ्चादुत्थापयेद्धरिम् ॥१॥

अर्चयेद्गन्धपुष्पाद्यैः अलङ्कुर्याद्विशेषतः ।
गर्भमन्दिरमासाद्य तत्राधारशिलां क्षिपेत् ॥२॥

आयामसमविस्तारां यद्वा वृत्तां मनोहराम् ।
सुधया तां दृढीकृत्य रत्नन्यासं समाचरेत् ॥३॥

[आधारपीठगर्ते बीजरत्नन्यासक्रमः]

यवो व्रीहिश्च निष्पावः प्रियङ्गुतिलमाषकाः ।
नीवाराः शालयश्चाष्टौ गर्ते प्रागादि विन्यसेत् ॥४॥

प्रथमावरणे पश्चात् द्वितीयावरणे तथा ।
वज्रमौक्तिकवैडूर्यवालजस्फटिकान्यपि ॥५॥

पुष्परागं चन्द्रकान्तम् इन्द्रनीलं क्रमान्न्यसेत् ।
तृतीयावरणे स्वर्णरजतायस्त्रपूणि च ॥६॥

ताम्रसीसककांस्यानि कच्छपं स्वर्णनिर्मितम् ।
क्रमेण निक्षिपेद्गर्ते मध्यगर्ते विनिक्षिपेत् ॥७॥

शालिबीजं पारदं च नवरत्नानि काञ्चनम् ।
एवं विन्यस्य मेधावी विष्णुगायत्रिविद्यया ॥८॥

अपिधाय स्त्रीशिलया श्रीसूक्तेन यथादृढम् ।
सुधया तां दृढीकृत्य पुण्याहप्रोक्षणं चरेत् ॥९॥

[पिण्डिकायां लक्ष्म्याः आवाहनमर्चनं च]

आवाहयेत् पिण्डिकायां लक्ष्मीं कमलवासिनीम् ।
अर्चयेद्गन्धपुष्पाद्यैः पिण्डिकाधिष्ठितां श्रियम् ॥१०॥

[बिम्बार्थं पीठार्थं रत्नन्यासार्थं च स्वीकार्याः शिलाः]

बिम्बं पुंशिलया कुर्यात् पीठं स्त्रीशिलया भवेत् ।
रत्नन्यासस्तु कर्तव्यो नपुंसकशिलोपरि ॥११॥

[गर्भगृहे पिण्डिकायुक्तबिम्बस्य निवेशः तत्स्थापनञ्च]

नवेन वाससाच्छाद्य पिण्डिकां यागसद्मनि ।
हरिमभ्यर्च्य विधिवत् अग्नीनपि विसर्जयेत् ॥१२॥

द्वारतोरणकुम्भस्थान् पालिकाधिष्ठितानपि ।
सोमकुंभस्थितं देवं विसृज्य तदनन्तरम् ॥१३॥

महाकुंभोपकुंभांश्च धारयेयुश्च मूर्तिपाः ।
आचार्यः पुरतो यायात् गृहीत्वा करकं शुभम् ॥१४॥

अग्रतः सेचयेन्मार्गं गलन्त्या वारिधारया ।
गर्भगेहं विमानस्य नीत्वा तत्र निवेशयेत् ॥१५॥

आचार्यो ऋत्विजश्चान्ये देवमुत्थाप्य मङ्गलैः ।
वेदैर्वाद्यैश्च विविधैर्गच्छेयुर्मन्दिरं प्रति ॥१६॥

अन्तः प्रवेशयेद्देवं पिण्डिकायां निवेशयेत् ।
शुभे मुहूर्ते सम्प्राप्ते ब्रह्मसूत्रं विलोकयन् ॥१७॥
'आत्वा हार्षं प्रतिष्ठासि' 'ध्रुवाद्यौ'रिति विद्यया ।
आचार्यः पुरतः स्थित्वा स्थापयेत्सर्वविद्यया ॥१८॥

[पिण्डिकाप्रतिमयोः संयोजनम् अष्टबन्धकल्पनप्रकारश्च]

ब्रह्मसूत्रं गुरुर्दृष्ट्वा समतां च विलोकयेत् ।
अष्टबन्धेन बध्नीयात् लाङ्गलेन दृढं यथा ॥१९॥

सार्धमेकं चूर्णभागं भागमेकं च गुग्गुलम् ।
अर्धभागां तथा लाक्षां कुरुविन्दं तदर्धकम् ॥२०॥

---

१२. c: M. विविधद for विधिवत्;

१५. b: M. गलन्त्यो for गलन्त्या;

१९. a: A. गुरुम् for गुरुः
b: M. विलोकयन् for विलोकयेत्;

मधूच्छिष्टं तदर्धं तु तूलं सर्पिश्च गैरिकम् ।
यथेष्टं योजयेद्धीमान् यथामृदु भवेत्तथा ॥२१॥

[मूलबिम्बे परिवारदेवताबिम्बेषु च भगवतः आवाहनम्]

पुण्याहं वाचयेत् पश्चात् प्रोक्षयेदपि पिण्डिकाम् ।
बिम्बं च वासुदेवस्य पश्चादावाहनं चरेत् ॥२२॥

ध्यायेत्परात्परं विष्णुं हृत्पद्मे कर्णिकोपरि ।
आवाहयेत्ततो बिम्बे योगपीठपुरस्सरम् ॥२३॥

आवाह्य मूलमन्त्रेण वर्धनीस्थेन वारिणा ।
परिषिच्य षडर्णेन प्रोक्षयेत्कुंभवारिभिः ॥२४॥

ऋत्विक्षु शान्तिमन्त्राणि पठत्सु ब्राह्मणेष्वपि ।
घोषयत्सु ब्रह्मघोषं तौर्यनृत्तादिमङ्गलैः ॥२५॥

द्वादशाक्षरमन्त्रेण ब्रह्मकूर्चोदकोक्षणम् ।
उपकुंभाष्टकजलैस्तथा वै स्व स्व विद्यया ॥२६॥

तत्तत्कुंभगतां शक्तिं तत्तन्मन्त्रेण योजयेत् ।
कुंभतोयावशेषेण परिवारान् प्रकल्पयेत् ॥२७॥

अष्टाक्षरस्य मन्त्रस्य न्यासं बिम्बे समर्पयेत् ।
सान्निध्यं सर्वदा तत्र प्रार्थयेद्देशिकोत्तमः ॥२८॥

एवमावाह्य देवेशं प्रोक्ष्य शक्तिं निवेश्य च ।
परिवारान् यथास्थानम् स्थापयित्वा यथाविधि ॥२९॥

आवाहनप्रोक्षणादि सर्वं कर्म समाप्य च ।
अभ्यर्च्य देवदेवेशमुपचारैः पृथग्विधैः ॥३०॥

महाहविर्निवेद्याथ स्थापितेषु यथाक्रमम् ।
बलिं दद्यात् यथाशास्त्रमेकबेरे त्वयं विधिः ॥३१॥

---

२१. b: M. तैलम् for तूलम्;
२२. b: A. पण्डिकान् for पिण्डिकाम्
२५. c: M. घोषयेत्स for घोषयत्सु
२७. a: T. बिम्ब for कुंभ;

[बहुबेरप्रतिष्ठाविधौ ध्रुवादिबिम्बानां स्थाननिर्देशः]

बहुबेरप्रतिष्ठायां विशेषोऽस्त्यत्र कश्चन ।
दिव्यमानुषयोः सन्धौ ध्रुवबिम्बनिवेशनम् ॥३२॥

ब्राह्मे पदेऽर्चनापीठं कर्मार्चा मध्यमे पदे ।
तत्रैव मखबिम्बं च सौम्ये स्नपनकौतुकम् ॥३३॥

तीर्थबिम्बं च याम्ये तु शय्यार्थबलिकौतुके ।
लौकिकं बिम्बमन्यच्च बाह्यभूमौ निवेशयेत् ॥३४॥

[प्रतिष्ठाङ्गभूतकर्मसम्पादनस्थाननिर्देशः]

सुमुहूर्ते शुभे लग्ने स्थापयेद् ध्रुवकौतुकम् ।
तत्त्वसंहारजनने तत्त्वन्यासादि कर्म च ॥३५॥

शान्त्यन्तमखिलं कर्म गर्भगेहे समाचरेत ।
अन्येषामङ्गबिम्बानां सर्वं तद्यागमन्दिरे ॥३६॥

[प्रतिष्ठाक्रमे कुम्भन्यासविधिः]

प्रतिष्ठासमये प्राप्ते कुम्भानुत्थाप्य देशिकः ।
पश्चात्तदङ्गबिम्बैश्च प्रादक्षिण्येन मन्दिरम् ॥३७॥

अन्तःप्रविश्य विन्यस्य कुम्भानपि यथाविधि ।

[मूलबिम्बे शक्तिनिवेशप्रकारः]

आवाहयेन्मूलबेरे परमात्मानमव्ययम् ॥३८॥

पञ्चोपनिषदैर्मन्त्रैः तत्प्रकारमितः शृणु ।
सदाविष्णुं महाविष्णौ तं विष्णौ विनिवेशयेत् ॥३९॥

हृत्पुण्डरीके तं विष्णुं तं च स्वाञ्जलिपङ्कजे ।
ध्रुवबिम्बब्रह्मरन्ध्रात् बिम्बे तं विनिवेशयेत् ॥४०॥

---

३२. b: T. om अस्ति;

३३. d: A. कौतुके for कौतुकम्;

३४. a: A. याम्येषु for याम्ये तु;

३९. b: A. M. इह for इतः;

४०. d: A. विनियोजयेत् for विनिवेशयेत्;

परिषिञ्चेत्ततो बिम्बं वर्धनीस्थेन वारिणा ।
महाकुम्भप्रोक्षणं च 'द्वादशाक्षर' विद्यया ॥४१॥

उपकुम्भाम्बुभिः पश्चात् प्रोक्षयेत्स्वस्वविद्यया ।
शक्तीस्तत्तत्कुम्भगताः मूलबेरे निवेशयेत् ॥४२॥

अपिधाय ब्रह्मरन्ध्रं प्रणवेन समाधिना ।
मन्त्रन्यासं ततः कुर्यात् सर्गसृष्टयादिकर्मवित् ॥४३॥

[कर्मबिम्बादिषु शक्त्यावाहनक्रमः]

सर्वेषां कर्मबिम्बानां मूलादावाहनं मतम् ।
कुम्भतोयावशेषेण प्रोक्षणं परिकल्पयेत् ॥४४॥

ब्रह्मादिपरिवाराणामन्येषां प्राङ्गणे सताम् ।
चण्डादीनां श्रियादीनां बलिपीठावसानिकम् ॥४५॥

महाकुम्भं समाहृत्य देशिको ब्राह्मणैः सह ।
स्वस्वमन्त्रेण सम्प्रोक्ष्य कर्मजालं समापयेत् ॥४६॥

अर्चयेद्देवदेवेशं नैवेद्यान्तं यथापुरम् ।

[गुर्वादिभ्यो दक्षिणादानादिनिर्देशः]

पूजयेद्यजमानोऽपि प्रतिष्ठासमये गुरुम् ॥४७॥

सौवर्णकुसुमैर्वस्त्रैः केयूरैरङ्गुलीयकैः ।
कुण्डलैः कटकैर्यज्ञसूत्रैश्च सुमनोहरैः ॥४८॥

पट्टवस्त्रैर्दुकूलैश्च सस्वर्णैरुत्तरीयकैः ।
उष्णीषैर्गन्धपुष्पैश्च भूषयेद्विविधैरपि ॥४९॥

घटोध्नीर्गास्सवत्साश्च धरणीं सस्यशालिनीम् ।
स्वर्णनिष्कसहस्रं च दद्यात्तस्मै स्वयं प्रभुः ॥५०॥

अशक्तश्चेत्त्रिपादं वा दलं वा पादमेव वा ।
यद्वा निष्कशतं दद्यात् गुरवे दक्षिणां प्रभुः ॥५१॥

---

४३. d: A. सर्वसृष्ट्यादितन्त्रवित्; M. तत्त्व for कर्म;
५०. d: A. M. प्रभुः स्वयम् for स्वयं प्रभुः;

तदर्धम् ऋत्विजां दद्यात् तदर्धं परिचारिणाम् ।
प्रतिष्ठायां तु देवस्य भोजयेद्ब्राह्मणान् बहून् ॥५२॥

लक्षं वाप्ययुतं वापि सहस्रं वा यथाबलम् ।
सर्वाशक्तः शतं विप्रान् भोजयेद्यज्ञसिद्धये ॥५३॥

भोजयित्वा द्विजान् नित्यं प्रतिष्ठादिवसे प्रभुः ।
दक्षिणां वितरेत्तेभ्यो ताम्बूलपरिमण्डिताम् ॥५४॥

त्रयीविद्भ्यः शास्त्रविद्भ्यः स्तोतृभ्यश्च विशेषतः ।
इतरेभ्यो द्विजेभ्यश्च देयैव द्विजदक्षिणा ॥५५॥

[दक्षिणारहितयागस्य फलराहित्यकथनम्]

दक्षिणारहितो यज्ञः प्रभवे न फलप्रदः ।
तस्माद्द्विजेभ्यः सर्वेभ्यः वितरेद्दक्षिणां प्रभुः ॥५६॥

[प्रतिष्ठाकर्मणः समाप्तौ देशिकस्य गृहानयनम्]

एवं संस्थाप्य देवेशं सर्वमङ्गलसंयुतम् ।
ऋत्विग्भिः सह सन्तुष्टं भोजनेन धनेन च ॥५७॥

गीतवादित्रघोषेण छत्रचामरबीजनैः ।
स्वस्तिब्रुवाणैर्विप्रैश्च देशिकं निनयेद्गृहम् ॥५८॥

[प्रतिष्ठासम्पादकस्य सहायकानां च कृते फलकीर्तनम्]

एवं यः स्थापयेद्देवं यजमानो महीतले ।
तस्य वंशर्द्धिरतुला धनेन धनदोपमः ॥५९॥

विद्यावान् बलवान् धीमान् भूयाच्चापि महीपतिः ।
विनश्यन्ति च विघ्नानि पापाः यान्ति क्षयं ध्रुवम् ॥६०॥

अतुला श्रीश्च तस्य स्यात् दीर्घायुश्च भविष्यति ।
अमरैः स्तूयते नित्यं पुण्यकृद्भिश्च पूज्यते ॥६१॥

---

५२. a: M. अर्थम् for अर्धम्;
b: M. अर्थम् for अर्धम्;

५९. b: M. तद्वर्चेवं रार्धिरतुला;

उपकुर्वन्ति ये मर्त्याः तेषां पुण्यं न तर्क्यते ।
बहुना किं देवलोके वसन्ति दिवि देववत् ॥६२॥

पठतां च त्रयीं शास्त्रं वासो भूयात्त्रिविष्टपे ।
वाद्यवादनशक्तानां गीतनृत्तादि कुर्वताम् ॥६३॥

गन्धर्वलोके वसतिरन्नपानादिदायिनाम् ।
न पुनर्जननं तेषां यानछत्रादिधारिणाम् ॥६४॥

यानाधिकारिणो देवाः देवलोके न संशयः ।
आचार्याणामृत्विजां च तथैव परिचारिणाम् ॥६५॥

कर्मिणां न पुनर्जन्म स्थापितो यैर्जनार्दनः ।
कामनारहितं कर्म कारितं यैस्तु मानवैः ॥६६॥

तेषां त्रिविष्टपे वासः पुनरावृत्तिवर्जितः ।

[यागदर्शनस्य माहात्म्यम्]

केवलं दर्शनं विष्णोः सर्वकामफलप्रदम् ॥६७॥

किं पुनः फलमिच्छद्भिः यागकाले विशेषतः ।

[प्रतिष्ठान्ते भगवतः स्नपनस्य महोत्सवस्य च निर्देशः]

एवं संस्थाप्य मेधावी वासुदेवं सनातनम् ॥६८॥
स्नापयित्वा प्रतिष्ठान्ते ध्वजपूर्वं महोत्सवम् ।

कुर्यात्तत्प्रीतये भूयाच्छार्ङ्गिणः परमात्मनः ॥६९॥

॥ इति भार्गवतन्त्रे दशमोऽध्यायः ॥

---

६५. a: M. यानादिधारि for यानाधिकारि
६६. a: M. कर्म for कर्मि;
b: M. स्थापितैर्यो जनार्दनः;

एकादशोऽध्यायः

[महोत्सवाङ्गध्वजारोहणादिनिरूपणाध्यायः]

[महोत्सवविधिनिरूपणार्थं प्रार्थना]

अगस्त्यः

कथं महोत्सवविधिः कर्तव्यः परमात्मनः ।
कृपया भार्गव श्रीमन् ब्रूहि मे भक्तवत्सल ॥१॥

[महोत्सवमाहात्म्यम् महोत्सवदिनावधिश्च]

श्रीरामः

शृणु त्वं मुनिशार्दूल देवदेवमहोत्सवम् ।
येनाराध्य हरिं शक्रो विमुक्तो वृत्रहत्यया ॥२॥

तमद्य तव वक्ष्यामि शृणुष्व विनयान्वितः ।
द्वादशाहेन कुर्वीत कल्याणं शार्ङ्गधन्वनः ॥३॥

यद्वा नवभिरहोभिः सप्तभिर्वाथ पञ्चभिः ।

[ध्वजपटे गरुडस्य स्वरूपं तदक्षिमोचनं च]

आरम्भदिवसात् पूर्वं वैनतेयध्वजोत्सवः ॥४॥

तदर्थमङ्कुरन्यासं कृत्वा शास्त्रविधानतः ।
पटे तु विलिखेद्देवं वैनतेयं खगाधिपम् ॥५॥

नवतालप्रमाणं तं तप्तकाञ्चनसन्निभम् ।
द्विभुजं कञ्चुकयुतं पुष्पाञ्जलिधरं विभुम् ॥६॥

किरीटकुण्डलधरं नागाभरणभूषितम् ।
पृष्ठविन्यस्तसव्याङ्घ्रिमितरेणापि कुञ्चितम् ॥७॥

---

१. श्लोकतः पूर्वम् M. कोशे "अथ महोत्सवविधिरुच्यते" इत्यधिकः पाठः ।
   a: A. कथं महोत्सवं ब्रह्मन्;

४. a: A. M. °रंहोभिः for °रहोभिः;

६. a: A. प्रमाणान्तं for प्रमाणं तम्;

पक्षविक्षेपसहितं गगनोत्पतनोन्मुखम् ।
नीलनासाञ्चलं देवं नयनोन्मीलनं चरेत् ॥८॥

[गरुडस्य कुम्भादीनां च अधिवासनम्]

शिल्पिनान्याः क्रियाः सर्वाः प्रतिष्ठोक्तविधानतः ।
छायाधिवासनं कृत्वा स्नापयित्वा च दर्पणे ॥९॥

वैनतेयस्य गायत्र्या पूजयित्वा यथाविधि ।
शालिपीठे सुविस्तीर्णे शाययित्वा ततो गुरुः ॥१०॥

तद्दक्षिणे धान्यराशौ सोपकुंभं सलक्षणम् ।
वर्धन्या स्थापयेत्कुम्भं सर्वालङ्कारसंयुतम् ॥११॥

वैनतेयं महाकुम्भे वर्धन्यां तु सुदर्शनम् ।
अष्टष्वन्येषु चेन्द्राद्याः पूजनीया यथाविधि ॥१२॥

[गरुडाधिवासनाङ्गहोमक्रमः]

एकस्मिन्नेव कुर्वीत प्राक्कुण्डे वा महानसे ।
मूर्तिहोमं बृहत्साम्ना गायत्र्या वा यथारुचि ॥१३॥

तत्त्वसंहारजनने तत्त्वहोमादि पूर्ववत् ।

[गरुडावाहनार्चनप्रकारः]

पटं विस्तार्य तदनु मन्दिराभिमुखं गुरुः ॥१४॥

प्रदर्श्य देवदेवाय तदन्वावाहनं चरेत् ।
भगवन् पुण्डरीकाक्ष सर्वेश्वरजगन्मय ॥१५॥

त्वया यथा तु कथितं तथा कर्तुं न शक्यते ।
अस्वातन्त्र्यादसामर्थ्यात् श्रद्धादीनामभावतः ॥१६॥

त्वदात्मनाद्य सर्वेषां न्यूनाधिक्योपशान्तये ।
समालोकय नेत्राभ्यां शीतलाभ्यां पटस्थितम् ॥१७॥

---

९. d: T. दक्षिणे for दर्पणे;

१०. d: A. °थ वाससी for ततो गुरुः;

१३. b: A. कुंभे for कुण्डे;
c: A. M. ब्रह्म for बृहत्; A. om साम्ना;

१७. a: A. त्वमात्मनोऽद्य for त्वदात्मनाद्य;

सर्वदोषापहारिभ्यां वैनतेयं प्रसादय ।
दर्शयित्वैवमाचार्यो व्याहृत्यावाहनं चरेत् ॥१८॥

महाबल महाबाहो वैनतेय वयोधिप ।
सन्निधत्स्व पटे तुभ्यं नमः प्रणवमूर्तये ॥१९॥

इति सम्प्रार्थ्य सान्निध्यं गायत्र्यैव तदीयया ।
पूजयित्वार्घ्यपाद्याद्यैः निवेद्यान्नं चतुर्विधम् ॥२०॥

कुम्भाय च यथाशास्त्रं जपेन्मन्त्रं च गारुडम् ।
वेदघोषैस्तूर्यघोषैर्जागरेण नयेन्निशाम् ॥२१॥

[उत्सवाङ्गध्वजारोहणविधिः]

ततः प्रभाते विमले समाराध्य खगेश्वरम् ।
अलङ्कृत्य यथायोगं यानमारोप्य मङ्गलैः ॥२२॥

प्रादक्षिण्येन निनयेत् ध्वजयष्टेः पुरो भुवि ।
प्रासादाभिमुखं देवं विस्तार्य पटसंस्थितम् ॥२३॥

पुण्याहं वाचयेत् पश्चात् प्रोक्षयेत्कुम्भवारिभिः ।
'गारुडेनै'व मन्त्रेण वर्धन्या परिषेचयेत् ॥२४॥

स्वैः स्वैः मन्त्रैस्तथेन्द्रादिकुम्भप्रोक्षणमाचरेत् ।
विन्यस्य 'गारुडं'मन्त्रं सान्निध्यप्रार्थनं चरेत् ॥२५॥

उत्सवान्तं परमधाम्नः सन्निधत्स्व पटोदरे ।
भगवन् पक्षिभूपाल पालयास्मान् विलोकय ॥२६॥

इति प्राथ्यं खगेशानं मुहूर्ते सर्वमङ्गले ।
मनःप्रह्लादने लग्ने ध्वजारोहणमाचरेत् ॥२७॥

उत्सवप्रतिमां तत्र यानमारोप्य चानयेत् ।
अङ्गुष्ठघनमात्रेण पाशेन त्रिवृतेन च ॥२८॥

तान्तवेन च बध्नीयान्मन्त्रेण 'पुरुषा'त्मना ।
'सुपर्णोऽसी'ति मन्त्रेण ध्वजारोहणमुच्यते ॥२९॥

---

१८. b: A. M. प्रसीदय for प्रसादय;

२८. b: A. आहरेत् for आनयेत्;

आरोप्य चैवं विहगं पूजयित्वा यथाविधि ।
पायसान्नं तथाऽपूपं फलानि विविधानि च ॥३०॥

निवेद्य वैनतेयाय इन्द्रादीन् परितोऽर्चयेत् ।
पूजयित्वा यथान्यायं बलिं दद्याद्विचक्षणः ॥३१॥

मखकौतुकमासाद्य प्रणम्याभ्यर्च्य देशिकः ।
अनुज्ञां च समासाद्य पुष्पाण्यादाय शार्ङ्गिणः ॥३२॥

उदग्रवदनो भूत्वा समालोक्य खगेश्वरम् ।
अस्माद्दिनात्समारभ्य यावत्तीर्थदिनान्तिकम् ॥३३॥

सन्निधिं कुरु पक्षीन्द्र राज्ञो जनपदस्य च ।
ग्रामस्य यजमानस्य वैष्णवानां महात्मनाम् ॥३४॥

तुष्टये पुष्टये चैव सर्वशत्रुजयाय च ।
अपमृत्युहरार्थाय वैनतेय प्रसीद ओम् ॥३५॥

इति पुष्पाञ्जलिं सम्यक् विकिरेद्विहगोपरि ।

[ध्वजारोहणाङ्गब्राह्मणसम्माननम्]

दद्याद्गोभूहिरण्यादि ब्राह्मणेभ्यस्तदा प्रभुः ॥३६॥

[उत्सवप्रतिमापूजनक्रमः]

उत्सवप्रतिमां पश्चान्निनयेन्मण्डपान्तरम् ।
पूजयेच्च यथान्यायं प्रापयेद्गर्भमन्दिरम् ॥३७॥

[भेरीताडनदेवताह्वानप्रकारः]

आह्वानार्थमशेषाणां लोकानां देशिकोत्तमः ।
देवानामपि सर्वेषां भेरीताडनमाचरेत् ॥३८॥

ध्वजपीठसमीपोर्वीं गोमयेन विशोधयेत् ।
भूषयेद्रङ्गवल्लीभिः पीठं तत्र निवेशयेत् ॥३९॥

---

३६. b: A. वितरेत् for विकिरेत्
c: A. T. सुवर्ण for हिरण्य;
d: M. तथा for तदा;

३९. c: d: A. om.

बलिबिम्बं समादाय तत्र न्यस्य समर्चयेत् ।
पुरतस्तस्य बिम्बस्य धान्यपीठं प्रकल्पयेत् ॥४०॥

तत्र भेरीं च कोणं च विन्यस्य तदनन्तरम् ।
स्नातं शुद्धाम्बरधरं सोर्ध्वपुण्ड्रं स्वलङ्कृतम् ॥४१॥

यज्ञोपवीतिनं पार्श्वे दक्षिणे गणिकाजनम् ।
स्थापयेदिन्द्रदिग्भागे नृत्तविद्याविशारदम् ॥४२॥

गीतवादित्रकुशलान् उत्तरे स्थापयेद्बुधः ।
पुण्याहवारिभिर्भेरीं तथा पारशवादिकान् ॥४३॥

प्रोक्षयित्वा महाभेरीं पूजयेद्भारतीमयीम् ।
नवेन वाससा भेरीं वेष्टयेच्छब्दरूपिणीम् ॥४४॥

पुष्पादिभिरलङ्कुर्यात् गन्धैश्च विविधैरपि ।
भेरीमध्येऽर्चयेद्देवीं त्रिगुणां भारतीमयीम् ॥४५॥

दक्षिणोत्तरयोर्विष्णुं लक्ष्मीं च परिपूजयेत् ।
कोणे समर्चयेद्देवं वायुं कलशसंभव ॥४६॥

ततो मूर्तित्रयं ध्यायन् शब्दतन्मात्रविद्यया ।
कोणेन ॥ ताडयेद्भेरीं देवतानाम कीर्तयन् ॥४७॥

वैकुण्ठवासिनो ये च सत्यलोकनिवासिनः ।
रुद्रलोकस्थिता ये च तथा स्वर्लोकवासिनः ॥४८॥

पातालादिषु लोकेषु ये वसन्ति महीतले ।
अन्येऽपि ये च लोकेषु सर्वत्राह्वानमाचरेत् ॥४९॥

ऋषीणामग्निकल्पानां देवानां दितिजन्मनाम् ।
सर्वेषां च समाह्वानं परिवारपदान्वितम् ॥५०॥

---

४०. a: A. M. समानीय for समादाय;
४१. c: A. स्नानम् for स्नातम्;
d: A. सलंकृतम् for स्वलंकृतम्;
४६. a: A. दक्षिणेतर for दक्षिणोत्तर
४९. b: T. लोके for तले;
५०. b: A. देवतानां द्विजन्मनः;

आयुधैः सह देवीभिः वाहनैश्च महोत्सवे ।
आह्वानं कारयेद्धीमान् सेवार्थं मधुविद्विषः ॥५१॥

[प्रत्याह्वानक्रमः]

प्रत्याह्वानं महाभेर्याः ताडनत्रयमाचरेत् ।
तेषां नृत्तं स्वरं तालं त्रयं तत्र प्रकाशयेत् ॥५२॥

[उत्सवक्रमे देवताह्वानाङ्गबलिनिवेदनम्]

आहूय देवताः सर्वाः बलिबिम्बपुरस्सरम् ।
ग्राममध्यं समासाद्य ब्रह्माणं सन्निवेशयेत् ॥५३॥

ग्रामस्य परितो वीथ्यां स्थण्डिलेषु यथाक्रमम् ।
इन्द्रादिलोकपालांस्तान् बल्यर्थं सन्निवेशयेत् ॥५४॥

एवमाहूय मेधावी देवदेवस्य शार्ङ्गिणः ।
उत्सवाय यतेताथ देशकालानुसारतः ॥५५॥

॥ इति भार्गवतन्त्रे एकादशोऽध्यायः ॥

———

५१. d: T. सर्वार्थम् for सेवार्थम्;
५३. c: T. ग्रामबिम्बम् for ग्राममध्यम्;

द्वादशोऽध्यायः

[उत्सवविधिनिरूपणाध्यायः]

[उत्सवाङ्गभूताङ्कुरार्पणकालः]

उत्सवारम्भदिवसात् पूर्वमेवाङ्कुरार्पणम् ।
तृतीयेऽहनि वा कुर्यात् पूर्वस्मिन् दिवसेऽपि वा ॥१॥

[उत्सवक्रमे प्राकारादीनां शोधनं भूषणञ्च]

प्राकारं मन्दिरं चापि वलजं वीथिका अपि ।
प्रपाभिस्तोरणैश्चान्यैर्मालिकाभिः समन्ततः ॥२॥

शोधयेद्गोमयांभोभिः रङ्गबल्यक्षतादिभिः ।
अन्यैश्च विविधैर्दृश्यैः भूषयेच्च गृहाण्यपि ॥३॥

[यागमण्डपवेदिकुण्डकल्पनप्रकारः]

सम्भार्याः यागसम्भाराः उत्सवार्थं विशेषतः ।
अन्तराले दिशामिन्द्रे कल्पयेद्यागमण्डपम् ॥४॥

सप्तभिर्बाहुदण्डैश्च समन्ताच्चतुरश्रकम् ।
तस्य मध्ये भवेद्वेदिः हस्तमात्रसमुच्छ्रया ॥५॥

हस्तद्वयेन विस्तीर्णा कुण्डानि परितस्ततः ।
यद्वैककुण्डं प्राग्भागे चतुरश्रं मनोहरम् ॥६॥

प्राच्यामाहवनीयं स्यात् दक्षिणस्यां तु दक्षिणम् ।
गार्हपत्यं प्रतीचीने सभ्यमन्यत्र कल्पयेत् ॥७॥

आदौ A. 'उत्सवम्' M. 'उत्सवविधिः' इति निर्दिष्टः । तदनन्तरमुभयत्र 'श्रीरामः' इत्यधिकः पाठः ।

२. a: M. प्राकार for प्राकारम्;
c: A. प्रभा for प्रपा;

३. a: A. M. शोभयेत् for शोधयेत्;

४. c: A. M. इष्टे for इन्द्रे ;

५. a: A. बहु for बाहु;
b: A. समन्तं for समन्तात्;

तोरणादिक्रियाः सर्वाः पूर्ववन्न विशिष्यते ।

[उत्सवार्थमाचार्यादिवरणादिकम्]

आचार्याणामृत्विजां च तथैव परिचारिणाम् ॥८॥

वरणं चतुरः पूर्वं देशिकान् वरयेत् प्रभुः ।
शोभयेद्भूषणैर्वस्त्रैः गन्धमाल्यादिभिः पुरा ॥९॥

[उत्सवार्थं देवाधिवासप्रकारः]

अधिवासं प्रकुर्वीत पूर्वस्मिन् दिवसे निशि ।
स्नापयित्वाथ देवीभ्यां शयने शाययेद्धरिम् ॥१०॥

तदर्थं कौतुकं बध्वा पश्चाच्छयनकल्पनम् ।
कोणेषु स्थापयेद्दीपान् शय्याया देशिकोत्तमः ॥११॥

समिद्भिरष्टभिर्होमो नृसूक्तेन चरुं पुनः ।
सर्पिषाष्टौ पुनर्हुत्वा मूलेन मुनिपुङ्गव ॥१२॥

स्तुत्वाथ देवदेवेशं वेदैर्वाद्यैश्च मङ्गलैः ।
जपैश्च मूलमन्त्रस्य जागरेण नयेन्निशाम् ॥१३॥

[अधिवासानन्तरं मण्डपे देवस्य स्नपनमर्चनं च]

ततः प्रभाते विमले दृष्टे भास्करमण्डले ।
'उत्तिष्ठ' इति मन्त्रेण हरिमुत्थापयेद्गुरुः ॥१४॥

'इदं विष्णु'रितिश्रुत्या शिविकायां निवेशयेत् ।
वहेयुर्ब्राह्मणाः यानम् ध्यायन्तो विहगाधिपम् ॥१५॥

नृत्तैश्च विविधैर्गेयैर्वाद्यैश्च विविधैरपि ।
ब्रह्मघोषैस्तथा स्तोत्रैर्नीत्वा ग्रामप्रदक्षिणम् ॥१६॥

---

१०. c: A. स्थाप° for स्नाप°;
११. d: T. M. शय्यायाम् for शय्याया;
१६. a: A. नृत्तैर्गेयैश्च विविधैः;
b: A. M. वाद्यैर्नानाविधैरपि;

मण्डपेऽलङ्कृते देवमवरोप्यासने शुभे ।
उपचर्य यथायोगं सम्भारान् संभृतान् गुरुः ॥१७॥

देवाय दर्शयेत् सर्वान् आनीतान् जनसंसदि ।
अथ संस्नाप्य देवेशमभ्यर्च्य च निवेद्य च ॥१८॥

कृत्वा च नित्यहोमान्तं निनयेत् गर्भमन्दिरम् ।

[उत्सवक्रमे प्रतिसरबन्धप्रकारः]

सायं प्रविश्य सदनं यजमानेन देशिकः ॥१९॥

प्रणम्य तमनुज्ञाप्य बद्ध्वा कल्याणकौतुकम् ।
उत्सवस्नानबल्यर्चा प्रतिमास्वप्यनन्तरम् ॥२०॥

बद्ध्वा प्रतिसरं पश्चात् तेषां हस्ते यथाविधि ।
उत्थाप्य बलिबिम्बं तत् प्रादक्षिण्येन मन्दिरम् ॥२१॥

यागमण्डपमानीय स्थापयेदासने हरिम् ।

[कुंभन्यासः तत्र तत्तद्देवानामर्चनक्रमश्च]

वेदिकायां धान्यपीठे मध्ये कुंभं च दक्षिणे ॥२२॥

करकं विन्यसेत्कुंभान् अष्टौ प्रागादिषु क्रमात् ।
द्वारतोरणकुम्भानां प्रतिष्ठायामिवार्चनम् ॥२३॥

मूलमूर्तिं यजेत्कुम्भे वर्धन्यामस्त्रदेवता ।
प्रागादिदिक्षु कुम्भेषु वासुदेवादयः स्मृताः ॥२४॥

आग्नेयादिषु कोणेषु पुरुषादीन् समर्चयेत् ।
पुरुषश्च तथा सत्यः अच्युतोऽनन्त इत्यमी ॥२५॥

अभ्यर्चयेच्च विधिवत् हवींषि च निवेदयेत् ।
बलिबिम्बं तथाभ्यर्च्य निवेद्य च यथाविधि ॥२६॥

---

१७. b: T. आरोप्य for अवरोप्य;

१८. d: T. निवेश्य for निवेद्य;

२०. c: M. स्थान for स्नान;

२१. b: A. स्वेषाम् for तेषाम्;

२२. d: A. मध्य° for मध्ये;

२३. b: M. प्राणादिषु for प्रागादिषु;

[यागमण्डपे वेदपारायणादिक्रमः]

प्रागाद्याशासु सर्वासु ऋग्यजुः सामपाठकान् ।
अथर्वाङ्गिरसाभिज्ञान् पाठयित्वा यथाक्रमम् ॥२७॥

तूर्यादिवाद्यघोषेण पूरिते च दिगन्तरे ।

[यागमण्डपे तत्तद्धोमकुण्डेषु तत्तदुद्देश्यकहोमक्रमः]

प्रागाद्याशासु कुण्डेषु वासुदेवादिकान् यजेत् ॥२८॥

तीर्थावसानिकं तत्र सान्निध्यं प्रार्थयेदपि ।
एवमभ्यर्चिते कुम्भे भगवत्यखिलेश्वरे ॥२९॥

सर्पिराद्यैर्भवेद्धोमः तत्तन्मन्त्रैर्यथाक्रमम् ।
सर्पिभिः कुसुमैर्धूपद्रव्यैश्च समिधा पुनः ॥३०॥

पयसा चापि दध्ना च तिलव्रीहियवैरपि ।
कुण्डाधिदैवतैर्मन्त्रैः पृथगष्टोत्तरं शतम् ॥३१॥

अष्टाविंशतिरष्टौ वा होमः प्रागादिपूर्ववत् ।
एवं हुत्वाथ विधिवत् नृसूक्तेन चरुं पुनः ॥३२॥

प्रतिकुण्डं ब्रह्मकुण्डे पायसेन घृतेन वा ।
ब्रह्मादिदेवानुद्दिश्य जुहुयात् कलशोद्भव ॥३३॥

ब्रह्मणे चाथ रुद्राय प्रजानां पतये तथा ।
इन्द्राय च महेन्द्राय भानवे जातवेधसे ॥३४॥

धर्मराजाय मरुते कुबेराय च यातुने ।
वरुणाय ऋषिभ्यश्च वेदेभ्यः पुष्पधन्वने ॥३५॥

विश्वेभ्यश्चापि देवेभ्यः छन्दोभ्यः कालमूर्तये ।
धरण्यै अद्रिराजाय नदीभ्यो वनमूर्तये ॥३६॥

---

२९. c: M. कुण्डौ for कुम्भे;
d: M. om. भगवत्य;

३४. d: M. जातवेदसे for जातवेधसे;

३५. b: A. धातुने for यातुने;
d: M. T. °जन्मने for धन्वने;

भूतेभ्यश्च पशुभ्यश्च ओषधीभ्यः श्रियै तथा ।
अप्सरोभ्यश्च लोकेभ्यः समुद्रेभ्योऽम्बराय च ॥३७॥

गन्धर्वेभ्यश्च यक्षेभ्यः पार्षदेभ्यश्च चक्रिणे ।
चण्डादिद्वारपालेभ्यः सर्वेभ्यश्चापि विष्णवे ॥३८॥

प्रणवाद्यग्निजायान्तं उक्त्वा होमं समाचरेत् ।
ततस्तु मूलमन्त्रेण हुत्वेदं विष्णुरित्यृचा ॥३९॥

[उत्सवक्रमे बलिदानप्रकारः]

कृत्वा तु स्विष्टकृद्धोमं बलिदानं समाचरेत् ।
माषान्नं घृतसंसिक्तमादाय परिचारकाः ॥४०॥

धूपं दीपं तथा गन्धं पुष्पाणि सुरभीणि च ।
अन्यानि पूजाद्रव्याणि वेदवाद्यपुरस्सरम् ॥४१॥

यानमारोप्य बल्यर्चां तया साकं बलिं चरेत् ।
प्रथमं यागशालायां प्रतिद्वारं बलिं क्षिपेत् ॥४२॥

चण्डादिद्वारपालानां दद्यान्नित्योत्सवे यथा ।
ग्राममध्यं समासाद्य ब्रह्मणे वितरेद्बलिम् ॥४३॥

प्रागादीशानपर्यन्तम् इन्द्रादीनां बलिं क्षिपेत् ।
बलिशिष्टं महापीठे निक्षिपेत्पीठमूर्धनि ॥४४॥

तोयपूर्वोत्तरं दद्याद्बलिं कलशसंभव ।
तत्र देवं समभ्यर्च्य निनयेद्यागमन्दिरम् ॥४५॥

[उत्सवप्रसङ्गे वीथिकासु भगवतः परिक्रमणप्रकारः]

मखकौतुकमाराध्य रथं वा शिविकादिकम् ।
आरोप्य समलङ्कृत्य ब्राह्मणैः स्वस्तिवाचकैः ॥४६॥

---

३७. a: b: M. om;

३८. b: T. छत्रिणे for चक्रिणे;
d: M. सर्पेभ्यः for सर्वेभ्यः;

३९. b: T. उक्त for उक्त्वा;

४४. c: T. पीठम् for शिष्टम्;

निष्क्रम्य मन्दिरात्तस्मात् सर्वावरणभूमिकाः ।
परिक्रमेद्वीथिकाश्च विद्वद्भिर्वेदपाठकैः ॥४७॥

शास्त्रविद्भिश्च कविभिः तथा पौराणिकैरपि ।
मौहूर्तिकैर्भिषग्भिश्च गद्यपद्यविमिश्रकम् ॥४८॥

पठद्भिश्च स्तुतिपरैः नानाभाषाविशारदैः ।
नृत्यद्भिश्चापि गायद्भिः गाणिक्येन च नृत्यता ॥४९॥

वेदान्तिभिश्च यतिभिः योगिभिर्भगवन्मयैः ।
ब्रुवद्भिर्भगवच्छास्त्रं माहात्म्यं च पुनः पुनः ॥५०॥

नानावाद्यरतैः पुंभिः स्त्रीभिश्चाक्षिमनोहरैः ।
सर्वालङ्कारयुक्ताभिर्गमयेद्वीथिकां हरिम् ॥५१॥

छत्रं च वालव्यजनं तालवृन्तं च शोभनम् ।
पताकादीपिकास्स्तंभाः प्रदीपाश्च विशेषतः ॥५२॥

गन्धोद्गारीणि धूपानि तोरणं च गवाक्षिकम् ।
पताकाहस्तिनश्चाश्वा वाद्यानि विविधानि च ॥५३॥

अन्यैश्च मङ्गलैः साकं परिक्रम्य प्रदक्षिणम् ।

[वीथिपरिक्रमणानन्तरं मन्दिरे भगवत आराधनम्]

मन्दिराभ्यन्तरे यानादवरोप्यासने शुभे ॥५४॥

निवेश्य प्राङ्मुखं देवमुपचारैः पृथग्विधैः ।
उपचर्य ततः स्नाप्य निवेद्य च महाहविः ॥५५॥

नीराज्य परमेशानं निनयेन्मङ्गलावनिम् ।
आरोप्य शयने देवम् अर्चयित्वा यथोचितम् ॥५६॥

---

४७. a: M T. मन्दिरम् for मन्दिरात्;
c: M. T. विथिकाम् for वीथिकाः;
४८. d: M. T. गद्यं पद्यं विमिश्रकम्;
४९. c: T. नृत्यद्भिश्च वि० for नृत्यद्भिश्चापि;
५०. a: A. वेदविद्भिः for वेदान्तिभिः;
५३. b: M. T. गवाक्षितम् for गवाक्षिकम्;

शय्योपचारमखिलम् नृत्तगीतादिभिः सह ।
श्रिया धरण्या द्वाभ्यां वा स्वापयेत्पुरुषोत्तमम् ॥५७॥

[भगवतः दैनन्दिनोत्सवक्रमः]

ततः प्रभाते तं देवम् उत्थाप्य शयनाद्गुरुः ।
अर्चयित्वा यथाशास्त्रं कुम्भादीन् यागमन्दिरे ॥५८॥

बलिबिम्बं समभ्यर्च्य हुत्वा वह्नौ यथापुरा ।
बलिं च पूर्ववद्दत्वा यात्रां कुर्यात् यथा निशि ॥५९॥

सायं प्रातः प्रतिदिनं पूजनं हवनं बलिः ।
यात्रा च विधिवत्कार्या स्नपनं च यथाक्रमम् ॥६०॥

दिवसे दिवसे कुर्यादुत्सवं शाङ्र्गधन्वनः ।
देवीभ्यां वा श्रिया वापि विना वा केवलं हरेः ॥६१॥

[भगवतः मङ्गलोत्सवक्रमः]

एवं महोत्सवे विष्णोर्वर्धमाने महामुने ।
देवीभ्यां सह वा लक्ष्म्या कारयेन्मङ्गलोत्सवम् ॥६२॥

पूजादिबलिदानान्तमनुष्ठाय यथाविधि ।
अलङ्कृत्य च देवीभ्यां यानमारोप्य मण्डपम् ॥६३॥

अन्यं नीत्वावरोप्याथ हेमसिंहासने शुभे ।
निवेश्य प्राङ्मुखं देवं स्नापयेन्मङ्गलोदकैः ॥६४॥

धान्यपठिस्य पुरतः मुसलं चाप्युलूखलम् ।
शुद्धोदकेन संक्षाल्य मूलमन्त्रं समुच्चरन् ॥६५॥

स्थापयित्वा नवैर्वस्त्रैः परिवेष्ट्य च पल्लवैः ।
कुसुमैश्चन्दनैर्द्रव्यैः अलङ्कृत्य मनोहरम् ॥६६॥

हरिद्रां तत्र निक्षिप्य श्रियं त्रैलोक्यमातरम् ।
ध्यायन्नभ्यर्चयेत् गन्धपुष्पधूपादिभिः क्रमात् ॥६७॥

---

५९. b: M. पुरम् for पुरा;

६१. श्लोकादनन्तरं A. कोषे 'सर्वालङ्कारयुक्ताभिः गमयेत् वीथिकां हरिम्' इत्येका पंक्तिः अधिका ।

ततो मङ्गलवादिन्यो देवदास्यः स्वलङ्कृताः ।
आवहन्युर्निशां सर्वां यथासूक्ष्मं यथाविधम् ॥६८॥

सौवर्णादिमयं कुंभं सूत्रवस्त्रादिवेष्टितम् ।
धान्यराशौ समावेश्य निशाचूर्णेन पूरयेत् ॥६९॥

सौवर्णलक्ष्मीप्रतिमां रत्नानि च निवेशयेत् ।
कूर्चं च पल्लवं चापि शरावेण पिधापयेत् ॥७०॥

तत्र श्रियं समावाह्य साङ्गं पूजां समाचरेत् ।
मूलमन्त्रेण विधिवत्तैश्चूर्णैरभिषेचयेत् ॥७१॥

श्रीसूक्तविद्ययाभ्यर्च्य यथाविधि यथापुरम् ।
महाहविर्निवेद्यान्ते देशिकेन्द्रश्च ऋत्विजः ॥७२॥

प्रदक्षिणीकृत्य हरिं विकिरेत् कुसुमाञ्जलिम् ।
स्तोत्रयेद्विविधैः स्तोत्रैः मनःप्रह्लादनैरपि ॥७३॥

[मङ्गलोत्सवक्रमे जलद्रोण्यां भगवतः स्नपनप्रकारः]

कस्मिंश्चित् दिवसे पश्चात् कारिते मङ्गलोत्सवे ।
स्नापयेत्सह देवीभ्यां जलद्रोण्यां जगद्गुरुम् ॥७४॥

अपराह्णे तु सम्प्राप्ते शिबिकायां जगद्गुरुम् ।
श्रीभूमिभ्यां समारोप्य नदीतीरं नयेद्गुरुः ॥७५॥

मण्डपे वा प्रपायां वा सर्वालङ्कारसंयुते ।
भेरीमृदङ्गादिरवैः पूरिते च दिगन्तरे ॥७६॥

ऋग्यजुस्सामवेदानां घोषेण परिमण्डिते ।
नृत्यन्तीनां तु दासीनां गीतिस्वननिनादिते ॥७७॥

शास्त्रश्रवणसक्तानां परस्परजिगीषुणाम् ।
अन्योन्याक्रोशविन्यस्तपारुष्यनिनदान्विते ॥७८॥

---

६८. c: M. T. वअहन्युः for आवहन्युः;
६९. d: T. निशा... चर्णयेत्;
७२. c: M. अन्तैः for अन्ते;
७३. b: T. M. प्रकिरेत् For विकिरेत्;
७७. b: M. घोषणे for घोषेण;

दृश्यैश्च दीपिकास्तम्भैर्दर्पणैश्च विराजिते ।
कदलीक्रमुकस्तम्भैः सफलैः परिमण्डिते ॥७९॥

लम्बमानैः पुष्पसरैः मुक्तादामभिरन्विते ।
अतिस्वच्छेन वस्त्रेण सवितानेः मनोहरे ॥८०॥

तत्र मध्ये धान्यपीठं परिकल्प्य मनोहरम् ।
सौवर्णीं वा राजतीं वा जलद्रोणीं निवेशयेत् ॥८१॥

कुङ्कुमक्षोदकर्पूरकस्तूरीरेणुमिश्रितैः ।
चन्दनक्षोदभरितैरम्बुभिः परिपूरयेत् ॥८२॥

पुण्याहवाचनं कृत्वा ब्राह्मणैर्वेदपारगैः ।
प्रोक्षयेत्तां जलद्रोणीमाधारादि विचिन्तयेत् ॥८३॥

गङ्गाद्यास्सरितस्तत्र मन्त्रैरावाहयेज्जले ।
पूजयेच्च निवेद्यान्तं तास्सर्वास्तीर्थदेवताः ॥८४॥

'अघमर्षणसूक्तं' तत् जपेयुः सामवारुणम् ।
उत्थाप्य देवं देवीभ्यां जलद्रोण्यां निवेशयेत् ॥८५॥

तत्र देवं समभ्यर्च्य सौवर्णान्यक्षतान्यपि ।
परितो विकिरेद्दिक्षु चास्त्रमन्त्राभिमन्त्रितान् ॥८६॥

तत उत्थाप्य देवेशं देवीभ्यां सिंहविष्टरे ।
विन्यस्याभ्यर्च्य विधिवन्निवेद्य च महाहविः ॥८७॥

यानमारोप्य विधिवत् प्रापयेन्मङ्गलावनिम् ।

[भगवतः मृगयोत्सवविधिः]

अन्यस्मिन् दिवसे कुर्यान्मृगयां शार्ङ्गधन्वनः ॥८८॥

रात्रौ प्रशस्ता देवस्य मृगया मुनिपुङ्गव ।
बलयन्त्रमखिलं कृत्वा तुरगे वारणेऽपि वा ॥८९॥

आरोप्य देवं भूषाद्यैरलङ्कृत्य मनोहरम् ।
शार्ङ्गं च सायकं तूणीं यथास्थानं निवेशयेत् ॥९०॥

उष्णीषं कवचं चापि कल्पयेत्कनकाम्बरम् ।
कमनीयतमं सर्वं वाहनं च परिच्छदम् ॥९१॥

सायुधैः परिवारैश्च मङ्गलैरखिलैः सह ।
अरण्यभागमखिलं नीत्वा तत्र प्रपाभुवि ॥९२॥

अभ्यर्चयेद्यथायोगं नैवेद्यान्तं मधुद्विषम् ।
ततः प्रदक्षिणीकृत्य यथापूर्वं निवेशयेत् ॥९३॥

[तीर्थयात्रार्थम् अनुज्ञाप्रार्थनं प्रतिसरबन्धनं च]

अर्धरात्रे तु सम्प्राप्ते गत्वा गर्भगृहं गुरुः ।
प्रणम्य यजमानेन प्रार्थयेत्पुरुषोत्तमम् ॥९४॥

तीर्थयात्रा त्वया कार्या श्वः प्रभाते सुरोत्तम ।
तत्र प्रतिसरारंभं त्वमनुज्ञातुमर्हसि ॥९५॥

प्रार्थ्यैवं तीर्थबिम्बस्य बध्नीयात्कौतुकं करे ।
शाययित्वार्चयित्वा च प्रातरुत्थाप्य तं पुनः ॥९६॥

अभ्यर्च्य विधिवत्सर्वं कर्म बल्यन्तमाचरेत् ।

[तीर्थयात्राक्रमे भगवतः अभिषेकक्रमः]

तीर्थबिम्बं समादाय निवेश्य मुखमण्डपे ॥९७॥

स्थापयित्वाग्रतस्तस्य धान्यपीठं प्रकल्पयेत् ।
स्थापितान् यागशालायां कुंभानादाय देशिकः ॥९८॥

परिषिच्य च वर्धन्या तैः कुंभैरभिषेचयेत् ।
प्रोक्षणं मूलमन्त्रेण नृसूक्तेनाभिषेचनम् ॥९९॥

एकबेरे मूलबेरं तैः कुम्भैरभिषेचयेत् ।
पूर्वादिमध्यकुम्भान्तमभिषेकक्रमः स्मृतः ॥१००॥

---

९१. a: M. उष्णीं for उष्णीषम्;

९३. b: A. °द्विषः for. °द्विषम्;

९८. a: M. om तस्य;

९९. b: M. कुंभे for कुंभै;

वस्त्रादिदीपपर्यन्तम् अभ्यर्च्य च निवेद्य च ।

[तीर्थं प्रति भगवतः आनयनम् तत्र स्नपनक्रमश्च]

सर्वमङ्गलसंयुक्तम् आरोप्य मखकौतुकम् ॥१०१॥

हस्त्यादि वा रथं यानं तीर्थबिम्बपुरस्सरम् ।
नदीतीरं समुद्रं वा तटाकं वाथवा सरः ॥१०२॥

गमयित्वोत्सवाङ्गेन कल्पिते तत्र मण्डपे ।
अवरोप्यासने यानान्निविष्टं तीर्थकौतुकम् ॥१०३॥

स्नापयेन्नवभिः कुंभैरर्चितैश्च यथाविधि ।
तीर्थेषु सरिदादीनां गङ्गाद्यावाहनं चरेत् ॥१०४॥

[तीर्थयात्राक्रमे तीर्थबिम्बाद्यलाभे विकल्पाः]

तीर्थबिम्बमलाभे तु चक्रं वा त्रिर्निमज्जयेत् ।
चक्रेण तीर्थे कर्तव्ये सति नद्यादि वारिभिः ॥१०५॥

कूर्चाग्रपतितैर्धीमान् प्रोक्ष्य कल्याणकौतुकम् ।
सरित्सु चक्रमादाय चक्रमन्त्रेण मज्जयेत् ॥१०६॥

अलाभे चापि चक्रस्य कूर्चेनैव समाचरेत् ।

[तीर्थस्नानफलकीर्तनम्]

स्नान्ति ये देवदेवेन ते नरा मुक्तकल्मषाः ॥१०७॥

यान्ति ध्रुवं सुदुष्प्रापं शाश्वतं कमलापतेः ।

[तीर्थस्नपनानन्तरं भगवतः अर्चनमानयनञ्च]

ततो मण्डपमानीय समभ्यर्च्य यथाविधि ॥१०८॥

प्रादक्षिण्येन गमनं प्रापणं मङ्गलावनेः ।

[उत्सवक्रमे ब्राह्मणभोजनविधानम्]

सहस्रं वा शतं वापि लक्षं वापि यथावसु ॥१०९॥

---

१०५. c; d. १०६. om A;

भोजनं ब्राह्मणानां तु प्रत्यहं च महोत्सवे ।

[उत्सवान्तस्नपनं हविर्निवेदनं तत्तद्धोमप्रकारः अग्निविसर्जनं च]

तद्रात्रौ स्नपनं कुर्यात् उत्सवान्तोचितं क्रमात् ॥११०॥

हविर्निवेदनान्तं तु समाराध्य यथाविधि ।
यागमण्डपमासाद्य होमं कृत्वा यथापुरम् ॥१११॥

शान्तिहोमं ततः कुर्यात् संपाताज्यं न चाहरेत् ।
प्रायश्चित्ताय जुहुयात् पञ्चोपनिषदा शतम् ॥११२॥

अग्नीन् विसर्जयेत् पश्चात् पालिकातोरणास्थितान् ।

[गरुडाराधनम् तदुद्वासनम् ध्वजावरोहणञ्च]

देवमारोप्य यानादौ ध्वजस्तंभं समानयेत् ॥११३॥

वैनतेयं समभ्यर्च्य निवेद्य च महाहविः ।
संहारक्रममाश्रित्य पटात्ताक्ष्यं तमुद्वसेत् ॥११४॥

सन्निधाने तु बिम्बस्य ध्वजं तमवरोहयेत् ।

[उत्सवप्रसंगे आवाहितानां देवानामुद्वासनविधिः]

आवाहितांस्ततो देवान् स्थाने स्थाने स्थितानपि ॥११५॥

केवलेनैव तूर्येण बलिं दत्वा गुरूत्तमः ।
उद्वास्य नामभिः स्वैः स्वैः मूकैः परिकरैः सह ॥११६॥

[आलये तत्तत्स्थाने उत्सवादिबिम्बानां निवेशः आराधकस्य गमनं च]

प्रविश्य धाम देवस्य गर्भगेहे निवेशयेत् ।
उत्सवस्नानबल्यर्चातीर्थबिम्बानि पूर्ववत् ॥११७॥

अष्टाक्षरं ततो मन्त्रं सहस्रं वा शतावरम् ।
जप्त्वा प्रणम्य देवेशमनुज्ञाप्य समाव्रजेत् ॥११८॥

॥ इति श्री भार्गवतन्त्रे द्वादशोऽध्यायः ॥

---

११३. b: T. पालिकान्तो for पालिकातो;
d: M. स्तम्बम् for स्तम्भम्;

त्रयोदशोऽध्यायः

[मण्डलकल्पनपूर्वकपुष्पयागविधिनिरूपणाध्यायः]

[मण्डलकल्पनात् पूर्वं भगवतः आराधनम्]

श्रीरामः

प्रभातायां त्रियामायाम् आदित्येऽभ्युदिते गुरुः ।
निर्वर्त्य नियमान् स्वीयान् भक्तैर्भागवतैः सह ॥१॥

आलयाभ्यन्तरं गत्वा संपूज्य च यथाविधि ।
समाप्य बलिदानान्तम् आचार्यो मण्डपान्तरे ॥२॥

[मण्डलवेदिकाकल्पनप्रकारः]

चक्राब्जं वर्त्तयेद्धीमान् वक्ष्यमाणेन वर्त्मना ।
आयामसम विस्तारैर्वेदिकां परिकल्पयेत् ॥३॥

पञ्चभिर्वा चतुर्भिर्वा हस्तैर्दृश्यां मनोहराम् ।
गोमयाम्भोभिरालिप्य कुर्याद्दर्पणसन्निभाम् ॥४॥

[मण्डलकल्पनार्थं सूत्रपातविधिः]

प्राञ्चि तिर्यञ्चि सूत्राणि दश सप्त च पातयेत् ।
षट् पञ्च द्वे च कोष्ठानि सन्ति मध्येऽथ षट्त्रिषु ॥५॥

[कर्णिकादिपञ्चक्षेत्रविभागक्रमः]

मध्ये शङ्कुं स्थापयित्वा भ्रामयित्वाथ पञ्चधा ।
भुवं विभज्य सूत्रेण मध्यमं कर्णिकापदम् ॥६॥

---

१. c: M. निर्वृत्य for निर्वर्त्य;
४. b: A. दृश्य for दृश्याम्;
५. a: A. प्रञ्चा for प्राञ्चि;

द्वितीयं केसरदलं नाभीनां परिकल्पने ।
तृतीयं च तुरीयं च द्वे चारक्षेत्रमुच्यते ॥७॥

पञ्चमं नेमिभूरेषां बहिः कोष्ठानि मार्जयेत् ।

[मण्डलद्वारक्षेत्रकल्पनप्रकारः]

त्रिधा तद्विभजेत्क्षेत्रं सूत्रभ्रमणवर्त्मना ॥८॥

कर्णिकाक्षेत्रमानने सूत्रपातं चतुर्दिश ।
तथाकृते चतुर्दिक्षु द्वारक्षेत्रं भविष्यति ॥९॥

[मण्डले द्वादशाब्जनिर्माणस्थाननिर्देशः]

प्रत्यावरणभूभागे द्वादशाब्जानि कल्पयेत् ।
कोणे कोणे भवेदेकं द्वे द्वे बलजपार्श्वयोः ॥१०॥

[मण्डलकोणेषु पाञ्चजन्यकल्पननिर्देशः]

चतुर्ष्वपि च कोणेषु बहिरावरणत्रयात् ।
पाञ्चजन्यं सुरुचिरं कल्पयेच्छास्त्रवित्तमः ॥११॥

[कर्णिकाक्षेत्रे द्वादशबिन्दुकल्पननिर्देशः]

कल्पयेत्कर्णिकाक्षेत्रे बिन्दुद्वादशकं बुधः ।

[मण्डले अब्जस्य केसरादिपदनिर्माणप्रकारः]

सूत्रभ्रमणमार्गेण द्वितीयं विभजेत्त्रिधा ॥१२॥

प्रथमं केसरपदं द्वितीयं दलभूर्भवेत् ।
तृतीयं नाभिवलयं केसरान् नवतिस्सषट् ॥१३॥

द्वादशाम्बुजरेखाश्च दलभूमौ प्रकल्पयेत् ।
दिग्विदिग्भागकलिताश्चतस्रो विंशतिस्तथा ॥१४॥

---

७. a: A. दले for दलं;
b: A. नाभिन्नम् for नाभीनाम्;

८. a: M. T. पञ्चमां for पञ्चमम्;
d: A. वर्तना for वर्त्मना;

१३. d: T. नवभिः for नवतिः;

[मण्डले अरकल्पनप्रकारः]

एकीकृत्य द्वयं क्षेत्रमररेखाः प्रकल्पयेत् ।
अरद्वयं विदिक्षु स्यात् एकैकं दिक्षु कल्पयेत् ॥१५॥

अम्भोजदलतुल्यानि नीलोत्पलनिभानि च ।
मण्डलं शोभयेत्पञ्चविधैर्वर्णैर्यथाक्रमम् ॥१६॥

[मण्डले वर्णकल्पनार्थमुपादानद्रव्याणि]

शालिपिष्टैर्गन्धचूर्णैः श्वेतवर्णो हरिद्रया ।
पीतवर्णस्तु याज्ञीयैरङ्गारैर्नीलमुच्यते ॥१७॥

याज्ञीयैश्च दलैश्चूर्णैः श्यामलो वर्ण ईरितः ।
कुङ्कुमैरेव रक्तं स्यादेवं पञ्चविधः स्मृतः ॥१८॥

[अब्जकर्णिकादीनां वर्णकल्पनविवेकः]

कर्णिकां पीतवर्णेन बिन्दून् शुक्लेन कल्पयेत् ।
पाटलैः कर्णिकारेखाः कृष्णैः केसरभूतलम् ॥१९॥

द्विधा कृत्वा पूर्वभागं श्वेतैर्भागमथोत्तरम् ।
पीतैरग्रेऽर्जुनैर्बिन्दून् रक्तैश्च दलकोटिषु ॥२०॥

आद्यन्तयोस्तु पत्राणां सितैरक्तैश्च शोभनम् ।
दलान्तवलयं रक्तैः भूषयेदथवार्जुनैः ॥२१॥

श्यामेन भूषयेन्नाभिमसितेनारभूतलम् ।
अराणि रक्तवर्णेन तदन्तवलयं सितैः ॥२२॥

असितैर्नेमिवर्सात सितैर्नेम्यन्तभूतलम् ।
प्रथमावरणं कृष्णैर्द्वितीयावरणं सितैः ॥२३॥

तृतीयावरणं रक्तैः पद्मानि च यथापुरम् ।
रक्तपीतासितसितैर्द्वाराणीन्द्रादिदिक्क्रमात् ॥२४॥

---

१५. b: c: T. कर for °अर;

१६. b: M. T. वा for च;

२२. d: T. अन्ते for अन्त;

शङ्खानर्जुनवर्णेन मध्यरेखारुणामता ।

[चक्रमण्डलस्य वर्णकल्पनप्रकारः]

श्वेतैः रक्तैश्च पीतैश्च श्यामैः कृष्णैश्च पञ्चभिः ॥२५॥

वर्णैर्वा कालकुसुमैः रञ्जयेच्चक्रमण्डलम् ।

[मण्डले भगवतः आराधनम् अनुज्ञायाचनञ्च]

मण्डलं चित्रयित्वैवं प्रोक्ष्य पुण्याहवारिणा ॥२६॥

भद्रपीठं न्यसेदस्मिन् तस्मिन् देवं निवेशयेत् ।
अर्घ्यपाद्यादिभिर्देवमर्चयित्वा प्रणम्य तम् ॥२७॥

भगवन् पुण्डरीकाक्ष सर्वलोकेश्वर प्रभो ।
प्रीतयेऽनुष्ठितस्तेऽद्य ध्वजपूर्वो महोत्सवः ॥२८॥

मया च यजमानेन ऋत्विग्भिः साधकैरपि ।
तत्र न्यूनातिरेकाभ्यां दुष्कृतं यदि जायते ॥२९॥

तद्दोषशान्तये पुष्पैर्यष्टुमिच्छामि सम्प्रति ।
अनुजानीहि मां देव पूरयस्व क्रियामपि ॥३०॥

इति विज्ञाप्य देवेशं प्रारभेत्कुसुमार्चनम् ।

[मण्डले तत्तद्देवानाम् आराधनस्थानविधिनिर्देशः]

'द्वादशाक्षर' वर्णेशान् बिन्दुषु द्वादशस्वपि ॥३१॥

कर्णिकायां वासुदेवमावाह्याभ्यर्चनं ततः ।
अर्घ्यं पाद्यं तथाचामं स्नानं वस्त्रोपवीतकम् ॥३२॥

गन्धं पुष्पं भूषणं च उपचारा नव स्मृताः ।
प्रत्यक्षरं च कुसुमैरर्चयेत्कलशोद्भव ॥३३॥

अङ्गानि हृदयादीनि कुसुमैरञ्जलिस्थितैः ।
फलं भवतु मे पुष्पैर्नम इत्यन्तमुच्चरन् ॥३४॥

---

२८. c: M. प्रीयते for प्रीतये;

३२. d: A. M. स्नान for स्नानम्;

३४. a: M. हृदयानीति for हृदयादीनि;

भूषणानि तथोद्दिश्य श्रीवत्सप्रभृतीनि च ।
सुदर्शनाद्यायुधानि पुष्पैरभ्यर्चनं चरेत् ॥३५॥

केसरेषु श्रियाद्यष्टौ तथा पुष्पैस्समर्चनम् ।
ततो द्वादशशक्तीश्च यजेत दलभूमिषु ॥३६॥

दलान्तवलये शक्तीर्व्याप्त्याद्यास्तास्समर्चयेत् ।
नाभिभागेऽर्चयेद्विष्णुमावाह्य कुसुमैर्बुधः ॥३७॥

विष्णवादीन् द्वादशारेषु कुसुमैः परिपूजयेत् ।
अरान्तवलये देवान् मत्स्यादीन् नेमिभूतले ॥३८॥

शङ्खादीन्यायुधान्यष्टौ प्रथमावरणे बहिः ।
केशवादीन् द्वादशाब्जे द्वितीयावरणाम्बुजे ॥३९॥

वासुदेवादयोऽभ्यर्च्यास्तृतीयावरणे तथा ।
आदित्या द्वादशाराध्या पद्मेषु द्वादशस्वपि ॥४०॥

पूर्वद्वारे खगेशानं दक्षिणे तु सुदर्शनम् ।
गदामपांपतिद्वारे सोमे शङ्खं समर्चयेत् ॥४१॥

[मण्डले भगवतः पुष्पार्चनविधिः]

ततः 'पुरुषसूक्तेन' तथा 'नारायणेन' च ।
'पञ्चोपनिषदै'र्मन्त्रैर्देवस्य चरणाम्बुजे ॥४२॥

पुष्पार्चनं प्रकुर्वीत धूपदीपौ प्रदर्शयेत् ।
वेदैश्चापि तथा साङ्गैः स्तोत्रैर्यजेज्जगदीश्वरम् ॥४३॥

अन्नं निवेदयेत्तस्मै पायसादिचतुर्विधम् ।

[मण्डलार्चनक्रमे होमविधिः]

आग्नेये हवनं कुण्डे स्थण्डिले वा महानसे ॥४४॥

---

३६. a: A. दृष्टौ for द्यष्टौ;

३९. d: T. वरणेऽम्बुजे for °वरणाम्बुजे;

४०. d: M. पदेषु for पद्मेषु;

४१. c: M. गताम् for गदाम्;

समिदाज्यचरुप्रायैः शतमष्टोत्तरं भवेत् ।
'मूलेन' जुहुयादग्नौ पूर्णाहुत्यवसानकम् ॥४५॥

[मण्डलस्थदेवोद्वासनादिक्रमः]

प्रदक्षिणं प्रणामं च कृत्वा स्तुत्वा श्रियः पतिम् ।
मण्डलस्थान् समुद्वास्य प्रथमावरणं नयेत् ॥४६॥

सेवार्थम् आगतान्देवान् स्थानं गन्तुं नियोजयेत् ।
अन्यांश्च मानवान् सर्वान् परिक्रम्य प्रदक्षिणम् ॥४७॥

नित्यैरभ्यन्तरैस्साधं सततं नित्यसेवकैः ।
मन्दिराभ्यन्तरं देवं निनयेद्देशिकोत्तमः ॥४८॥

[महोत्सवान्ते गुरोः सम्माननम्]

एवं महोत्सवं कृत्वा सम्पूज्य गुरुमृत्विजः ।
अलङ्कृत्य विशेषेण मनः प्राह्लादनैर्धनैः ॥४९॥

तं गुरुं यानमारोप्य सर्वमङ्गलसंयुतम् ।
ग्रामं प्रदक्षिणीकृत्य तद्गृहं प्रापयेत्प्रभुः ॥५०॥

[महोत्सवफलश्रुतिः]

एवं महोत्सवं कुर्वन् इह सर्वत्र मोदते ।
परत्र च विशेषेण किं वा भूयादितः परम् ॥५१॥

अश्वमेधसहस्राणि वाजपेयायुतानि च ।
अप्तोर्यामार्बुदं कृत्वा यत् फलं जायते नृणाम् ॥५२॥

अनेन सर्वं देवस्य मखेन भवति ध्रुवम् ।
केवलं देवदेवं तं सेवतां च महोत्सवे ॥५३॥

फलमिष्टं करतले भवत्येव न संशयः ।
किं पुनस्तत्र युक्तानां कैङ्कर्यनिरतात्मनाम् ॥५४॥

॥ इति भार्गवतन्त्रे त्रयोदशोऽध्यायः ॥

---

४५. d: M. T. अवसानिकम् for अवसानकम्;

५४. c: M. यत्नानाम् for युक्तानाम्;

चतुर्दशोऽध्यायः

[विवाहोत्सवनिरूपणाध्यायः]

[पाणिग्रहणोत्सवप्रयोजनं विधिं च वर्णयितुं अगस्त्यस्य प्रार्थना]

अगस्त्यः

कथं नु देवदेवीयं पाणिग्रहणमङ्गलम् ।
तत्कारयित्वा किं भूयात् तन्मह्यं ब्रूहि भार्गव ॥१॥

[उद्वाहोत्सवस्य फलकीर्तनम्]

श्रीरामः

देवेन सह देवीनां शयने परिकल्पिते ।
नोद्वाहकर्म कुर्वीत तत्कुर्यादन्यथा यदि ॥२॥

सर्वकल्याणसम्पत्तिरायुर्वृद्धिश्च जायते ।
अभिप्रेतार्थसिद्धिः स्याद्देवीकल्याणकारिणाम् ॥३॥

नश्यन्ति सर्वदुःखानि पापैश्चापि न लिप्यते ।
धनं धान्यं च लभते पाणिग्रहणकर्मकृत् ॥४॥

[विवाहोत्सवक्रमे अङ्कुरार्पणदिनम्]

उद्वाहदिवसात्पूर्वम् अङ्कुरार्पणमाचरेत् ।

[देवस्य देव्याश्च कल्याणमण्डपे आनयनम्]

कल्याणेऽहनि कर्तव्यं पृथक्कौतुकमङ्गलम् ॥५॥

देवं देवीं च भूषाद्यैरम्बरैः कुसुमादिभिः ।
प्रसाधयित्वा शिबिकामारोप्य गृहधाम च ॥६॥

---

१. a: A. तु for नु;
d: A. मे for मह्यम्;

प्रदक्षिणीकृत्य देवौ नयेत्कल्याणमण्डपम् ।

[अङ्कुरार्पणविधिनिरूपणम्]

विष्वक्सेनं समाराध्य कर्मविघ्नोपशान्तये ॥७॥

अङ्कुराण्यर्पयेत् सद्यो यद्वोद्वाहे प्रसन्नधीः ।
ब्रह्मादिदेवानाराध्य पालिकास्वपि पञ्चसु ॥८॥

बीजपात्रं समादाय नमस्यामि दिशां पतीन् ।
इति प्रार्थ्य समासीनो 'या जाता' इति विद्यया ॥९॥

इति बीजानि संजप्त्वा बीजावापं समाचरेत् ।
मध्ये तु ब्रह्मजज्ञानं यत इन्द्रः पुरन्दरे ॥१०॥

योऽस्य कोष्ठ्यं यमदिशि 'इमं मे वरुणे'भवेत् ।
सोमो धेनुं तथा सोमे बीजावापस्सकृद्भवेत् ॥११॥

तूष्णीं द्विरन्ये ऋत्विग्भिस्तूष्णीं न्यसनमुच्यते ।
'मूर्धानमि'ति मन्त्रेण मृद्भिराच्छाद्य देशिकः ॥१२॥

'इमं मे वरुणे'त्येव सेचयेच्छुद्धवारिभिः ।

[देवस्य देव्याश्च हस्ते कौतुकबन्धप्रकारः]

पुण्याहपूर्वं कृत्वैवं कुर्यात्कौतुकबन्धनम् ॥१३॥

सप्तवारं प्रतिसर'मस्त्रमन्त्रे'ण मन्त्रितम् ।
'त्र्यम्बकेन' ऋचालिप्य चन्दनक्षोदवारिणा ॥१४॥

'विश्वेत्ताते'ति मन्त्रेण हस्ते देवस्य दक्षिणे ।
बन्धयेत् स्व-स्वमन्त्रेण देवीनामितरे करे ॥१५॥

---

७. a: A. 'तौ' इत्येकं पदं देवौ इत्यतः पूर्वमधिकम्

८. b: A. यद्व for यद्वो°;

१०. c: A. ब्रह्मजि for ब्रह्मज°;

११. b: A. वारुणे M बरुणो for वरुणे;

१४. c: T. आलिख्य for आलिप्य;
d: M. वारिणम् for वारिणा;

[रक्षाविधिः]

स्पृष्ट्वा दक्षिणहस्तेन 'यो ब्रह्मे'त्यभिमन्त्रयेत् ।
'बृहत्सामे'ति मन्त्रेण रक्षा स्याद्धूपभस्मना ॥१६॥

त्रिकृत्वः प्रणमेद्देवं 'पुण्डरीकाक्ष'विद्यया ।

[शुभिकाबन्धनविधिः पुष्पमालिकाबन्धनविधिश्चः]

उल्लिख्याग्निं प्रतिष्ठाप्य 'शुभिके शिर'इत्यृचा ॥१७॥

शुभिकां बन्धयेन्मूर्ध्नि दम्पतीनां यथाक्रमम् ।
'यामाहरदि'ति ऋचा बन्धयेत्पुष्पमालिकाम् ॥१८॥

पादप्रक्षालनं विष्णोः 'तथा त्रीनि पदेति च ।
'मयि मह' इति मन्त्रेण आत्मानमभिमर्शयेत् ॥१९॥

[पाणिग्रहणविधिनिरूपणक्रमे प्रोक्षणप्रकारः]

ततस्तु मृण्मये पात्रे साक्षते पुष्पसंयुते ।
अर्हणायाम्बुनापूर्य गृह्णीयात्करयोर्द्वयोः ॥२०॥

'अर्हणीया आप' इति प्रार्थ्य देवं ततः परम् ।
'आमागन्नि'ति मन्त्रेण जपेत्पात्राम्बुदेशिकः ॥२१॥

हस्ते तु देवदेवस्य 'विरोजो दोह' इत्यृचा ।
निनीय नीतमुदकं 'समुद्रं' वेति चोच्चरन् ॥२२॥

प्रोक्षयेत्कूर्चमादाय गां च दद्यात्तदा हरेः ।
'युवं वस्त्रेति' मन्त्रेण वस्त्रेणाच्छादयेद्धरिम् ॥२३॥

[यज्ञोपवीतकल्पनं पादयोः अक्षतार्पणश्च]

यज्ञोपवीतमन्त्रेण यज्ञसूत्रं प्रकल्पयेत् ।
'इरावतीति'मन्त्रेण पादयोरक्षतार्पणम् ॥२४॥

---

१६ d: M. धूम for धूप;

२१. c: A. आगामन् for आमागन्

२२. b: A. देव for दोह;

[मधुपर्कनिवेदनापोशनक्रमः]

मधुपर्कं स्वर्णपात्रे गृहीत्वा तं त्रिरुच्चरन् ।
'त्र्य्यै' 'आमागन्निति' च द्वाभ्यां तमभिमन्त्रयेत् ॥२५॥

'अमृतोपस्तरणम'सीत्यापोशनमथ स्मृतम् ।
'यन्मधुने'ति च जपन् मधुपर्कं निवेदयेत् ॥२६॥

'अमृताधान'मन्त्रण पुनरापोशनं मतम् ।

[गोविसर्जनप्रकारः]

गां प्रदर्श्याथ हरये 'गौगौ'र'सीति विद्यया ॥२७॥

प्रणवो चं चिकितुषे इति गामभिमन्त्रयेत् ।
'ओमुत्सृजत'इत्युक्त्वा गां विसृज्य ततो गुरुः ॥२८॥

[अन्ननिवेदनक्रमः]

'भूतं सेति' वदन् धीमान् अन्नं तस्मै निवेदयेत् ।
'ओं कल्पयत' इत्युच्चैः ब्रूयाद्देशिकसत्तमः ॥२९॥

[भगवते देव्याः दानप्रकारः]

ततो नूतनवस्त्रेण परिधाय युवास्विति' ।
दिव्यैराभरणैर्माल्यैरलङ्कृत्य श्रियं भुवम् ॥३०॥

प्राणानायम्य संकल्प्य दाता भूषणभूषिताम् ।
स्वगोत्रनामकथितां देवीमुदकपूर्वकम् ॥३१॥

सुवर्णोर्वीयुतां दद्यात् विष्णवे च स्वयंभुवे ।
कन्यां कनकसम्पन्नां सर्वाभरणभूषिताम् ॥३२॥

---

२५. b: A. ताम् for तम्;
c: T. तुयैं आगामन्निति च;
२७. a: A. M. अमृताविधान for अमृताधान;
२८. a: M. T. प्रणुवो for प्रणवो;
३१. b: M. T. भूषितः for भूषिताम्;
३२. a: सुवर्णोर्वीयं ताम् for सुवर्णोर्वीयुताम्;
d: A. स्वर्ण for सर्व;

दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ।
इत्युक्त्वा दक्षिणं हस्तं गीतवादित्रनिस्वनैः ।।३३।।

'देवस्य त्वेति' मन्त्रेण तां गुरुः परमात्मनः ।
अर्पयेद्दक्षिणे हस्ते सहिरण्योदकं करम् ।।३४।।

प्रणवेनाथ युञ्जीत देवेन कमलां भुवम् ।
ततः पाणिगृहीतायाः देव्या देवस्य मूर्धनि ।।३५।।

'ध्रुवं तेति' प्रकीर्यन्ते कुसुमान्यक्षतान्यपि ।
'अभ्रातृघ्नीमिति' ऋचं जप्त्वा पश्चात् स्वयंभुवे ।।३६।।

'अघोरचक्षुषा' देवीं दर्शयेत्कलशोद्भव ।
कर्तव्यान्यपि कर्माणि पालनीयास्तथा प्रजाः ।।३७।।

आवाभ्यामिति संकल्पस्तयोस्तं च विचिन्तयेत् ।
दर्भं संगृह्य तदनु जपन्निदमहं त्विति ।।३८।।

भ्रुवोर्मध्येन संस्पृश्य प्राच्यां दिशि विसर्जयेत् ।
ततो'जीवां रुदन्तीति' जप्त्वा वेदविदो द्विजान् ।।३९।।

'व्युक्षत्क्रूरमि'ति श्रुत्या स्नानीयाय नियोजयेत् ।
'अर्यम्न' इति मन्त्रेण दर्भेण वलयं श्रियः ।।४०।।

'निधाय खेन स' इति युगच्छिद्रं निवेशयेत् ।
'शं ते हिरण्यम्' इत्युक्त्वा स्वर्णं छिद्रे पिधाय च ।।४१।।

द्विजाहृतजलैर्देवीम् अब्लिङ्गाभिश्च पञ्चभिः ।
स्नापयित्वा'ग्निमूर्धेति' प्लोतवस्त्रेण मार्जयेत् ।।४२।।

'परित्वा' 'गीर्वणा' द्वाभ्यां वस्त्राभ्यां छादनं श्रियः ।
'द्वादशाक्षरमन्त्रेण' नमः प्रणवविद्यया ।।४३।।

---

३५. a: A. प्रणवेन च for प्रणवेनाथ;
३७. d: A प्रजास्तथा for तथा प्रजाः;
३९. a: M. T. संमृज्य for संस्पृश्य;
४०. a: A. M. व्युत्क्षुत्क्रूरम् for व्युक्षक्रूरम्;
४१. d: A. M. स्वर्णं for स्वर्णम्;
४३. d: M. T. मिश्रया for विद्यया;

सुवर्णं बन्धयेत्कण्ठे सर्वमङ्गलसंयुतम् ।
'आशासान सौमनसम्' इति योक्त्रेण बन्धयेत् ॥४४॥

[उद्वाहहोमप्रकारः]

उद्वाहहोमं कुर्वीत उत्तराशामुखो गुरुः ।
परिस्तीर्य यथान्यायं पुरस्तात् तन्त्रमाचरेत् ॥४५॥

समिद्भिश्चरुणा चाज्यैर्होमं उद्वाहकर्मणि ।
समिद्भिराज्यैर्जुहुयात् 'देव्याः सूक्तेन' षोडश ॥४६॥

चरुणा 'विष्णुगायत्र्या' चतुर्विंशाहुतिर्भवेत् ।
'श्रीसूक्तस्तु' श्रियो देव्याः 'भूसूक्त'स्तु भुवो भवेत् ॥४७॥

अन्यासां यदि देवीनां तासां मूलेन षोडश ।

[लाजाहोमप्रकारः प्रायश्चित्ताहुत्यादिप्रकारश्च]

ततः 'पुरुषसूक्तेन' लाजहोमं समाचरेत् ॥४८॥

अनलं त्रिःपरिक्रम्य लाजशेषं सकृद्गुरुः ।
जुहुयात्प्रणवेनाग्नौ 'पञ्च वारुणिकैः' पुनः ॥४९॥

प्रायश्चित्ताहुतिं हुत्वा द्वादशाक्षरविद्यया ।
पूर्णाहुतिविधानं स्यात् ब्राह्मणानपि भोजयेत् ॥५०॥

तोषयित्वाथदेवेशं देवीं चाभ्यर्च्य देशिकः ।
पुण्याहं वाचयेत्पश्चात् मधुपर्कं निवेदयेत् ॥५१॥

नीराजयेत्तदाशीश्च पिण्डिकाक्षेपणं तथा ।

[विवाहोत्सवक्रमे दैनन्दिनकृत्यम्]

प्रत्यहं भोजयेद्विप्रान् स्नापयेच्च यथाविधि ॥५२॥

उत्सवं चान्वहं कुर्यात् प्रातः सायं यथाविधि ।
अग्नौ च जुहुयान्नित्यं सन्ध्ययोरुभयोरपि ॥५३॥

---

४४. c: M. T. आशासाना for अशासान;

४८. a: A. यति for यदि;

५२. a: M. T. तथा for तदा;

५३. b: M. T. सायं प्रातः for प्रातः सायम्;

पालिकादेवतास्सर्वाः पूजयेदन्वहं गुरुः ।

[विवाहोत्सवक्रमे चतुर्थदिनकृत्यम्]

चतुर्थेऽहनि सम्प्राप्ते तुर्ययामे यथाविधि ॥५४॥

उद्वाहशेषहोमं तत् कारयेत्कमलापतेः ।
सर्पिषा 'दम्पतीमन्त्रैः' कुर्यादष्टोत्तरं शतम् ॥५५॥

प्रायश्चित्ताहुर्ति कुर्यात् 'पञ्चोपनिषदा' पुनः ।
पूर्णाहुर्ति ततः कुर्यात् 'मूलमन्त्रेण' देशिकः ॥५६॥

सैलादिपूगं ताम्बूलं प्रणवेन निवेदयेत् ।
ताम्बूलं दक्षिणां चापि ब्राह्मणेभ्यः प्रदापयेत् ॥५७॥

[विवाहोत्सवक्रमे पञ्चमदिनकृत्यम्]

पञ्चमे दिवसे प्राप्ते तैलाभ्यंगं तयोर्भवेत् ।
महाहविर्निवेद्याथ कारयेदुत्सवं महत् ॥५८॥

[इतरासां देवीनां विवाहविधिः]

उद्वाहानन्तरं देवं देवीसहितमर्चयेत् ।
देवीनामितरासां च विवाहविधिरीदृशः ॥५९॥

॥ इति भार्गवतन्त्रे चतुर्दशोऽध्यायः ॥

---

५४. d: M. T. तथा निशि for यथाविधि;

५६. a: M T. पञ्चोपनिषदा कुर्यात्;

b: M. T. प्रायश्चित्ताहुर्ति पुनः;

पञ्चदशोऽध्यायः

[विविधप्रतिष्ठाविधिनिरूपणाध्यायः]

[विध्यादिदेवानां विमानादीनां च प्रतिष्ठाक्रमविषयकः प्रश्नः]

अगस्त्यः

विधिरुद्रार्कसुत्रामकुबेराद्यमृताशिनाम् ।
तार्क्ष्यविघ्नेशसर्पेन्द्रचण्डाद्यमलसूरिणाम् ॥१॥

विमानमण्डपादीनां बलिपीठादिकस्य च ।
घण्टाक्षमालायानानां देवीनां च विशेषतः ॥२॥

प्रभापद्मासनादीनां पादुकायाश्च भार्गव ।
वापीकूपतटाकानां प्रतिष्ठा कीदृशी प्रभो ॥३॥

[विविधप्रतिष्ठाक्रमे सामान्यविषयाः]

श्रीरामः

शृणु वक्ष्ये मुनिश्रेष्ठ प्रतिष्ठा विविधा अपि ।
अङ्कुरार्पणमारभ्य क्रियाः पूर्वं यथा तथा ॥४॥

[स्वतन्त्रपरतन्त्रप्रतिष्ठयोः कुम्भसंख्यादिविचारः]

स्वातन्त्र्ये नवकुंभाः स्युरेककुंभः परत्र चेत् ।
वर्धन्यैव महाकुंभस्थापनं सर्वकर्मसु ॥५॥

आवाहनं महाकुंभे प्रतिष्ठा यस्य कारयेत् ।
उपकुंभाष्टके कुर्यादिन्द्रादीनां समर्चनम् ॥६॥

एकस्मिन्नेव कुण्डे स्याद्धवनं नान्यथा भवेत् ।
तत्तन्नाम चतुर्थ्यैव मन्त्रोद्धारं समाचरेत् ॥७॥

---

४. b: M. विधिनापि for विविधा अपि;

५. a: T. स्वातन्त्रे for स्वातन्त्र्ये;
c: M वर्धन्येव for वर्धन्यैव;

[वाहनादिप्रतिष्ठाक्रमे विशेषः]

प्रणवादिनमोन्तं स्यादर्चनं वाहनादिषु ।
स्वाहान्तं हवने मन्त्रः प्रतिष्ठोत्सवकर्मसु ॥८॥

स्नपनं नवभिः कुंभैर्नान्यथा परिकल्पयेत् ।
मृत्तिवस्तुकचित्राणां स्नपनं दर्पणे भवेत् ॥९॥

देवीनां तु श्रियादीनां विशेषः किञ्चिदुच्यते ।
प्राग्भागे कमले कुण्डे श्रियमावाह्य पूजयेत् ॥१०॥

द्वारे चण्डीं प्रचण्डीञ्च विष्वक्सेनपदे पुनः ।
सुमुखीं स्थापयेद्धीमान् कुंभेषु नवसु क्रमात् ॥११॥

महाकुंभेऽर्चयेद्देवीं प्रतिष्ठाप्य स्वनामतः ।
सुदर्शनं च करके प्रागाद्यष्टसु च क्रमात् ॥१२॥

वागीश्वरी क्रिया कीर्तिर्लक्ष्मीः सृष्टिस्तथैव च ।
प्रह्वी सत्या तथा ब्राह्मी यष्टव्याः कलशेष्विमाः ॥१३॥

अन्यत्सर्वं यथापूर्वं विशेषो नास्ति कश्चन ।
आयुधन्यासयजनं विष्णोरेकस्य कीर्तितम् ॥१४॥

[विमानमण्डपादीनां प्रतिष्ठाक्रमे विशेषः]

विमानमण्डपादीनां विशेषमवधारय ।
नृसूक्तरूपिणं देवं ध्यात्वा नारायणं हरिम् ॥१५॥

छायास्नपनमादर्शे सकूर्चे परिकल्पयेत् ।
शयनं च महावेद्यां कूर्चद्वारा समाचरेत् ॥१६॥

'अग्निर्मे वाचि' मन्त्रेण कूर्चं स्पृष्ट्वाभिमन्त्रयेत् ।
महाकुंभे च कुण्डे च विष्णुगायत्रिया गुरुः ॥१७॥

आवाह्य पूजयेद्धोमं तथा कलशसंभव ।
समिद्भिराज्यैश्चरुभिस्तिलैर्हुत्वा यथाक्रमम् ॥१८॥

---

९. c: A. मूर्ति for मृत्ति;

१३. a: T. त्रिधा for क्रिया;

१४. d: T. M. कीर्तितः for कीर्तितम्;

१६. d: M T. समर्चयेत् for समाचरेत्;

१८. a: M. T. होम for होमम्;

महाव्याहृतिभिर्हुत्वा संपाताज्येन सेचयेत् ।
अन्यत्सर्वं यथापूर्वमेवं वै मण्डपस्य च ॥१९॥

[बलिपीठप्रतिष्ठाक्रमे विशेषः]

बलिपीठानि सर्वाणि साक्षात्तोयेऽधिवासयेत् ।
स्नापयेच्च यथान्याय्यं स्थापयेद्धान्यराशिषु ॥२०॥

ध्यानमावाहनं चापि होमश्चापि विमानवत् ।
ओं भूतेभ्य नम इति महापीठमनुर्भवेत् ॥२१॥

अन्येषामेवमेवोह्यं पीठानां परिकल्पने ।

[ध्वजप्रतिष्ठायां विशेषः]

ध्वजस्तंभप्रतिष्ठायां देवता तु खगेश्वरः ॥२२॥

न दृष्टिमोक्षणं तत्र तथा प्रासादपीठयोः ।
न्यासहोमे तु सम्प्राप्ते विमानवदिहाचरेत् ॥२३॥

[वेद्याः प्रतिष्ठाक्रमे विशेषः]

वेद्यां शयनमप्येवं स्नानं चाम्बवधिवासनम् ।
बलिपीठविधानोक्तमन्यत् सर्वं यथापुरम् ॥२४॥

[पादुकायाः घण्टायाश्च प्रतिष्ठाक्रमे विशेषः]

पादुकायाश्च घण्टायाः बलिपीठक्रिया भवेत् ।
पादुकादेवता शेषः घण्टायाः कमलालया ॥२५॥

[महानसप्रतिष्ठायां विशेषः]

महानसप्रतिष्ठायां लक्ष्मीं तत्र निवेशयेत् ।
चुल्या मध्ये तु धातारं विधातारं तु पृष्ठतः ॥२६॥

---

२१. c: T. om. ओं;

२२. a: A. वाह्यं for °वोह्यम्;

b: A. पीतानाम् for पाठानाम्;

२६. d: T. च for तु;

[द्वारदेवताप्रतिष्ठायां विशेषः]

धर्माधर्मद्वयं स्थाप्यं सव्ये सव्येतरे तथा ।
चण्डप्रचण्डौ तद्द्वारे शिष्टं कर्म विमानवत् ।।२७।।

[वापीकूपादीनां प्रतिष्ठायां विशेषः]

वापीकूपतटाकानां वरुणो देवता भवेत् ।
अङ्कुराण्यर्पयित्वादौ कुम्भस्थापनमाचरेत् ।।२८।।

कौतुकं बन्धयेत्कुम्भे कूर्चेन शयनं भवेत् ।
तत्त्वाभिमन्त्रणं होमो विमानविधिना भवेत् ।।२९।।

जलाधिवासनं नैव तथा नयनमोक्षणम् ।
सर्वमन्यद्विधातव्यं प्रतिष्ठासमये गुरुः ।।३०।।

गङ्गाद्याः सरितस्तत्र मन्त्रैरावाहयेज्जले ।
महाकुंभजलं तत्र वरुणर्चानियोजयेत् ।।३१।।

[अक्षमालाप्रतिष्ठाक्रमे विशेषः]

अक्षमालाप्रतिष्ठायां गोमूत्रे त्वधिवासयेत् ।
पञ्चगव्येन संक्षाल्य पद्मपत्रे निवेशयेत् ।।३२।।

पुण्याहवारिभिः प्रोक्ष्य कुङ्कुमेनानुलेपयेत् ।
शालिपीठे विनिक्षिप्य 'अग्निर्मे'त्यभिमन्त्र्य च ।।३३।।

विष्णुशक्तिर्भवेद्देवी मनुरष्टाक्षरो भवेत् ।
प्रोक्षणादिक्रियां सर्वां यथाविधि समाचरेत् ।।३४।।

---

३१. d: M. वरुण ऋचा, T. वरुणार्चा for वरुणर्चां;

३२. a: A. om क्षमा°

b: T. त्वधिवास्य च for त्वधिवासयेत्;

३३. d: M. मन्त्रयेत् for मन्त्र्य च;

३४. a: A. विशु for विष्णु;

c: A. प्रोक्षणान्तं for प्रोक्षणादि°

[धूपादीनां प्रतिष्ठाक्रमे विशेषः]

धूपस्य देवता वह्निर्दीपस्य च दिवाकरः ।
छत्रचामरवाद्यानां पुण्याहप्रोक्षणं भवेत् ॥३५॥

[चण्डादिदेवानां हेतीनां च प्रतिष्ठाक्रमे विशेषः]

चण्डादिदेवतानां च हेतीनां च जगद्गुरोः ।
इन्द्रादीनामिव भवेत् विशेषो नास्ति कश्चन ॥३६॥

[भक्तबिम्बप्रतिष्ठाविधिः]

भक्तबिम्बप्रतिष्ठायां कुर्यात्प्रतिसराङ्कुरे ।
विवाहोक्तेन विधिना कुम्भमेकं समर्चयेत् ॥३७॥

एकस्मिन्नेव कुर्वीत कुण्डे होमादि पूर्ववत् ।
न होमो न बलिस्तीर्थं न ध्वजारोहणक्रिया ॥३८॥

मृगया च जलद्रोणी न भक्तोत्सवकर्मणि ।

[रथादियानप्रतिष्ठायां विशेषः]

रथादियानजातस्य देवता विहगाधिपः ॥३९॥

कुम्भमेकं समभ्यर्च्य कुण्डे वा स्थण्डिलेऽपि वा ।
मूर्तिहोममनुष्ठाय प्रोक्षयेत्कुंभवारिणा ॥४०॥

[गृहार्चाप्रतिष्ठाक्रमः तत्फलञ्च]

गृहार्चास्थापने सर्वं प्रतिष्ठाकर्म पूर्ववत् ।
गृहवंशर्द्धिकृद्देवः सदनस्थापितो हरिः ॥४१॥

[मन्दिरे देवस्थापनफलम्]

मन्दिरे स्थापितो देवः पालयेद्भुवनत्रयम् ।

॥ इति भार्गवतन्त्रे पञ्चदशोऽध्यायः ॥

---

३५. b: A. तु for च;
d: T. M. चरेत् for भवेत्;

षोडशोऽध्यायः

[समाराधनविधिनिरूपणाध्यायः]

[आराधकस्यालयप्रवेशक्रमः]

श्रीरामः

स्नात्वा पूर्वाह्णिकं कृत्वा गुरुर्देवालयाद्बहिः ।
प्रक्षाल्य पादौ पाणी च त्रिराचम्यालयं विशेत् ॥१॥

[कवाटोद्घाटनं भगवत्प्रबोधनञ्च]

प्रथमावरणं गत्वा नत्वोद्दिश्य श्रियः पतिम् ।
कृते तालत्रये पश्चात् कवाटोद्घाटनं चरेत् ॥२॥

तदा प्रबोधयेद्देवं वासुदेवं सनातनम् ।
प्रबुद्ध जगदीशान प्रबुद्ध कमलापते ॥३॥

प्रबुद्ध पुण्डरीकाक्ष प्रबुद्ध रमया सह ।
प्रबुद्धानन्तकल्याणवारिधे करुणाम्बुधे ॥४॥

प्रबुद्ध चन्द्रवदन कमलाङ्घ्रिसरोरुह ।
स्तुवन्ति वेदाश्चत्वारः नमन्ति द्रुहिणादयः ॥५॥

अस्ताचलं गतश्चन्द्रः उदयं याति भास्करः ।
उन्मीलयाक्षियुगलं नृत्यत्यप्सरसां गणः ॥६॥

तुम्बुरुर्नारदश्चोभौ वीणया मञ्जु गायतः ।
तिष्ठन्ति ऋषयः सर्वे सेवार्थं गोपुराद्बहिः ॥७॥

बालातपा विसर्पन्ति प्रबुद्धान्यम्बुजान्यपि ।
षट्पदा मकरन्दाय भ्रमन्ति कमलोदरे ॥८॥

चक्रवाकद्विजगणैर्गार्हस्थ्यमनुभूयते ।
उत्तिष्ठ इति मन्त्रैस्त्वामुपासन्ते द्विजोत्तमाः ॥९॥

---

१. d: T. व्रजेत् for विशेत्;

२. c: M. पञ्च for पश्चात्;

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ पुरुषोत्तम ।

[निर्माल्यविनियोगः पात्रप्रक्षालनं च]

एवं प्रबोध्य देवेशं दीपेषु ज्वलितेष्वपि ॥१०॥

माल्यगन्धादिदेवस्य विष्वक्सेनाय दापयेत् ।
पूजायोग्यानि पात्राणि क्षालयेच्च यथातथम् ॥११॥

[भूतशुद्धिप्रकारः]

सपवित्रकरो भूत्वा सोर्ध्वपुण्ड्रः स्वलङ्कृतः ।
नादिते सकले वाद्ये ब्रह्मघोषे च घोषिते ॥१२॥

शब्दब्रह्ममयीं ध्यात्वा घण्टां हस्तेन चालयेत् ।
'अस्त्रमन्त्रेण' बध्नियाद्दिशिकः ककुभो दश ॥१३॥

'मूलमन्त्रेण' कुर्वीत प्राणायामत्रयं ततः ।
रेचकं पुरकं चैव कुभकं रेचकं तथा ॥१४॥

एवं चतुर्विधैर्युक्तः प्राणायाम उदाहृतः ।
सप्तभिर्द्विगुणैर्वापि पुनस्तद्वच्चतुर्गुणैः ॥१५॥

आद्यैश्च 'मूलमन्त्र'स्य संख्योक्ता शास्त्रवित्तमैः ।
गन्धेन सहितां पृथ्वीं संहरेदप्सु योगवित् ॥१६॥

ता रसेन समं वह्नौ तं वायौ रूपमात्रया ।
तमाकाशे स्पर्शयुतं तच्च शब्देन मानसे ॥१७॥

संहरेत्तदहंकारे तं बुद्धौ तां महत्यपि ।
महान्तं संहरेज्जीवे जीवं तं ब्रह्मणि ध्रुवे ॥१८॥

---

१०. d: A. दीपेषू° for दीपेषु;
१२. b: M. ऊर्ध्व T. स्वोर्ध्व for सोर्ध्व;
१४. c: T. कुंभकम् for पूरकम्;
d: T. पूरकम् for कुंभकम्;
१५. b: M. प्राणायामान् for प्राणायाम;
c: M. T. चापि for वापि;
१६. b: T. उक्तम् for °उक्ता;

निवेश्य वह्निबीजेन दग्धं ध्यायेद्वपुर्गुरुः ।
वारुणेनैव बीजेन सिक्तं जातं पुनः स्मरेत् ॥१९॥

ब्रह्मणो निर्गतं जीवं स्मृत्वा तस्माद्गुरूत्तमः ।
महान्तं च ततो बुद्धिं बुद्धेर्जातामहंकृतिम् ॥२०॥

अहंकृतेर्मनो ध्यायेत् तस्माच्छब्देन चाम्बरम् ।
स्पर्शेन चाम्बराद्वायुं वायो रूपेण चानलम् ॥२१॥

अनलाद्रससंयुक्ता आपश्ताभ्यो महीं स्मरेत् ।
गन्धेन सहितामेवं विशोध्य वपुरात्मवान् ॥२२॥

[भूतशुद्धिक्रमे अङ्गेषु वर्णन्यासक्रमः]

न्यसेदङ्गेषु 'मूल'स्य वर्णानष्टौ यथाक्रमम् ।
विन्यसेत्प्रणवं नाभौ नकारं मेहने न्यसेत् ॥२३॥

मोकारं जानुयुगले नाकारं पादयोर्द्वयोः ।
राकारं विन्यसेन्मूर्ध्नि यकारं नयनद्वये ॥२४॥

णाकारं वदनाम्भोजे यकारं हृदयाम्बुजे ।
एवं विन्यस्य वर्णांस्तान् ध्यात्वा तं पुरुषोत्तमम् ॥२५॥

[मानसयागविधिः]

मनसाराधयेद्देवमर्घ्याद्यैर्विविधैः क्रमैः ।
अर्घ्यं पाद्यं तथाचामं स्नानं वस्त्रोपवीतके ॥२६॥

गन्धं पुष्पं तथा धूपं दीपं पुष्पाञ्जलिं तथा ।
नैवेद्यं विविधं चापि ताम्बूलं मुखवासनाम् ॥२७॥

इत्यादि मानसेनैव 'मूलमन्त्रे'ण कारयेत् ।
मूलमन्त्रं जपेत्पश्चादष्टोत्तरशतावरम् ॥२८॥

---

२५. a: T. हृदय for वदन;
c: A. तैः for तान्;

२७. b: M. T. अञ्जलिः for अञ्जलिम्;
d: A. वासना for वासनाम्;

२८. d: A. शतं वरम् M. शतं वारम् for शतावरम्;

[पूजापात्रादिसन्नाहः]

देवस्य पुरतः पात्रे आधारे पञ्च विन्यसेत् ।
पात्राणि परिशुद्धानि शुद्धलोहमयानि च ॥२९॥

आवाहनाह्वयं पात्रमन्यदेकं निवेशयेत् ।
पूरयेद्गलिताम्भोभिः 'प्रणवे'नाभिमन्त्रयेत् ॥३०॥

शोषणं प्लावनं चापि कुर्या'दग्न्यमृताक्षरैः' ।
दर्शयेत्सुरभीमुद्रां तच्चतुर्थ्या नमोऽन्तया ॥३१॥

पाद्यं मध्ये दक्षिणेऽर्घ्यं वामे चाचामवारि च ।
स्नानीयं शाङ्करे कोणे शुद्धोदमितरत्र च ॥३२॥

स्पृशन् दक्षिणहस्तेन तत्तन्नाम स्मरन् द्विजः ।
उच्चार्य कल्पयामीति पात्रादर्घ्याज्जलं हरेत् ॥३३॥

किञ्चिदन्येन पात्रेण निनयेन्नासिकासमम् ।
संमन्त्र्य 'मूलमन्त्रे'ण सप्तवारं द्विजोत्तमः ॥३४॥

प्रोक्षयेत्पञ्चपात्राणि पूजाद्रव्याण्यशेषतः ।

[नित्यार्चनात्पूर्वं योगपीठकल्पनप्रकारः]

पादपीठे तु देवस्य मूलबेरे गुरूत्तमः ॥३५॥

'आयान्त्वाद्येन' मन्त्रेण योगपीठं प्रकल्पयेत् ।
आधारशक्तिः प्रथमा कूर्मकालानलस्ततः ॥३६॥

अनन्तोऽथ महीपश्चादूर्ध्वमूर्ध्वं यथाक्रमम् ।
धर्मो ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ॥३७॥

---

३१. d: M. T. नमोन्तथा for नमोऽन्तया;

३३. b: T. om तत्;
c: A; आचार्यं for उच्चार्यं;

३५. a: M. वं च for पञ्च;

३६. a: M. T. आधाराद्येन for आयान्त्वाद्येन;

प्रागादिदिक्षु क्रमशः अधर्मादिचतुष्टयम् ।
आग्नेय्यादिषु कोणेषु तेषां मध्ये सदाशिवः ॥३८॥

एते पादमयाः प्रोक्ताः खट्वायाः कमलापतेः ।
ऋगादिवेदाश्चत्वारः खट्वाकाष्ठचतुष्टयम् ॥३९॥

वैकारिकस्तैजसश्च भौतिकश्चेति ते त्रिधा ।
पूर्वापरगुणाः प्रोक्तास्तथा सत्वादयो गुणाः ॥४०॥

दक्षिणोत्तरसूत्राणि तूलिका पञ्चभूमिका ।
जीवात्मास्तरणं तस्मादूर्ध्वं पद्मासनं स्मृतम् ॥४१॥

पार्श्वयोरुभयोः कल्प्यौ परमेष्ठित्रिलोचनौ ।
सनत्कुमारः सनकः सनन्दः पृष्ठतस्त्रयः ॥४२॥

एतेषान्तु नमोऽन्तेन चतुर्थ्या प्रणवादिना ।
अर्चयेन्मन्त्रमुद्धृत्य तन्त्रशास्त्रार्थतत्त्ववित् ॥४३॥

ततो देवं समालोक्य साम्मुख्यं शाश्वतीं स्थितिम् ।
प्रार्थ्य मन्त्राक्षरन्यासः कर्तव्यः पूर्ववर्त्मना ॥४४॥

[कर्मार्चायाः योगपीठकल्पनक्रमः]

कर्मार्चासहजे पीठे योगपीठं यथापुरम् ।

[भगवतः नित्यार्चनविधिः]

प्रकल्प्यावाहने पात्रे जलमर्घ्यार्थमाहरेत् ॥४५॥

ललाटान्तं समुद्धृत्य मूलेनागच्छ चञ्चुना ।
आवाहयेन्मूलबेरात् सिञ्चेन्मूर्धनि कर्मणः ॥४६॥

---

३८. b: M. T. धर्मादि च for अधर्मादि;
d: M. T. शिवम् for शिवः;
४०. b: M. T. त्रयः for त्रिधा;
४१. b: M. T. पाञ्च for पञ्च;
४३. d: A. M. सार° for तत्व;
४४. b: M. समम् for स्थितिम्;
४५. d: M. T. जलमर्घ्यात्समाहरेत्;
४६. b: A. T. चुञ्चुना for चञ्चुना;
d: M. सिञ्चन् for सिञ्चेत्;

प्रणवेन ब्रह्मरन्ध्रं पिधाय कमलापतेः ।
साम्मुख्यं स्वागतं चोक्त्वा स्थितिं यागावसानिकीम् ॥४७॥

प्रार्थ्य मन्त्राक्षरान्न्यस्य यजेदर्घ्यादिभिः क्रमात् ।
'सावित्र्या' वितरेदर्घ्यं पाद्यं 'त्रीणि पदेति' च ॥४८॥

आचामो 'विष्णुगायत्र्या' 'तद्विष्णो' दन्तधावनम् ।
जिह्वानिर्लेहनं कुर्यात् 'तद्विप्रासो' विपर्ययात् ॥४९॥

'ऋतं सत्यमि'ति श्रुत्या गण्डूषपरिकल्पनम् ।
'पौरुषेणैव सूक्तेन' स्नापयेत्पुरुषोत्तमम् ॥५०॥

'युवा सुवासे'ति ऋचा वस्त्रे द्वे धौतनिर्मले ।
'यज्ञोपवीतमन्त्रेण' ब्रह्मसूत्रं प्रकल्पयेत् ॥५१॥

'गन्धद्वारेति'मन्त्रेण गन्धेनालेपनं हरेः ।
'विष्णोर्नुकमि'ति श्रुत्या पुष्पैश्च परिमण्डयेत् ॥५२॥

'जितन्त' इति मन्त्रेण भूषयेत्सर्वभूषणैः ।
'इरावतीति' मन्त्रेण पादयोरक्षतार्पणम् ॥५३॥

धूपः कालागरुमुखैः 'धूरसी'ति मनुं जपेत् ।
'उद्दीप्यस्वे'ति मन्त्रेण दीपानुज्वाल्य दर्शयेत् ॥५४॥

आधोष्य चतुरो वेदान् नृत्तं गीतं च दर्शयन् ।

[भगवतःनित्यार्चनक्रमे नैवेद्यसमर्पणप्रकारः]

अर्चयेद्विविधैः पुष्पैर्नामभिर्बहुभिर्हरिम् ॥५५॥

हवींषि सुखपक्वानि विविधानि महानसात् ।
सिक्तानि सर्पिभिः सम्यक् सोपदंशानि पानकैः ॥५६॥

---

४७. b: T. विधाय for पिधाय;
४८. a: A. अक्षरे for अक्षरान्;
d: M पदेविति for पदेति च;
४९. b: M. विष्ण्वा for विष्णो;
५२. b: A. चरेत् for हरेः;
५५. b: M. वर्शयेत् for दर्शयन्;
५६. c: T. सम्यक् सर्पिभिः for सर्पिभिः सम्यक्;

आनीतानि यथायोगं विन्यस्तान्यासनेऽग्रतः ।
प्रोक्षयेदस्त्रमन्त्रेण वर्मणा परिषेचयेत् ॥५७॥

'देवस्य त्वेति' मन्त्रेण दर्शयन् ग्रासमुद्रया ।
त्रिपञ्च सप्त वारं वा देवाय विनिवेदयेत् ॥५८॥

एवं निवेद्य विधिवत् सोदकं सोपदंशकम् ।
ताम्बूलीं वासनायुक्तां दद्याच्चरणमित्यपि ॥५९॥

[नित्याराधनक्रमे होमादिसम्पादननिर्देशः]

ततो निर्गत्य सदनान्नित्यहोमं समापयेत् ।
बलिं च दद्याद्भूतेभ्यो नित्योत्सवमथाचरेत् ॥६०॥

[नित्तार्चनप्रसंगे नीराजनोद्वासनादिक्रमः]

ततः प्रविश्य सदनं नीराज्य 'चरमेण' च ।
उद्वासयेन्मूलबेरे यथापूर्वं गुरूत्तमः ॥६१॥

जपेदष्टाक्षरं मन्त्रं' यथाशक्ति प्रणम्य च ।
स्वीकृत्य पादसलिलं पिबेत्त्रिः शिरसा पुनः ॥६२॥

धारयेत्पादुकां चापि तुलस्यादि तथा हरेत् ।
सेवार्थमागतानां च यतीनां विदुषामपि ॥६३॥

अन्येषां विष्णुभक्तानां पाद्यादि वितरेद्गुरुः ।

[भगवन्निवेदितान्नविनियोगः]

विष्णोर्निवेदितान्नादि स्वीकृत्य स्वयमात्मनः ॥६४॥

सेवार्थमागतेभ्यश्च सर्वेभ्योऽपि प्रदापयेत् ।
विष्णोर्निवेदितान्नेन यष्टव्या गृहदेवताः ॥६५॥

---

६०. a: A. निर्वर्त्य for निर्गत्य;
b: A. समाचरेत् for समापयेत्;
६५. d: M. ग्रह for गृह;

भुञ्जीत विष्णुनैवेद्यम् देवीभ्यो विनिवेदितम् ।

[चण्डादिनिवेदितान्नविनियोगादिः]

चण्डादिपरिवाराणां यदन्नं विनिवेदितम् ॥६६॥
तन्न भुञ्जीत मनुजो जलेऽग्नौ वा विनिक्षित् ।
तरन्ति पितरश्चापि तेन तृप्ताः न संशयः ॥६७॥
इदमाराधनं विष्णोः कथितं ते समासतः ।

॥ इति भार्गवतन्त्रे नवमोऽध्यायः ॥

---

६६. b: M. °पि for वि°;
d: M. च for वि°;

६७. a: b: c: d: A om.

सप्तदशोऽध्यायः

[अग्निकार्यनिरूपणाध्यायः]

[अग्निकुण्डे होमसम्पादनात्पूर्वं कर्तव्यानि कृत्यानि]

श्रीरामः

द्वारपार्श्वस्थितौ देवौ पूजयित्वाग्निसद्मनः ।
प्रविश्य गोमयाम्भोभिः कुण्डमालिप्य पश्चिमे ॥१॥

आसने प्राङ्मुखो भूत्वा समावेश्यात्मदक्षिणे ।
कुसुमानि तथा वामे द्रव्याण्यन्यानि कल्पयेत् ॥२॥

प्राणानायम्य सङ्कल्प्य कुण्डस्योत्तरभूतले ।
प्रागग्रान्निक्षिपेद्दर्भान् क्रमात्तेषु विनिक्षिपेत् ॥३॥

आज्यपात्रं चरुं स्थालीं प्रोक्षणीपात्रमप्यथ ।
प्रणीतां समिधो दर्भांस्तण्डुलान् परिधित्रयम् ॥४॥

स्रुक्स्रुवौ लक्षणोपेतौ दर्वीं व्यजनमेक्षणे ।
काष्ठं घण्टामक्षतांश्च गन्धद्रव्याणि चेतरान् ॥५॥

विन्यस्य कुण्डान्तराले प्रागग्रा उदगायताः ।
तिस्रस्तिस्रो लिखेद्रेखाः प्रणवेन पृथक् पृथक् ॥६॥

विसृज्य लेखनं कूर्चं हस्तौ प्रक्षाल्य वारिणा ।
दर्भस्तंबद्वयेनाद्भिरभ्युक्ष्याग्निं निवेशयेत् ॥७॥

A. om श्रीरामः;

३. d: M. क्रमान्तेषु for क्रमात्तेषु;

५. b: A. व्यञ्जन for व्यजन;

d: A. M. चेतरत् for चेतरान्;

६. a: M. कुण्डस्य for. कुण्ड°;

अद्भिः परिसमूह्यास्त्रैः परिस्तीर्यानलं कुशैः ।
दशभिर्दशभिः साग्रैः प्रागग्रै रुदगग्रचलैः ॥८॥

द्रव्याग्निमध्येऽपां पूर्णां प्रणीतां विनिवेशयेत् ।
साक्षतां दर्भयुग्मेन कूर्चं निर्माय विन्यसेत् ॥९॥

तत्रावाह्यार्चयेद्देवं वासुदेवं सनातनम् ।
अग्नेराग्नेयकोणे तामासने विनिवेशयेत् ॥१०॥

पवित्रितैस्त्रिभिर्दर्भैः आच्छाद्य प्रोक्षणीं पुरः ।
विन्यसेदात्मनस्तत्र प्रणीतां कूर्चमानकैः ॥११॥

अद्भिरापूर्य चोत्पूय पात्राण्युत्तानयन् गुरुः ।
प्रोक्षयेत्प्रोक्षणांबोभिराज्यस्थालीं समाहरेत् ॥१२॥

तस्यां विन्यस्य तत्कूर्चं कूर्चे तन्मयविष्टरे ।
अग्नेर्दक्षिणतो देवमर्चयेच्चतुराननम् ॥१३॥

पूरयित्वाज्यपात्रं तत् गालितेनैव सर्पिषा ।
उदगग्निं निवेश्यास्मिन् आज्यस्थालीं निवेशयेत् ॥१४॥

दीप्तेन बर्हिषा तस्य पर्यग्निकरणं चरेत् ।
दर्भाग्रे द्वे निवेश्यास्मिन् पुनः पर्यग्निमाचरेत् ॥१५॥

उदगुत्तीर्य तत्पात्रम् अग्निमग्नौ निवेशयेत् ।
श्रपयेद्धृदयाद्यङ्गैः चरुपात्रे हुताशने ॥१६॥

अग्नेरुत्तरतः स्थाप्यं चरुपात्रं यथाक्रमम् ।
आज्यपात्रं पुरस्कृत्य त्रिरुत्पूय गुरूत्तमः ॥१७॥

कूर्चग्रन्थिं विसृज्याद्भिः स्पृष्ट्वाग्नौ विनिवेशयेत् ।
सौरभेयीं दर्शयित्वा घृतं तदमृतं स्मरेत् ॥१८॥

इन्द्रादीनग्निकुण्डस्य परितः पूजयेत् क्रमात् ।
अतितप्तेन तोयेन स्त्रुक्स्त्रुवौ क्षालयेद्गुरुः ॥१९॥

---

८. c: M. स्वग्रैः for साग्रैः;
d: M. जलैः for चलैः;
११. d: A. आनयेत् for मानकैः;
१२. c: A. T. अंभो for अम्बो;

दर्भपञ्चककूर्चेन मूलमध्याग्रभूमिषु ।
संमृज्याग्नौ च निष्टप्य तावुदीच्यां निवेशयेत् ॥२०॥

ग्रन्थिं विसृज्य कूर्चस्य स्पृष्ट्वाम्ब्वग्नौ निवेशयेत् ।
होमवस्तुषु संसिञ्चेत् स्त्रुवेणाज्यं सकृत्सकृत् ॥२१॥

उदगग्रा च परिधिर्न्यसनीया च पश्चिमे ।
प्रागग्रा दक्षिणे तद्वदुदीच्यां दिशि विन्यसेत् ॥२२॥

आग्नेयैशानयोः स्थाप्यावाधारसमिधावुभौ ।
'अदितेन्वि'त्यादिमन्त्रैः परिषेचनमाचरेत् ॥२३॥

समिधः पञ्चदश च सिक्त्वाज्येन ततस्सकृत् ।
जपन्नष्टाक्षरं मन्त्रं ध्यात्वा च परमेष्ठिनम् ॥२४॥

आदद्यान्मुद्रया मुष्ठ्या वेष्टयित्वा कुशैः करम् ।
आज्यपात्रं समादाय प्राजापत्यं ततः परम् ॥२५॥

ऐन्द्रं च जुहुयादग्नौ आग्नेयं सौम्यमेव च ।
व्यस्ताभिर्व्याहृतिभिश्च समस्ताभिर्यथाक्रमम् ॥२६॥

[होमक्रमे वह्न्यादिध्यानस्वरूपम्]

परिषिच्य ततो वह्निं ध्यायेच्चत्वारि शृङ्गया ।
ओमग्नये नमः स्वाहेत्यग्नौ पूर्णाहुतिर्भवेत् ॥२७॥

द्विशीर्षकं सप्तहस्तं त्रिपादं सप्तजिह्वकम् ।
वरदं शक्तिपाणिं च बिभ्राणं स्रुक्स्रुवौ तथा ॥२८॥

---

२०. c: A. विसृज्य for निष्टप्य;
२५. d: A. पुरम् for परम्;
२६. b: A. आग्नेयां for आग्नेयम्;
c: A. M. व्याहृतीभिश्च For व्यस्ताभिः;
d: M. स्वम° for सम°;
२७. c: A. रम् for ओम्
२८. A. om अस्मात् श्लोकादारभ्य ५३. श्लोकस्य b: पर्यन्तम् ।
c: A. पाणिम् for हस्तम्;

अभीतिदं चर्मधरं वामे चाज्यधरं करे ।

[वह्नेः सप्तजिह्वानां नामस्थानादिविवेकः]

काली कराली सुमना लोहिता धूम्र एव हि ॥२९॥

स्फुलिङ्गिनी विश्वरूपी सप्त जिह्वाः प्रकीर्तिताः ।
काल्यास्तु मध्यमं स्थानं कराल्याः पूर्वदिग्भवेत् ॥३०॥

मनोजवायाश्चाग्नेय्यां लोहितायास्तु वारुणे ।
सुधूम्रा सोमनिलया स्फुलिङ्गिन्यनिलाश्रया ॥३१॥

ऐशान्यां विश्वरूपी तु एवं स्थानं स्मरेत् क्रमात् ।
जिह्वायां दक्षिणे वक्त्रे धूम्रायां मारणादिकम् ॥३२॥

लोहितायां वशीकारः काल्यां कर्म च शान्तिकम् ।
सर्वसिद्धिः स्फुलिङ्गिन्यामानने दक्षिणेतरे ॥३३॥

करालिका विजयदा पुष्टिदा च मनोहरा ।
कार्ष्ण्यं लौहित्यमेतासां वर्णः श्यामत्वमेव च ॥३४॥

स्फुलिङ्गरूपं च ततो वर्णः स्फटिकसन्निभः ।
तपनीयनिभः प्रोक्तः जिह्वायामानुपूर्वशः ॥३५॥

[अग्नित्रयलक्षणं तेषामुपयोगश्च]

नित्याग्निर्वृद्ध इत्युक्तः उत्सवाग्निर्युवा भवेत् ।
दीक्षाशान्तिप्रतिष्ठासु बालाग्निरभिधीयते ॥३६॥

अरणीमथनाज्जातः बालाग्निरिति कथ्यते ।
सूर्यकान्ताश्मनो जातो यौवनाग्निः प्रकीर्तितः ॥३७॥

लौकिकाग्निस्तु वृद्धाग्निरग्नित्रयमुदाहृतम् ।

[समिधः प्रमाणं दोषयुक्तसमिधः प्रयोगफलनिर्देशश्च]

आयामः समिधां तालः कनिष्ठानाहनं मतम् ॥३८॥

---

२९. a: M. अभीदितम् for अभीतिदम्;

३१. d: M. आलया for आश्रया;

३३. d: A. उत्तरे for इतरे;

३७. d: A. प्रतिष्ठितः for प्रकीर्तितः;

चर्महीने विनाशः स्यात् भेदे क्षीणकुलं भवेत् ।
आर्द्रा तु बन्धुनाशः स्यात् पुत्रनाशः पुरातने ॥३९॥

तक्षासु भार्यामरणं कलहाय च शाखिनी ।
उद्वेगाय भवेत्स्थूला ह्रस्वावग्रहकारिणी ॥४०॥

दीर्घातिवृष्टिजननी त्याज्या दोषयुता समित् ।

[कामनानुरूपं समिधां होमद्रव्याणां च विवरणम्]

यज्ञवृक्षोद्भवैश्शान्तिस्सौभाग्यं कुसुमैर्भवेत् ॥४१॥

धूपद्रव्यैस्सदारोग्यं पुष्टिर्दध्ना पयश्शुचिः ।
अन्नेन विविधान् कामान् आज्येनायुष्मतीः प्रजाः ॥४२॥

श्वेतपद्मैस्तु जुहुयादिच्छन् ब्रह्मश्रियं नरः ।
लक्ष्मीपुष्पैस्तु जुहुयाल्लक्ष्मीकामोऽथ वारुणैः ॥४३॥

पद्मैर्बिल्वसमिद्भिर्वा ज्ञानकामस्तु सर्पिषा ।
कन्याकामो हुवेल्लाजैः गोकामो गोमयैः पुनः ॥४४॥

आयुष्कामस्तु दूर्वाभिर्भूमिकामस्तु मृत्स्नया ।
यवैरिन्द्रियकामस्तु तिलैः सर्वजनप्रियः ॥४५॥

ब्रह्मवर्चसकामस्तु ब्रह्मवृक्षसमुद्भवैः ।
वैणवैश्च यवैश्चैव नीवारैः शालिभिस्तथा ॥४६॥

सर्वे कामाश्च सिद्ध्यन्ति होतुर्बीजैर्यथोदितैः ।
लाजहोमेन सिद्ध्यन्ति सर्वकामाः न संशयः ॥४७॥

अन्नेनान्नादिकामस्तु पुत्रकामस्तु पायसैः ।
निम्बपुष्पैर्हिरण्यार्थी सर्वे सिध्यन्ति सर्पिषा ॥४८॥

[तत्तद्धोमद्रव्यपरिमाणनिर्देशः]

होमे सर्पिर्मधुक्षीरधाराः स्युश्चतुरङ्गुलाः ।
शुक्तिर्दध्नाहुतिर्ग्रासं पायसाद्याहुतिर्भवेत् ॥४९॥

---

४४. c: M. नेत् for वेत्;

४७. d: M. सर्वे for सर्व

४९. c: M. शक्तिः for शुक्तिः T. दध्या for दध्ना;

भक्ष्याहुतिस्तदर्धेन फलैः पुष्पैरखण्डितैः ।
निष्पावबीजमानेन धूपद्रव्याहुतिर्भवेत् ॥५०॥

अष्टाङ्गुला तदर्धा वा समिद्दूर्वा षडङ्गुला ।
मृद्विकाक्षप्रमाणा तु गोमयाहुतिरुच्यते ॥५१॥

पूर्णाहुतिर्घृतस्य स्यात्कुडवेन मुनीश्वर ।
न्यूनाधिकप्रमाणेन हव्यकव्याहुतीः कृताः ॥५२॥

भुञ्जते दानवाः दैत्याः न फलाय प्रकल्पते ।

[अग्निकुण्डे हरेः आवाहनम् आराधनं च]

वर्मणा परिषिच्याग्निमग्नौ पीठप्रकल्पनम् ॥५३॥

आधारशक्त्यादिमन्त्रैर्वह्नावावाहनं हरेः ।
पूर्ववत्सकलं कुर्यात् उपचारमुषर्बुधे ॥५४॥

तैस्तैर्मन्त्रैश्च स्वाहान्तैस्सर्पिषैव सकृत् सकृत् ।
निवेदनान्तं कृत्वैवं परिवारार्थमप्यथ ॥५५॥

हुत्वा कवचमन्त्रेण पूर्ववत्परिषेचयेत् ।
एतन्नित्यार्चनं वह्नौ प्रतिष्ठादावनन्तरम् ॥५६॥

[अग्नौ नित्याराधनविध्यादौ विशेषः]

तत्तत्क्रियोक्तविधिना होममन्यत्समाचरेत् ।
नित्ये धार्यो वीतिहोत्रः न प्रणीता न चात्मभूः ॥५७॥

नेध्मप्रक्षेपणं चाग्नौ न चरुश्रपणं भवेत् ।
आज्येन केवलं वह्नौ विष्णोः पूजा जपावधिः ॥५८॥

नाऽघारहोमः कर्तव्यः अग्नौ नष्टे तु निष्कृतिः ।
प्रतिष्ठादिषु सर्वेषु सर्वमेतत्समाचरेत् ॥५९॥

---

५१. c: M. अक्षरप्रमाणान्तु for अक्षप्रमाणा तु;
d: T. आहुतिः for आहुतिः;

५३. a: M. भुञ्जन्ति for भुञ्जते;
c: A. बर्म्म for वर्म ;

कर्मावसानं ब्रह्मादीन् नोद्वासेत्तन्त्रवित्तमः ।

[पूर्णाहुतिसम्पादनविधिः]

प्रायश्चित्ताहुतीर्हुत्वा कुर्यात्पूर्णाहुतिं ततः ॥६०॥

आत्मनोऽग्रे स्रुवं याम्ये चाज्यस्थालीं तथोत्तरे ।
स्रुचं विन्यस्य हस्ताभ्याम् आदद्यात्सादितान् कुशान् ॥६१॥

आज्यस्थाल्यां न्यसेन्मूलं मध्ये मध्यं स्रुचीतरम् ।
स्पृष्ट्वा त्रिरेवं जुहुयादग्नौ दर्भान् तथा दहेत् ॥६२॥

परिधीनात्मनः पूर्वं प्रणीतां विन्यसेद्गुरुः ।
आपूर्य प्रोक्षणीतीर्थैः पूर्वाद्याशासु सेचयेत् ॥६३॥

अवन्यां विसृजेच्छेषं प्रोक्षयेदात्मनः शिरः ।
ब्रह्माणमुद्वसेत्पश्चात्स्रुचं तोयेन पूरयेत् ॥६४॥

परिषिच्य ततः कुण्डं देवमग्नेः समुद्धरेत् ।
भस्मना तिलकं कुर्यात् हुतेनाधापनोदिना ॥६५॥

'अग्नेनये'ति मन्त्रेण ह्युपस्थाय ततोऽनलम् ।
भक्त्या यदग्नौ विहितं यथाशक्ति यथाविधि ॥६६॥

आराधनं त्वं देवेश गृहाण परमेश्वर ।
इति देवपदाम्भोजे न्यसेद्धवनजं फलम् ॥६७॥

[पूर्णाहुतिविधिः]

अगस्त्यः

श्रुतो मया परंधाम्नः वह्नौ पूजाक्रमोऽधुना ।
पूर्णाहुतिविधानं तत्कथमद्य ब्रवीहि मे ॥६८॥

श्रीरामः

अर्घ्याद्यैरर्चयेद्देवमनले सर्पिषा गवाम् ।
स्रुचमाज्येन सम्पूर्य कुडवेन गुरूत्तमः ॥६९॥

---

६०. a: T. कर्मावसाने for कर्मावसानम्;

६४. a: A. अविद्याम् for अवन्याम्

६९. d: A. कुड्डब for कुडव;

दर्भेण समिधा युक्तं फलेन परिपूरितम् ।
गन्धैः पुष्पैरक्षतैश्च पूजयित्वा स्रुचं गुरुः ॥७०॥

अपिधाय स्रुवेणाथ नासिकाग्रान्तमुद्धरन् ।
उत्थाय वाद्य घोषेषु सर्वतो नादितेषु च ॥७१॥

'पूर्णाहुतिमि'ति मनुं घोषयत्सु द्विजातिषु ।
'मूलमन्त्रे'ण जुहुयादनले विमले गुरुः ॥७२॥

कुर्वीत स्विष्टकृद्धोमं कुक्कुटाण्डप्रमाणकम् ।
चरुं घृताप्लुतं सर्वैरुपदंशैस्समन्वितम् ॥७३॥

सशर्करं च समधु सदर्भसमिधं स्रुचि ।
विन्यस्य सर्पिषाप्लाव्य स्रुवाग्रेणापिधाय च ॥७४॥

जुहुयान्'मूलमन्त्रे'ण प्रत्यहं सर्वकर्मसु ।
एष तेऽग्निविधिः प्रोक्तः पृच्छतः कलशात्मज ॥७५॥

॥ इति भार्गवतन्त्रे सप्तदशोऽध्यायः ॥

---

७१. b: M. उद्धरेत् for उद्धरन्;

अष्टादशोऽध्यायः

[नित्योत्सवबलिसमर्पणविधिनिरूपणाध्यायः]

[अग्निकार्यसम्पादनानन्तरमुत्सवाचरण निर्देशः]

श्रीरामः

नित्योत्सवविधिं वक्ष्ये यथावदवधारय ।
अभ्यर्च्याग्नौ जगन्नाथमथ नित्योत्सवं चरेत् ॥१॥

[नित्योत्सवक्रमे बलिद्रव्यानयनक्रमः]

अन्तः प्रविश्य सदनं बलिबिम्बं समर्चयेत् ।
शिबिकादौ समारोप्य बलिद्रव्यं समाहरेत् ॥२॥

सोपदंशं महान्नं वा पयोदधि घृतान्वितम् ।
अथवा शुद्धमन्नं वा बल्यर्थं परिकल्पयेत् ॥३॥

सर्वार्थंतोयं शुद्धाख्यं गन्धपुष्पाक्षतानि च ।
धूपं दीपं च बिभ्राणाः व्रजेयुः परिचारकाः ॥४॥

गायन्तश्चापि नृत्यन्तः तालमद्दलपाणयः ।
व्रजेयुरग्रे देवस्य प्रदीपैर्बहुभिः सह ॥५॥

व्यजनं चामरं छत्रमुत्सवाङ्गं तथेतरत् ।
सर्वमादाय गच्छेयुर्देवस्याग्रेऽधिकारिणः ॥६॥

[बलिदानक्रमनिर्देशः]

चण्डप्रचण्डावारभ्य बलिदानं समाचरेत् ।
तत्तन्नाम तु देवानां चतुर्थ्या नमसान्वितम् ॥७॥

प्रणवादि समुच्चार्य बलिदानं समाचरेत् ।
इदमर्घ्यं बलिरयम् इदं ते उदकं त्विति ॥८॥

तोयं पूर्वोत्तरं दद्यात् तालनृत्तस्वरान्वितम् ।
गन्धं पुष्पं तथा धूपं दीपमर्घ्यं बलिस्ततः ॥९॥

---

९. a: M. तोय° for तोयम्;

उदकं च प्रदातव्यं प्राङ्गणे बलिकर्मणि ।

[तत्तद्देवानां स्वरनृत्ततालविवेकः]

चण्डादिद्वारपालानां सर्वेषामृषभस्वरः ॥१०॥

नृत्तं तु वैजयन्ती स्यान्मल्लतालमुदाहृतम् ।
विष्णुक्रान्तं खगेशस्य नृत्तं तालं तु गारुडम् ॥११॥

स्वरस्तु मध्यमः प्रोक्तः विष्वक्सेनस्य कथ्यते ।
नृत्तं स्वस्तिकमित्युक्तं बलितालर्षभस्वरौ ॥१२॥

तद्वन्नृत्तं गणेशस्य भद्रतालं तु पञ्चमः ।
स्वरश्च कुंभतनय दुर्गायाः धैवतः स्वरः ॥१३॥

सर्वमङ्गलनृत्तं स्यात् भद्रतालमुदीरितम् ।
ब्रह्मणो ब्रह्मतालं स्यात् नृत्तं स्यात् सर्वमङ्गलम् ॥१४॥

स्वरस्तु मध्यमस्तस्य शुनासीरस्य कथ्यते ।
विलासनृत्तमुदितं स्वरः षड्ज उदाहृतः ॥१५॥

समतालं तथा वह्नेः कथ्यते ऋषभस्वरः ।
बद्धावतालं नृत्तं तु सर्वतोभद्रमीरितम् ॥१६॥

यमस्य खेटकं नृत्तं गान्धारः स्वर उच्यते ।
तालं तु शृङ्गिणी प्रोक्ता निर्ऋतेर्मध्यमः स्वरः ॥१७॥

मल्लतालं तथा नृत्तं कथितं चक्रमण्डलम् ।
वरुणस्य स्वरः प्रोक्तः पञ्चमो मङ्गलाह्वयः ॥१८॥

---

१०. d: A. स्वन for स्वरः;
११. c: A. विष्णुक्रान्ता for विष्णुक्रान्तम्;
१२. c: A. नृत्तः for नृत्तम्;
१३. b: A. भद्रम् for भद्र°;
c: A. स्वरस्तु M. स्वरं च for स्वरश्च;
१४. d: A. नृत्यम् for नृत्तम्;
१७. d: A. नैर्ऋते M. निऋऋते for निर्ऋते;
१८. c: M. वरुण्यस्वर for वरुणस्य स्वरः;

तालं कान्तारनृत्तं स्यात् मरुतो धैवतः स्वरः ।
जयतालं तु कथितं नृत्तं स्यात् पृष्ठकुट्टिमम् ॥१९॥

सोमस्य भद्रतालं स्यात् नर्तनं कटिबन्धनम् ।
स्वरो निषादः कथितः शङ्करस्य तु धैवतम् ॥२०॥

स्वरस्तु ढक्करी तालं वामजानूर्ध्वनर्तनम् ।
अन्येषामपि देवानां स्वरः पञ्चम इष्यते ॥२१॥

भद्रतालं तु कथितं सर्वमङ्गलनर्तनम् ।
भूतानां बलितालं स्यात् स्वरो गान्धार उच्यते ॥२२॥

सर्वमङ्गलनृत्तं च दर्शयेत्कुम्भसम्भव ।

[उत्सवभ्रमणे बलिदानक्रमः]

तृतीयावरणान्तं तत् परिक्रम्य यथाक्रमम् ॥२३॥

तत्तन्नृत्तादिसहितं बलिं दत्वा यथाविधि ।
महापीठे बलिद्रव्यं बलिशिष्टं विनिक्षिपेत् ॥२४॥

उत्सवान्ते हरिं तत्र प्रापणान्तं यथोचितम् ।
पूजयित्वाथ यानादेरवरोप्य गुरूत्तमः ॥२५॥

मन्दिरान्तर्भुवं नीत्वा यथास्थानं निवेशयेत् ।
श्रियादीनां च देवीनां ब्रह्मादीनां तथैव च ॥२६॥

अन्येषां परिवाराणामाश्रितानां च पूजनम् ।
तत्तन्मन्त्रेण कुर्वीत मुख्येभ्यस्तु निवेदनम् ॥२७॥

[द्वारपालादिभ्यो बलिप्रदानादिविधिः]

बलिस्तु द्वारपालानां तथा वै विधिरुद्रयोः ।
इन्द्रादिलोकपालानां सर्वावरणवासिनाम् ॥२८॥

---

२१. a: A. ढःकरी for ढक्करी;

२४. a: M. नृत्य for नृत्त°;
c: M. बलिम् for बलि°;
d: A. परिशिष्टम् for बलिशिष्टम्;

पीठाधिदेवतानाञ्च बलिमेवं विनिक्षिपेत् ।
देवीनामाश्रितानां च तार्क्ष्यशेनेशयोरपि ॥२९॥

आश्रितानां च भक्तानां प्रापणान्तं समर्चनम् ।

॥ इति भार्गवतन्त्रे अष्टादशोऽध्यायः ॥

---

२९. a: A. M. पीठादि for पीठाधि°, M. देवानाम् for देवतानाम्;

३०. a: M. om च;

एकोनविंशोऽध्यायः

[जीर्णोद्धारविधिनिरूपणाध्यायः]

[जीर्णोद्धारावसरः]

धाम्नो वा कौतुकानां वा वैकल्येऽवयवादिषु ।
सन्धातुं यदि शक्येत तदा सन्धानमाचरेत् ॥१॥

[संधानानर्हे बिम्बादौ विधिः]

अशक्ये तुच्छिते धाम्नि बिम्बे त्यक्त्वा पुनः सृजेत् ।
पूर्वद्रव्यं पुनः सृष्टौ योग्यं संयोज्य कल्पयेत् ॥२॥

अयोग्यं तुच्छितं धीमान् अगाधे निक्षिपेज्जले ।
भिन्नं वा स्फुटितं बिम्बं भूतिकामो न पूजयेत् ॥३॥

[सन्धानावसरे भगवतः आराधनस्थलम्]

लघुसाध्येऽङ्गसन्धाने कुंभे शक्तिं निवेशयेत् ।
अनन्तजीर्णे बिम्बादौ बालबिम्बेऽर्चयेद्धरिम् ॥४॥

[अजीर्णधामबिम्बत्यागनिषेधः]

अजीर्णं धाम बिम्बं वा त्यक्त्वा नान्यत्र कल्पयेत् ।
कल्पने तु महान् दोषः आचार्ययजमानयोः ॥५॥

अन्यथा वा न कुर्वीत निर्दुष्टे बिम्बमन्दिरे ।

[विमानादिजीर्णोद्धारक्रमे शक्त्यावाहनव्यवस्था]

सन्धाने तु विमानस्य शक्तिमावाहयेद् ध्रुवे ॥६॥

ध्रुवबेरस्य सन्धाने कुम्भे वा बालकौतुके ।
वैकल्ये परिवाराणां तेषामावाहनं ध्रुवे ॥७॥

M. T. कोशयोः आदौ 'बालालयम्' इत्यधिकः पाठः

२. a: M. तुच्चिते T. तूच्छ्रते for तुच्छिते;

३. c: M. T. बिम्बम् for भिन्नम्;

अङ्गबिम्बाङ्गसन्धाने तत्रापि परिवारवत् ।
एवं सर्वं समालोच्य जीर्णोद्धारं समाचरेत् ॥८॥

[बालालयकल्पनविवेकः]

दिशश्च विदिशश्चापि मध्ये माधवसद्मनः ।
सावकाशेऽभिरुचिते बालसद्म प्रकल्पयेत् ॥९॥

पञ्च वा बाहुदण्डेन सप्त संकुचिते त्रिकम् ।
चतुरश्रं मनोहारि कल्पयेत् बालसद्म तत् ॥१०॥

यस्यां दिश्यभवद्द्वारं मन्दिरे पूर्वनिर्मिते ।
तस्यां बालालये चापि बलजं परिकल्पयेत् ॥११॥

[बालबिम्बकल्पनप्रकारः]

लोहजं दारुजं यद्वा शैलजं वा मनोहरम् ।
बालबिम्बं प्रकल्पेत यथा प्राचीनमन्दिरे ॥१२॥

उत्सेधो बालबिम्बस्य वृद्धौ पञ्चभिरङ्गुलैः ।
साकं हस्तेन हानौ तु विंशत्याङ्गुलिभिर्भवेत् ॥१३॥

पूर्ववत्कल्पयेद्बिम्बं नान्यथा कलशोद्भव ।

[अङ्गवैकल्यशान्त्यर्थं होमक्रमः]

एवं प्रकल्प्य मेधावी बालबिम्बं च मन्दिरम् ॥१४॥

शुभे काले तु सम्प्राप्ते पूजयित्वा द्विजोत्तमान् ।
आशिषो वाचयित्वा च दत्त्वा तेभ्योऽपि दक्षिणाम् ॥१५॥

भूसुरैस्तैरनुज्ञातः आचार्यं वरयेत्पुरा ।
तं प्रणम्य यथाशास्त्रं मण्डयित्वाभिपूजयेत् ॥१६॥

---

८. c: A. T. आलोवय for आलोच्य;

१५. b: A. भोजयित्वा for पूजयित्वा;

१६. b: A. परम् M. पुरम् for पुरा;

[बालबिम्बस्थापनक्रमे आचार्यवरणक्रमः]

ततः शास्त्रविदाचार्यः अङ्गवैकल्यशान्तये ।
दूर्वाभिर्मधुयुक्ताभिः सहस्रं होममाचरेत् ॥१७॥

व्याहृत्या सर्पिषा पश्चात् 'पञ्चोपनिषदा' शतम् ।
हुत्वा पूर्णाहुतिं कुर्यात् तेन शान्तिर्न संशयः ॥१८॥

[बालबिम्बप्रतिष्ठाराधनक्रमः]

अङ्कुराण्यर्पयेत्पश्चात् बध्वा प्रतिसरं ततः ।
जलाधिवासाद्यखिलं कर्म कुर्यात् यथापुरम् ॥१९॥

बालालयस्य मध्ये वा दिव्ये वा मानुषेऽपि वा ।
हस्तमात्रोन्नतां वेदिं कृत्वा तस्यां निवेशयेत् ॥२०॥

'मूलमन्त्रेण' विधिवत् रत्नन्यासं न कारयेत् ।
प्रोक्षयेच्च यथापूर्वं ततो मूलालयं व्रजेत् ॥२१॥

मूलबिम्बं समाराध्य कुंभं न्यस्याग्रतो हरेः ।
तत्र तस्मात् समावाह्य संहारक्रममाश्रयन् ॥२२॥

अभ्यर्च्य कुम्भमर्घ्याद्यैर्वेदवाद्यपुरस्सरम् ।
आदाय कुंभमर्चाभिः अन्याभिः सह देशिकः ॥२३॥

प्रादक्षिण्येन तद्धाम्नः बालसद्म प्रविश्य च ।
कर्मार्चादीनि बिम्बानि तत्र स्थाने निवेशयेत् ॥२४॥

ततः कुंभगतां शक्तिं बालबिम्बे नियोजयेत् ।
पूर्ववत्सकलं कुर्यात् सान्निध्यं याचयेत्ततः ॥२५॥

भगवन् पुनरुद्धारः तव धाम्नश्च वर्ष्मणः ।
यावत्समाप्यते तावत् सान्निध्यमिह आचर ॥२६॥

---

१७. c: M. संयुक्ताभिः for युक्ताभिः;

१८. b: c: om A;

२०. c: A. हव्य for हस्त;

२२. b: A. कुंभान् for कुंभम्;

c: A. तत्रस्थास्ततसमावाह्य;

२६. d: A. M. इह सान्निध्यम् for सान्निध्यमिह;

इति प्रार्थ्य ततो देवम् अङ्गैः साकं समर्चयेत् ।
वैकल्यरहितान् सर्वान् परिवारान् समर्चयेत् ॥२७॥

विकलानर्पयेद्देवान् देवपादारविन्दयोः ।
लुप्तानामपि पीठानां परिवारवदिष्यते ॥२८॥

आश्रितानां तु पार्थक्यं भक्तानां परिवारवत् ।
देवीनां च श्रियादीनां सर्वासां परिवारवत् ॥२९॥

नित्यं नैमित्तिकं काम्यं यथापूर्वं समाचरेत् ।
अथवा नित्यमेव स्यात् जीर्णोद्धारसमाप्तये ॥३०॥

महोत्सवं प्रकुर्वीत यद्यन्नित्यं पुरातनम् ।
स्थण्डिले बलिदानं स्यात् सतायां पीठमस्तके ॥३१॥

[जीर्णबिम्बप्रक्षेपप्रकारः]

एवं समाप्य मेधावी गत्वा गर्भगृहं गुरुः ।
हैमं लाङ्गलमादाय मोचयेत्पीठबन्धनम् ॥३२॥

कुशैः काशैस्तृणैश्चान्यैः तथा गोवालनिर्मितः ।
रज्जुभिर्वेष्टयेद्बिम्बं रथमारोपयेत्ततः ॥३३॥

ग्रामं प्रदक्षिणीकृत्य समुद्रं वा सरोवरम् ।
अगाधं चाप्यशोष्यं च सलिलं यत्र नित्यशः ॥३४॥

तत्र गत्वा क्षिपेद्बिम्बं यद्वा भूमौ खनेदपि ।

[संस्कारानन्तरं पुनः प्रतिष्ठाक्रमः]

ततः स्नात्वा विधानेन सन्धाने यदि कर्मणि ॥३५॥

सन्धानाय गुरुर्दद्यात् बिम्बं देवस्य शार्ङ्गिणः ।
कारयित्वा पुनः सृष्टिं सन्धानं वा यथाविधि ॥३६॥

---

२७. c: d: om A;

२८. d: परिहार for परिवार;

२९. c: d: om A;

३१. d: A. M. सत्तायाम् for सतायाम्; T. पीत for पीठ°;

३३. b: M. T. गसिल for गोवाल;

जलाधिवासाद्यखिलं सर्वं कर्म यथापुरम् ।
पुनः सृष्टौ प्रकुर्वीत सन्धाने नैतदिष्यते ॥३७॥

सम्प्रोक्षणं प्रकुर्वीत बालशक्ति निवेशयेत् ।
एवं सम्प्रोक्ष्य विधिवत् कर्मबिम्बैः समन्वितम् ॥३८॥

अभ्यर्चयेद्यथापूर्वं भगवन्तं मुनीश्वर ।

॥ इति भार्गवतन्त्रे एकोनविंशोऽध्यायः ॥

———

३८. d: T. संधाने नैतदिष्यते;

विंशोऽध्यायः

[स्नपनविधिनिरूपणाध्यायः]

[स्नपनभेदनिर्देशः]

श्रीरामः

स्नपनं देवदेवस्य बहुधा परिकीर्त्यते ।
तत्र ब्राह्मं विशेषं स्यात् सर्वकर्मसु योजयेत् ॥१॥

अथवा वैष्णवं स्नानं यद्वा पुण्यं समाचरेत् ।
श्रेष्ठमध्यकनिष्ठानि त्रिविधानि महामुने ॥२॥

[ब्राह्मादिस्नपनलक्षणम्]

ब्राह्मं तु पञ्चविंशद्भिरष्टोनैर्मध्यमं भवेत् ।
एतत्तु वैष्णवं प्रोक्तं पुण्यं तु नवभिर्घटैः ॥३॥

[स्नपनपीठकल्पनप्रकारः]

स्नानमण्डपभूमध्ये कल्पयेद्वेदिकां गुरुः ।
पञ्चहस्तसमायामविस्तारां लोचनप्रियाम् ॥४॥

प्रागग्राण्युदगग्राणि चतुर्दश निपातयेत् ।
चन्दनार्द्राणि सूत्राणि कोष्ठान्येकोनसप्ततिः ॥५॥

तत्र ब्राह्मं च दैवं च मानुषं च पदत्रयम् ।
एकान्तरान्तरं तेषु वीथ्यर्थं परिमार्जयेत् ॥६॥

ब्राह्मे तु वीथिकां हित्वा नवैव कलशास्पदम् ।
दैवे तु कलशाः स्थाप्या अष्टौ दिक्षु विदिक्षु च ॥७॥

---

२. a: A. स्थानम् for स्नानम्;
३. b: M. अष्टोन्यैः for अष्टोनैः;
५. b: M. निपादयेत् for निपातयेत्;

शिष्टानि परिमार्ज्यानि मानुषेऽष्टौ तथा भवेत् ।
परिमार्ज्यानि शिष्टानि धान्यैः पीठं प्रकल्पयेत् ॥८॥

[ब्राह्मे पदे स्थापनीयानि स्नपनद्रव्याणि]

घृतमुष्णोदकं रत्नं फलं लोहं यथाक्रमम् ।
स्नानगन्धाक्षतयवं ब्राह्मेऽष्टौ मध्यतः क्रमात् ॥९॥

[दैवपदे स्थाप्यानि स्नपनद्रव्याणि]

दिव्ये पदाष्टके स्थाप्यं पाद्यं दधि ततः परम् ।
अर्घ्यं पाद्यं च पानीयं ततो मधुघटं न्यसेत् ॥१०॥

पञ्चगव्यं कषायं च क्रमेणाष्टौ यथाक्रमम् ।

[मानुषे पदे स्थाप्यानि स्नपनद्रव्याणि]

मानुषे विन्यसेत् प्राच्यां गन्धोदकघटं गुरुः ॥११॥

दक्षिणस्यामिक्षुरसं नारिकेलाम्बु वारुणे ।
शान्तितोयमुदीचीने ज्वलने मङ्गलोदकम् ॥१२॥

सर्वौषधिरसं कुंभं यातुधाने निवेशयेत् ।
सर्वगन्धोदकं वायौ रौद्रे मूलौषधिं न्यसेत् ॥१३॥

[रत्नोदकद्रव्यपरिगणनम्]

माणिक्यं पद्मरागं च नीलं वज्रं च पुष्यकम् ।
प्रवालं मौक्तिकं चैव तथा मरकतं क्षिपेत् । १४॥

वैडूर्यं नव रत्नानि न्यसेद्रत्नोदके घटे ।

[फलोदकद्रव्यपरिगणनम्]

कदलीबीजपूराम्रधात्रीबिल्वफलैस्सह ॥१५॥

---

८. b: M. षौ for °ष्टौ;
 d: M. परि for प्र°;
९. d: A. M. ब्रह्म for ब्राह्म;
१०. c: A. T. पयः for पाद्यम्;
१२. b: M. वारिणे for वारुणे;
१३. b: T. निवेदयेत् for °निवेशयेत्;
१४. c: A. मलक for मौक्तिक;

नालिकेरं च पनसं मातुलुङ्गफलोदके ।

[लोहोदकद्रव्याणि]

सुवर्णं रजतं ताम्रं सीसकं त्रपुकं तथा ॥१६॥

कांस्यमायससारं च सप्त लोहघटोदके ।
प्रत्येकं निष्कमानानि विन्यसेत्कल्पतन्त्रवित् ॥१७॥

[मार्जनद्रव्याणि]

स्नानकुंभे न्यसेद्धीमान् रजनीसूर्यवर्तिनीम् ।
सहदेवीं शिरीषं च सदाभद्रं कुशाञ्चलम् ॥१८॥

मार्जनानि षडेतानि मुष्टिमात्राणि वै पृथक् ।

[गन्धोदकद्रव्याणि]

चन्दनागरुकुष्ठानि मुरामांसी च कुङ्कुमम् ॥१९॥

ह्लीबेरमप्युशीरं च गिरिजं च तथा नव ।
गन्धवस्तूनि तत्कुंभे विन्यसेत्पलमात्रतः ॥२०॥

[षडक्षतद्रव्याणि]

नीवाराः वैणवशाल्यः प्रियङ्गु ष्षाष्टिकास्तथा ।
गोधूमाः तण्डुलाश्चैते मुष्टिमात्राः षडक्षताः ॥२१॥

[यवाम्बुद्रव्याणि]

यवाश्च व्रीहयश्चापि वेणवश्च इमे त्रयः ।
पृथक् कुडवमात्रेण यवाम्बु कलशे न्यसेत् ॥२२॥

---

१६. b: A. M. मातुलङ्गं for मातुलुङ्गम्;
१९. c: M. काष्ठ for कुष्ठ;
२०. a: A. श्री for ह्ली;
d: A. M. फल for पल;
२१. b: M. अष्टाष्टिका T. ग्वष्वाष्टिका for ष्षाष्टिका;
c: M. T. गोधूम for गोधूमाः;
२२. c: M. कटुक for कुडव;

[पाद्यद्रव्याणि]

तुलसीपद्मदूर्वाश्च श्यामाकं चाक्षतं तथा ।
विष्णुक्रान्तं बिल्वपत्रं मुष्टिमात्रं पृथक् पृथक् ॥२३॥

पलमेकं चन्दनं च पाद्येऽष्टौ विनिवेशयेत् ।

[अर्घ्यद्रव्याणि]

कुशाग्राक्षतसिद्धार्थतिलपुष्पफलानि च ॥२४॥

यवाः पृथङ्मुष्टिमात्राः पलमात्रं च चन्दनम् ।
अष्टौ द्रव्याण्यर्घ्यकुंभे विन्यसेत् फलितं फलम् ॥२५॥

[आचामभाजने निक्षेप्यद्रव्याणि]

एलालवङ्गतक्कोलजातिकर्पूरचम्पकाः ।
चन्दनं कुसुमान्येवमष्टौ आचामभाजने ॥२६॥

पलार्धपरिमाणानि प्रत्येकं तत्र निक्षिपेत् ।

[पञ्चगव्यद्रव्याणि]

गोमूत्रं गोमयं क्षीरं दधिसर्पिरिमानि वै ॥२७॥

चतुष्पलानि प्रत्येकं पञ्चगव्यघटे क्षिपेत् ।

[कषायोदकद्रव्याणि]

कषायाम्बुघटे द्रव्याण्येतानि विनिवेशयेत् ॥२८॥

शमीपलाशखदिरबिल्वाश्वत्थविकङ्कताः ।
औदुम्बरश्च न्यग्रोधस्तेषामष्टौ त्वचः स्मृताः ॥२९॥

[शान्तिकुंभद्रव्याणि मङ्गलोदकद्रव्याणि]

तुलसीवेणुनीवारयवाश्च श्वेतसर्षपाः ।
तिलाश्च षट् शान्तिकुंभे द्रव्याणि परिकल्पयेत् ॥३०॥

---

२४. d: A. पल for फल;

२५. a: M. मात्रम् for मात्राः;

प्रत्येकं मुष्टिमात्राणि चूर्णिताश्च त्वचस्तथा ।
इन्द्रवल्यङ्कुराश्वत्थपल्लवं च कुशेशयम् ।।३१।।

एकपत्राम्बुजं कुष्ठं कुंकुमं रोहिणीद्रुमम् ।
पुण्यास्सुमनसश्चाष्टौ यूथिका मल्लिका अपि ।।३२।।

त्रीण्युत्पलानि जातिश्च चम्पकं केतकी तथा ।
द्रव्याणि पञ्चदश च न्यसेत् मङ्गलपाथसि ।।३३।।

[सर्वौषधिजलद्रव्याणि]

मांसी कुष्ठं हरिद्रे द्वे मुरा शैलेयचम्पके ।
मुस्ता वचा च कर्पूरं प्रत्येकं पलमात्रकम् ।।३४।।

पिष्ट्वा सर्वौषधिजले दशैतानि विनिक्षिपेत् ।

[सर्वगन्धोदकद्रव्याणि]

कर्पूरं कुंकुमं कुष्ठं मांसी मलयजं मुरा ।।३५।।

प्रियङ्गु केसरं मुस्ता तमालं नागकेसरम् ।
मूलद्वयं च कच्चोरं सुरसर्पिककेसरम् ।।३६।।

उशीरं तगरं लोध्रं तथैव हरिचन्दनम् ।
अगरूद्वासितं कुष्ठं कालेयं ग्रन्थिपल्लवम् ।।३७।।

मुकुलं चम्पकस्येति प्रत्येकं पलसम्मितम् ।
चूर्णीकृत्य न्यसेत्तत्र सर्वगन्धोदके घटे ।।३८।।

[मूलौषधिद्रव्याणि]

व्याघ्री सिंही बलाकाग्नी शरपुंखा शतावरी ।
बिल्वमूलं वचा शुण्ठी कोरण्डं शतमूलिका ।।३९।।

---

३१. d: T. वल्लवम् for पल्लवम्;
३५ c: A. कोष्ठम् for कुष्ठम्;
३७. c: A. अगरू द्वौ सितं कोष्ठम्;
M. काष्टं for कुष्ठम्;
३९. a: A. व्याघ्री सिंहा बलाचाग्नि;

प्रत्येकं पलमानाः स्युः पिष्ट्वा कुंभे विनिक्षिपेत् ।
मूलौषध्यः इमाः प्रोक्ताः देवस्नपनकर्मणि ॥४०॥

[मकरन्दादिस्नपनद्रव्यपरिमाणम्]

मकरन्ददधिक्षीरपञ्चगव्यघृतान्यपि ।
प्रत्येकं द्रोणमानीय यद्वा शिवमथाढकम् ॥४१॥

द्रव्यकुंभानि सर्वाणि तत्प्रमाणानि कल्पयेत् ।

[चूर्णकुंभद्रव्याणि]

चूर्णकुंभं निशाचूर्णैः कण्ठदघ्नैः प्रपूरयेत् ॥४२॥

[मृत्तिकोदकद्रव्याणि]

पुण्यक्षेत्रे नदीतीरे पर्वते पुलिने ह्रदे ।
निर्झरे सङ्गमेऽशोष्ये वेदिकोर्वरयोस्तथा ॥४३॥

शालिक्षेत्रे देवखाते वृषशृङ्गे च हस्तिनः ।
वराहधृष्टे वल्मीके कुलीरावसथे तथा ॥४४॥

नलिन्यां दीर्घिकायां च स्थिताश्चैकोनविंशतिः ।
पृथक् च मुष्टिमात्राभिः पूरयेन्मृत्तिकोदकम् ॥४५॥

[प्रतिसरबन्धः शयनक्रमश्च]

अङकुराण्यर्पयेत्पूर्वं कुर्यात्प्रतिसरं करे ।
एकबेरे मूलबेरे बाहुल्ये स्नानकौतुके ॥४६॥

शय्यायां शाययेद् बिम्बं स्नानीयमितरद्यदि ।
कूर्चद्वारेण शयनं प्रातरुत्थाप्य देशिकः ॥४७॥

[स्नानमण्डपे स्नपनबिम्बस्थापनं कलशस्थापनादिकं च]

द्वारतोरणकुंभादीन् समभ्यर्च्य यथापुरम् ।
द्वारेष्वध्ययनं नृत्तं गीतं वाद्यं प्रवर्तयेत् ॥४८॥

---

४०. d: T. स्तवन for स्नपन;

४४. a: A. देवघाते, M देवघाते वा for देवखाते;

४७. b: M. शानीयमितरद्यपि T. इतराणि for इतरद्य°;

स्नपनप्रतिमां पश्चात् स्थापयेत्स्नानमण्डपे ।
पुण्याहं वाचयेत्पश्चात् प्रोक्षयेत्कलशानपि ॥४९॥

स्नानीयान्यपि वस्तूनि कलशस्थापनं चरेत् ।
'इन्द्रं नत्वे'ति मन्त्रेण तन्तुभिर्वेष्टनं भवेत् ॥५०॥

तत्तत्स्थानेषु कलशान् स्थापये'न्मूलविद्यया' ।
'सर्वमन्त्रेण' कुंभेषु द्रव्यैरम्बुप्रपूरणम् ॥५१॥

कूर्चेन पल्लवन्यासो यथानेत्रमनोहरः ।
'अस्त्रमन्त्रेण' तान् कुंभान् शरावैरपिधापयेत् ॥५२॥

नारिकेलफलैः तेषामलङ्कारः शुभोदयः ।
वासोभिर्वेष्टयेत्कुम्भान् मण्डयेच्चन्दनाक्षतैः ॥५३॥

[स्नपनकलशेषु तत्तद्देवानामावहनादिक्रमः]

वेदतुर्यादिघोषैश्च घोषिते च दिगन्तरे ।
देवतावाहनं कुर्यात् कलशेषु गुरूत्तमः ॥५४॥

घृतकुंभे वासुदेवः पुरुषश्चोष्णवारिणि ।
फलतोये तु सत्यः स्यात् स्नानेऽच्युत उदाहृतः ॥५५॥

अनन्त अक्षते कुंभे केशवो मणिवारिणि ।
लोहे नारायणो देवो माधवो गन्धवारिणि ॥५६॥

यवोदके तु गोविन्दः पाद्ये विष्णुः प्रकीर्तितः ।
मधुहन्ताऽर्घ्यकलशे आचामे तु त्रिविक्रमः ॥५७॥

वामनः पञ्चगव्ये च श्रीधरो दधिभाजने ।
दुग्धकुंभे हृषीकेशः पद्मनाभो मधुन्यपि ॥५८॥

दामोदरः कषायाम्भस्येवं कृत्वाथ मानुषे ।
गुडकुम्भे वराहस्स्यान्नृंसिंहश्चैक्षवोदके ॥५९॥

---

५०. c: A. दत्त्वा for नत्वा;

५३. a: A. M. नालिकेर for नारिकेल;

५५. c: M. सत्यम् for सत्यः;

५९. c: T. नृसिंह for वराह;

श्रीधरो नालिकेरोदे हयास्यः शान्तिवारिणि ।
वासुदेवो मङ्गलोदे सर्वौषध्यां सङ्कर्षणः ॥६०॥

प्रद्युम्नः सर्वगन्धाप्सु मूलौषध्यामनिरुद्धः ।
एवं ब्राह्मे तु कुंभानां देवताः परिकीर्तिताः ॥६१॥

चूर्णकुंभे भवेल्लक्ष्मीः मृत्तिकाकलशे मही ।
एवमावाहयेद्धीमान् योगपीठपुरस्सरम् ॥६२॥

तत्तन्नामचतुर्थ्यैव नमः प्रणवयुक्तया ।
अष्टावरं समुच्चार्य तत आवाहनं चरेत् ॥६३॥

अर्घ्यादि प्रणवान्तं तं समभ्यर्च्य यथाविधि ।

[अग्निहोममन्त्राणां निर्देशः]

अग्निं संस्कृत्य विधिवत् तत्राराध्य श्रियः पतिम् ॥६४॥

'मधुवाता' 'मधुनक्त' 'मधुमान्नो 'वनस्पति' ।
'वेदाहं' 'विष्णोर्नुकं' च 'ओषधयः संवदन्ते' ॥६५॥

नारायणानुवाकश्च तथा 'या ओषधीरिति' ।
विष्णुगायत्रिया चापि 'तद्विष्णोरि'त्यनन्तरम् ॥६६॥

'न ते विष्णुरि'ति श्रुत्या 'विष्णोः कर्मेति' मन्त्रतः ।
'दधिक्राव्णेति' यजुषा 'आप्यायस्वेति' वै ऋचा ॥६७॥

'मधुवाता' 'ओषधयस्त्वं' 'विष्णुर्या फलिनी'रिति ।
'शन्नोदेवीश्च' सावित्री त्रातारमिति देशिकः ॥६८॥

महाव्याहृतिभिः पश्चात् 'गन्धद्वाराम'नन्तरम् ।
शतधारं वसूनां च ततो घृतं मिमिक्षिरे ॥६९॥

सर्पिषा जुहुयादेतैर्मन्त्रैः सम्पातमाहरेत् ।
सेचयेच्चापि कुंभेषु देवमग्नेर्विसर्जयेत् ॥७०॥

---

६३. c: A. M. अष्टौ for अष्ट°;

६४. a: M. प्रापण for प्रणव;

६८. b: A. M. फलीरिति for फलिनीरिति;

[ब्राह्मस्नपनविधिनिर्देशः]

ऋत्विग्भिः सहितः कुंभान् शान्तिमन्त्रैश्च पञ्चभिः ।
अभिमन्त्र्यास्त्रमन्त्रेण वस्त्रेणाच्छाद्य देशिकः ॥७१॥

दन्तकाष्ठं गन्धतैलं दद्यादामलकं ततः ।
गण्डूषाचमने च द्वे देवायार्घ्यादि दापयेत् ॥७२॥

पौरुषेणैव सूक्तेन कलशैः स्नापयेद्धरिम् ।
वस्त्रयज्ञोपवीतादि नैवेद्यान्तं समर्चयेत् ॥७३॥

पूर्वं कूर्चेन सम्प्रोक्ष्य पश्चात्कुंभाभिषेचनम् ।
एतद्ब्राह्मं भवेत् स्नानम्

[वैष्णव-स्नपनविधिनिर्देशः]

वैष्णवं शृणु वक्ष्यते ॥७४॥

ब्राह्मे दैवे च तान्कुंभान् संस्थाप्यावाह्य पूर्ववत् ।
वैष्णवेनैव सूक्तेन जुहुयात् षोडशाहुतीः ॥७५॥

अन्ते च विष्णुगायत्र्या हुत्वा सम्पातसेचनम् ।
अन्यत् सर्वं यथापूर्वं न विशेषोऽस्ति कश्चन ॥७६॥

[पुण्यस्नपनविधिनिर्देशः]

अथ पुण्यं प्रवक्ष्यामि स्नपनं शार्ङ्गधन्वनः ।
दिव्यं च मानुषं त्यक्त्वा ब्राह्मे नवघटास्पदम् ॥७७॥

घृतं ब्राह्मे न्यसेत् कुंभं प्राच्यां पाद्यघटं न्यसेत् ।
अर्घ्यकुंभं पदे याम्ये आचामाम्बु च वारुणे ॥७८॥

पञ्चगव्यमुदीचीने आग्नेये दधिभाजनम् ।
नैर्ऋते तु पयः कुंभं मारुते मधुभाजनम् ॥७९॥

कषायमीशकोणे च द्रव्यदेवाश्च पूर्ववत् ।
अद्भ्यः सम्भूत इति च वेदाहं च प्रजापतिः ॥८०॥

---

७३. b: M. स्थापयेत् for स्नापयेत्;

८०. b: M. वेदा for देवा;

यो देवेभ्यः ऋचं ब्राह्मं यद्वाग्देवीं ततः परम् ।
.... चत्वारि श्रद्धयेति च ॥८१॥

नवभिर्जुहुयादग्नौ संपाताज्येन सेचयेत् ।
अन्यत्सर्वं यथापूर्वं कथितं कलशोद्भव ॥८२॥

[हरिद्रामृत्तिकास्नपनमन्त्रनिर्देशः]

'श्री सूक्तेन' भवेद्धोमो हरिद्रास्नानकर्मणि ।
हवनं 'भूमिसूक्तेन' मृत्तिकास्नपने सति ॥८३॥

[महास्नपनभेदाः]

वासुदेवं पारमेष्ठ्यं प्राजापत्यमिति त्रिधा ।
महास्नपनमेतत्तु प्रायश्चित्तेषु कर्मसु ॥८४॥

[वासुदेवस्नपनविधिः]

ब्राह्माणां द्रव्यकुंभानामष्टावष्टौ समन्ततः ।
शुद्धोदकुंभाः संस्थाप्याः तेषां संख्या शतद्वयम् ॥८५॥

द्रव्यकुंभार्चनं पूर्वं कथितं कलशोद्भव ।
सर्वशुद्धोदकुंभानां देवो नारायणः स्मृतः ॥८६॥

शुद्धोदकेषु सर्वेषु मौक्तिकं राजतं तु वा ।
विन्यसेद्धोममन्त्रस्तु पूर्वमेवोदितं मुने ॥८७॥

तंहुत्वा सर्पिषा पश्चात् द्वादशाक्षरविद्यया ।
सहस्रमष्टसहितं हुत्वा सम्पात होमयेत् ॥८८॥

अन्यत् सर्वं यथापूर्वं कारयेत्कर्मकोविदः ।
एतत्तु वासुदेवाख्यं स्नपनं सर्वकामदम् ॥८९॥

[पारमेष्ठ्यस्नपनविधिः]

पारमेष्ठ्यमथो वक्ष्ये यथावदवधारय ।
वैष्णवानां तु कुंभानां परितोऽष्टौ पृथक् पृथक् ॥९०॥

---

८१. c: om A. T. M;

८८. d: A. सम्पातमाहरेत् for सम्पात होमयेत्;

८९. d: M. T. कर्म for सर्व°

९०. d: T. ष्टौऽष्टौ for ऽष्टौ;

एतेषामुदकुंभानां षट्त्रिंशत् सहिताः शतम् ।
पूर्ववत् सकलं कृत्वा वैष्णवोक्तविधानतः ॥६१॥

नारायणार्चनं कुर्यात् मूलेनैव घटाम्बुषु ।
वैष्णवेनैव सूक्तेन गायत्र्यन्तं यथापुरम् ॥६२॥

हुत्वा मूलेन मनुना होमश्चाष्टसहस्रकम् ।
अन्यत् सर्वं यथापूर्वम् प्राजापत्यमथ शृणु ॥६३॥

[प्राजापत्यस्नपनविधिः]

पुण्यस्नपनवत् कार्यम् अष्टावष्टौ समन्ततः ।
तेषां तथाकृतेऽम्बूनां द्विसप्तति घटास्तथा ॥६४॥

वैष्णवेन षडर्णेन विष्णोरावाहनं भवेत् ।
विशेषयजनं तेन अष्टोत्तरसहस्रकम् ॥६५॥

अभिषिच्य द्रव्यकुंभैः तैस्तैस्तेषामुपोदकैः ।
स्नापयित्वा मण्डयित्वा समभ्यर्च्य यथाविधि ॥६६॥

प्रणम्य च परिक्रम्य स्तुत्वा स्तोत्रैरनेकधा ।
मन्दिराभ्यन्तरं पश्चात् गमयेत्स्नानकौतुकम् ॥६७॥

एकबेरविधानं चेत् स्नपनं मूलकौतुके ।

[कौबेरस्नपनविधिः]

कौबेरं स्नपनं वक्ष्ये शृणुष्व कलशोद्भव ॥६८॥

घृतं मध्ये दध्यनले पीयूषं नैरृते पदे ।
मकरन्दं गन्धवहे शर्करा शाङ्करे पदे ॥६९॥

---

६१. a: A. एके for एते°;
६२. b: M. T. मूलेनोप for मूलेनैव;
६३. b: T. अष्टौ for अष्ट;
६४. c: T. कृतो for कृते;
६८. d: T. कमलोद्भव for कलशोद्भव;
६९. a: T. मध्य for दध्य ;

नृसिंहः शर्करादेवः इतरेषां यथापुरम् ।
'ब्रह्मजज्ञानमि'ति च 'अयाश्चाग्नेति' विद्यया ॥१००॥

'असुन्वन्ते'ति च ऋचा 'चानोनियुनि' (?) मन्त्रतः ।
'तमीशानमि'तीत्येवं सर्वमन्यत् यथापुरम् ॥१०१॥

[कल्याणस्नपनप्रकारः]

अनेनैव प्रकारेण चत्वारिंशच्छुभोदकैः ।
स्नानं कल्याणमुदितं व्याहृत्यावाहनं हरेः ॥१०२॥

तयैव जुहुयादग्नौ अष्टोत्तरसहस्रकम् ।

[अपराजितस्नपनस्य ऐन्द्रस्नपनस्य च स्वरूपम्]

एकेन घृतकुंभेन स्नानं स्यादपराजितम् ॥१०३॥

उपकुंभाष्टकयुतमैन्द्रमेतन्मुनीश्वर ।
'अपराजितमन्त्रेण' होमः स्यादपराजिते ॥१०४॥

ऐन्द्रे शुद्धोदकुंभानां देवस्त्रैलोक्यमोहनः ।
होमस्त्रैलोक्यमन्त्रेण अष्टोत्तरसहस्रकम् ॥१०५॥

अन्यत्सर्वं यथापूर्वं कर्तव्यं कर्मकोविदैः ।

[स्नपनजलस्नानादिफलश्रुतिः]

एवं ते स्नपनं प्रोक्तं सप्रकारं महामुने ॥१०६॥

देवस्नानाम्बुभिः स्नातः नरके न निमज्जति ।
तत्तीर्थं पाति यो भक्त्या पुनर्जन्म न विद्यते ॥१०७॥

---

१००. c: A. ब्रह्मजि for ब्रह्मज ;
१०१. b: M. T. चानोनियुदिति for चानोनियुनि;
१०३. d: M. अपराजितेः for अपराजितम्;
१०४. a: A. कुंभोदक for कुंभाष्टक
d: M. अपराभिम् for अपराजिते;
१०६. b: T. कोविदः for कोविदैः;

पादुकां शिरसा विभ्रन् वैकुण्ठे किङ्करो भवेत् ।
चूर्णं धृत्वा तु शिरसि मोदते दिवि देववत् ॥१०८॥

[स्नपने पादुकातीर्थादिप्रदाननिर्देशः]

पादुकातीर्थचूर्णानि गृहीत्वा देशिकोत्तमः ।
सिषेविषुभ्यः सर्वेभ्यो भक्तेभ्योऽपि प्रदापयेत् ॥१०९॥

॥ इति भार्गवतन्त्रे विंशोऽध्यायः ॥

———

१०८. a: M. T. विभ्रत् for विभ्रन्;
c: A. च for तु;
१०९. c: T. विषेविविषुभ्य for सिषेविषुभ्यः;

एकविंशोऽध्यायः

[पवित्रारोपणविधिनिरूपणाध्यायः]

[कर्मसु जायमानदोषपरिहारविषयकः प्रश्नः]

अगस्त्यः

भगवन् देवदेवेश जामदग्न्य कृपानिधे।
नित्यनैमित्तिकादीनां न्यूनाधिक्यादिसंभवे ॥१॥

सर्वेषां ब्राह्मणादीनां चातुराश्रम्यमेयुषाम्।
किं नु तत्र समाधानं ब्रूहि मे भक्तवत्सल ॥२॥

[पवित्रारोपणस्य दोषपरिहारोपायत्वम्]

श्रीरामः

पवित्रयजनं नाम समाराधनमुत्तमम्।
समाप्य पूताः ते सर्वे गलिताः कर्मणो नराः ॥३॥

[पवित्रारोपणार्थं कालनिर्देशः]

श्रावणे भाद्रपद्यां वा मासि वाश्वयुजे भवेत्।
शोभने तिथिनक्षत्रे वासरे शुभनन्दिते ॥४॥

पवित्रभूषणं कुर्यात् कल्याणं कमलापतेः।
अश्विन्योः श्रवणे पुष्ये रोहिण्यां वा पुनर्वसौ ॥५॥

उत्तरत्रितये स्वातौ मृगे मैत्रेऽन्त्यभेऽपि वा।
कुर्यात् पवित्रं कल्याणं यथाविधि मुनीश्वर ॥६॥

[पवित्रोपादानद्रव्यसन्नाहः]

तन्तून् ब्राह्मणकन्याभिर्निर्मितानथवाऽपणात्।
क्रीतान् वा दोषरहितान् कौशेयान् वा यथावसु ॥७॥

---

५. c: A. अश्विने for अश्विन्योः;

६. b: A. चैत्रेन्तके for मैत्रेऽन्त्यभे;

आदाय क्षालयित्वाद्भिः मुद्गचूर्णैर्विमिश्रयेत् ।
शोषयेदातपे सम्यक् त्रिगुणीकृत्य तान् पुनः ॥८॥

पुनश्च त्रिगुणीकृत्य शङ्कोः सूत्रं निवेशयेत् ।
अङ्गस्थलानुगुण्येन पवित्रं कारयेत् सुधीः ॥९॥

सूत्राण्यष्टोत्तरशतं सर्वत्र परिकीर्तितम् ।

[पवित्रमानं ग्रन्थिसंख्या च]

पवित्रमधिवासाय नाभ्यन्तं परिकल्पयेत् ॥१०॥

आचार्यदेवपद्मानां शिरोमानं गुरोर्भवेत् ।
द्वात्रिंशद्ग्रन्थयस्तेषाम् अनले मेखलासमम् ॥११॥

कुंभस्य करकस्यापि कण्ठमानमुदीरितम् ।
विंशतिस्सप्त च तयोर्ग्रन्थयः परिकीर्तिताः ॥१२॥

[दशपवित्राणां नामानि लक्षणञ्च]

पवित्रसंख्या बेराणां दश तानि वदाम्यहम् ।
प्रामाण्यं ग्रन्थिसंज्ञं च अलङ्काराह्वयं तथा ॥१३॥

उत्तमाधममध्यानि किरीटाख्यमनन्तरम् ।
श्रीवत्सकौस्तुभाह्वानं वनमालाह्वयं दश ॥१४॥

प्रामाण्यं नाभिमर्यादं द्वात्रिंशद्ग्रन्थिसंयुतम् ।
हृदयान्तं ग्रन्थिसंज्ञं ग्रन्थयः पञ्चविंशतिः ॥१५॥

अलङ्कारं तु जङ्घान्तं द्वात्रिंशद्ग्रन्थिनिर्मितम् ।
उत्तमं जानुसीमान्तं ग्रन्थयोऽष्टोत्तरं शतम् ॥१६॥

अशीति ग्रन्थिसहितमूर्वन्तं मध्यमं भवेत् ।
नाभ्यन्तं ग्रन्थयः षष्टिः जघन्यस्य प्रकीर्तितम् ॥१७॥

किरीटमानं तन्नाम्नो द्वात्रिंशत् ग्रन्थयः स्मृताः ।
श्रीवत्सं स्तनमर्यादं ग्रन्थयः सप्तविंशतिः ॥१८॥
कौस्तुभं हृदयान्तं स्यात् द्वात्रिंशद्ग्रन्थिसंयुतम् ।
वनमालापवित्रं तु चरणान्तं प्रकल्पयेत् ॥१९॥

---

१९. b: M. सावितम्, T. सम्मितम् for संयुतम्;

अनेकग्रन्थिसहितं स्वतन्त्राणामिदं भवेत् ।

[परतन्त्रबिम्बानां पवित्रमाननिर्देशः]

बिम्बानां परतन्त्राणां देवीनां चोत्तमादिकम् ॥२०॥

हस्तमानं भवेदग्नेर्ग्रन्थयो द्वादश स्मृताः ।
सर्वेषां परिवाराणां द्वात्रिंशद्ग्रन्थिभिर्युतम् ॥२१॥

नाभ्यन्तं द्वारपालानामपि तादृशकल्पनम् ।
कर्णिकायामसदृशं पीठान्तं परिकल्पयेत् ॥२२॥

अनेकग्रन्थिसहितं गुरूणामृत्विजामपि ।
अन्येषामपि सर्वेषां नाभ्यन्तं परिकल्पयेत् ॥२३॥

[पवित्रनिर्माणविधिः]

गन्धैः परिमलीकुर्यात् द्रव्यैः कर्पूरिकादिभिः ।
मणिमुक्ताप्रवालाद्यैः स्वर्णैर्वा कुसुमैरपि ॥२४॥

ग्रन्थीनां पूरणं कुर्यात् कुङ्कुमाद्यैश्च शोभयेत् ।
यथाविभवविस्तारं पवित्राणि प्रकल्पयेत् ॥२५॥

[पवित्रोत्सवसम्पादनार्थमनुज्ञायाचनम्]

अङ्कुराण्यर्पयेद्रात्रौ दशम्यां प्रार्थयेद्धरिम् ।
प्रणम्य च परिक्रम्य ऋत्विग्भिः सहितो गुरुः ॥२६॥

चातुर्वर्ण्यस्याश्रमिणां कर्मवैकल्यशान्तये ।
सर्वदोषविनाशार्थं सेवतां च महोत्सवम् ॥२७॥

सम्पदे सर्वलोकानां दुर्भिक्षोत्सादनाय च ।
आरोग्यसिध्यै रुग्णानां प्रभोरिष्टार्थसिद्धये ॥२८॥

पवित्रारोहणं नाम क्रियतेऽद्य महोत्सवः ।
अनुजानीहि देवेश कर्मस्वस्मान्नियोजय ॥२९॥

---

२१. a: T. सप्त for हस्त;

२२. d: T. पीठानाम् for पीठान्तम्;

[पवित्राधिवासनविधिनिर्देशः]

प्रार्थ्यैवं मन्दिरात्तस्मात् आचार्यो मण्डपान्तरे ।
ऋत्विग्भिः सह दर्भेषु प्रागानन उपोषितः ॥३०॥

जपैर्ध्यानेन च हरेः रात्रिं सर्वां समापयेत् ।
आरभेत प्रभातायामधिवासनकर्मणि ॥३१॥

न्यस्तचित्तो हविर्भुक्त्वा निशायामधिवासयेत् ।
पवित्रभूषणस्नानकौतुकानि ध्रुवे भवेत् ॥३२॥

एकबेरे तदितरे सव कल्याणकौतुके ।
ततः प्रतिसरं बध्वा पूजयेत् द्वारतोरणान् ॥३३॥

चतुर्वेदविदो विप्रान् स्थापयेच्च चतुर्दिशम् ।
वाद्यघोषे च संघुष्टे धान्यराशौ च मण्डपे ॥३४॥

प्रागग्रेषु च दर्भेषु पवित्राणि निवेशयेत् ।
पुण्याहवारिभिः प्रोक्ष्य शोषयेच्छोषणादिभिः ॥३५॥

गन्धवस्तुभिरालिप्य सुगन्धैरपि धूपयेत् ।
कुसुमानि विकीर्याथ वेष्टयेन्नववाससा ॥३६॥

प्रदर्श्य चक्रमुद्रां च पूजयेदस्त्रविद्यया ।
सूत्रैरीशानमारभ्य मण्डपं परिवेष्टयेत् ॥३७॥

ऊर्ध्वं चक्रमधः पद्मं गदां द्वारेषु चाष्टसु ।
दिक्षु शंखं मण्डपस्य ध्यात्वा भूतबलिं क्षिपेत् ॥३८॥

छिद्रयन्ति च कर्माणि विघ्नयन्ति च यानि वै ।
बलिं गृहीत्वा निर्यान्तु तानि भूतानि वै बहिः ॥३९॥

---

३०. b: A. M. मण्टप for मण्डप;
३४. b: T. °दिश for °दिशम्;
c: M. °घुष्टे for °घोषे;
३५. a: M. अग्नेषु for. अग्रेषु;
३८. c: A. दिक्षौ for दिक्षु;

इति मन्त्रेण भूतेभ्यो माषान्नेन बलिर्भवेत् ।

[पवित्रोत्सवक्रमे भगवतः चतुःस्थानार्चनम्]

ततः संस्नाप्य देवेशमुपवीतान्तमर्चयेत् ॥४०॥

निर्माय मण्डलं तस्मिन् देवमारोप्य पूजयेत् ।
मण्डलं च ततः कुंभे वासुदेवं समर्चयेत् ॥४१॥

सुदर्शनं च करके निवेद्यान्नं यथाविधि ।
ततः कुण्डेऽग्निमाधाय मूलेन समिदष्टकम् ॥४२॥

चरुणाथ 'नृसूक्तेन' जुहुयात् षोडशाहुतीः ।
स्रुवेणाज्येन चाष्टौ च मूलमन्त्रेण देशिकः ॥४३॥

सम्पातमाज्यं सङ्गृह्य पवित्रेषु विसर्जयेत् ।

[पवित्रारोहणप्रकारः]

'इदं विष्णु'रिति श्रुत्या पवित्रारोहणं भवेत् ॥४४॥

कल्याणकौतुके कुम्भे करकेऽग्नौ च मण्डले ।
आरोप्य मङ्गलैः सार्धं मूलबिम्बे तथा चरेत् ॥४५॥

सर्वार्चासु तथा कृत्वा प्रासादं वेष्टयेत्ततः ।
पञ्चवर्णैस्तथा सूत्रैर्नयेद्रात्रिं जपादिभिः ॥४६॥

[पवित्रोत्सवद्वितीयदिनकृत्यम्]

जागरेण ततः प्रातर्मण्डलस्थं जगद्गुरुम् ।
स्नापयित्वा समभ्यर्च्य चक्राब्जं वर्तयेत् पुनः ॥४७॥

द्वारादियजनं कृत्वा पूजयेच्चक्रपङ्कजम् ।
तस्मिन् देवं समारोप्य कुंभं च करकं तथा ॥४८॥

दीपान्तमर्चयेत्प्राज्ञः निवेद्य च चतुर्विधम् ।

[पवित्रोत्सवक्रमे होमविधिः]

हविरग्नौ च जुहुयात् 'नृसूक्तेन' चतुर्विधम् ॥४९॥

---

४२. c: M. ततः कुण्टे निधायाथ;
T. ततः कुंभे विधायाथ;

यवं व्रीहिं च वेणुं च तिलं लाजं तथा सुमम् ।
अगरुं च घृतं पश्चात् समिधो नवमं पृथक् ॥५०॥

अष्टोत्तरशतं होमो मुहूर्ते शोभने गुरुः ।

[मण्डलादीनां पवित्रैः भूषणप्रकारः]

पवित्रैर्मण्डलं कुंभं करकं मखकौतुकम् ॥५१॥

कुण्डं च हव्यवाहं च भूषयित्वाब्जमण्डलम् ।
प्रदक्षिणीकृत्य ततो मन्दिरे ध्रुवकौतुकम् ॥५२॥

पवित्रैः समलङ्कृत्य हविरन्तं समर्चयेत् ।
बेराण्यन्यानि सर्वाणि परतन्त्रांस्तथेतरान् ॥५३॥

देवीश्च परिवारांश्च पीठान्यपि यथाक्रमम् ।
वाद्यवेदादिघोषैश्च पवित्रारोहणं चरेत् ॥५४॥

'मूलमन्त्रे'ण सर्वेषां पवित्रारोहणं मतम् ।
आचार्यो मूर्तिपैः सार्धं प्रविश्य हरिमन्दिरम् ॥५५॥

प्रणम्य स्वाञ्जलिं पुष्पैरापूर्य स्तुनुयात्ततः ।
विकिरेत्तानि पुष्पाणि देवपादारविन्दयोः ॥५६॥

मनुष्यार्थानि सर्वाणि पवित्राणि तथा हरेः ।
विन्यस्य पादयोः स्तुत्वा नत्वा स्वार्थं समाहरेत् ॥५७॥

ततः पूजकमुख्यानाम् ऋत्विजां सहकारिणाम् ।

[अपराह्णे भगवन्तं प्रति क्षमाप्रार्थनम्]

अन्येषां ब्राह्मणादीनामितरेषां च दापयेत् ॥५८॥

देवस्याननमालोक्य पादौ स्पृष्ट्वा जगद्गुरोः ।
विज्ञापयेदिमां गाथां प्राञ्जलिर्विनयान्वितः ॥५९॥

भगवन् देवदेवेश सर्वलोकनमस्कृतः ।
संवत्सरोपचारेषु न्यूनाधिक्योपशान्तये ॥६०॥

---

५१. c: T. विछित्रैः for पवित्रैः;

५२. d: T. कौतुके for कौतुकम्;

आराधनमिदं भक्त्या सहास्माभिरनुष्ठितम् ।
गृहाण नेह किञ्चिच्च स्वातन्त्र्यं मम माधव ॥६१॥

त्वदाज्ञया कृतं सर्वं त्वमेव परमा गतिः ।
अत्र न्यूनातिरेकाणि क्षमस्व पुरुषोत्तम ॥६२॥

इति तं प्रार्थयेद्देवमपराह्णे जगत्पतेः ।

[उत्सवक्रमे दैनन्दिनकृत्यम् महोत्सवदिवसश्च]

उत्सवं कारयेद्भक्त्या प्रत्यहं स्नपनं तथा ॥६३॥

कालद्वयेऽपि होमश्च नव वा सप्त पञ्च वा ।
त्रिरात्रमेकरात्रं वा द्वारादियजनान्वितम् ॥६४॥

महोत्सवं प्रकुर्वीत चरमे दिवसे गुरुः ।

[पवित्रारोहणे वैकल्पिकमन्त्रः]

पवित्रारोहणं कुर्यात् 'पुंसूक्ते'नापि वा हरेः ॥६५॥

[पवित्रारोहणफलश्रुतिः]

इत्येष कथितो ब्रह्मन् पवित्रारोहणो विधिः ।
एवं यः कुरुते भक्त्या स याति परमां गतिम् ॥६६॥

॥ इति भार्गवतन्त्रे एकविंशोऽध्यायः ॥

---

६४. a: A. होमम् for होमः;

६६. b: A. M. आरोहण्म् for आरोहणः;

द्वाविंशोऽध्यायः

[विविधप्रायश्चित्तनिरूपणाध्यायः]

[पूजावैकल्यादौ निष्कृतिविषयकः सामान्यः प्रश्नः]

अगस्त्यः

नित्यनैमित्तिकाद्यानां पूजानां भगवन् प्रभो ।
वैकल्ये वाथवा लोपे निष्कृतिस्तत्र का भवेत् ॥१॥

[अशुद्धदेहेन संपादिते अर्चने प्रायश्चित्तम्]

श्रीरामः

शृणुष्व मैत्रावरुणे सर्वं वक्ष्ये यथाक्रमम् ।
कर्माणि येन पूर्यन्ते येन तुष्टो भवेद्धरिः ॥२॥

अस्नातोऽनुपनीतो वा तिलकेन विवर्जितः ।
वसानो मलिनं वस्त्रं क्लिष्टवासोऽपवित्रकः ॥३॥

प्रलयादिक्रमाद्देहमसंशोध्य समाधिना ।
मन्त्रन्यासमकृत्वा च पूजिते च जगत्प्रभौ ॥४॥

जपेदष्टाक्षरं मन्त्रम् अष्टोत्तरशतं बुधः ।

[अशुद्धपादादिसमर्चने प्रायश्चित्तम्]

पादौ हस्तावसंशोध्य अनाचम्य समर्चने ॥५॥

जपः पञ्चोपनिषदां नग्नो मुक्तशिरोरुहः ।

[श्वसनादिपूर्वकसम्पादिते अर्चने प्रायश्चित्तम्]

श्वसन् हसन् वा कुप्यन् वा स्विन्नाङ्गः प्रलपन्नपि ॥६॥

---

५. a: M. जपेत्व° for जपेद°;
b: M. बुधैः for बुधः;

अर्चयेद्देवदेवेशं शतमस्त्रमनुं जपेत् ।

[लोमादिस्पर्शनादिपूर्वकभगवदर्चने प्रायश्चित्तम्]

लोमलोष्ठास्थिकेशादिस्पर्शनेनैव निष्क्रिया ॥७॥

अनाप्लुत्य स्त्रियं गत्वा पूजयेत्पुरुषोत्तमम् ।
स्नापयेत्पञ्चगव्येन पञ्चोपनिषदं जपेत् ॥८॥

[रजस्वलावस्त्राद्यस्पर्शानन्तरं सम्पादिते अर्चने प्रायश्चित्तम्]

एवं रजस्वलावस्त्रं स्पृष्ट्वा देवसमर्चने ।
वेदविक्रयचण्डालयूपश्वानरजस्वलाः ॥९॥

काकपाषण्डपतितप्रतिलोमखरादिकान् ।
चैत्यवृक्षं चितिं स्पर्शायोग्यं स्पृष्ट्वा समर्चने ॥१०॥

पञ्चवारुणिकैर्मन्त्रैः स्नपनं कुशवारिणा ।
क्षीरेण स्नापयेद्देवं सकेशकुसुमार्चने ॥११॥

[मलमूत्रादिदूषिते बिम्बे भगवदर्चने निष्कृतिः]

दूषितैर्मलमूत्राद्यैः पूजिते परमेश्वरे ।
स्त्रीभिर्वानुपनीतैर्वा बिम्बे स्पृष्टेऽपि वाचरेत् ॥१२॥

कुशोदकेन स्नपनं मन्त्रेण परमेष्ठिना ।

[दुष्टान्ननिवेदिते प्रायश्चित्तम्]

म्लेच्छपुल्कसचण्डालप्रतिलोमानुलोमजैः ॥१३॥

अस्पृश्यैरपि शूद्राद्यैराचाररहितैर्द्विजैः ।
श्वभिः सृगालैश्च खरैः स्पृष्टमन्नं निवेदितम् ॥१४॥

अयाज्ञियैः कोद्रवाद्यैः हविः कृत्वा निवेदितम् ।
प्रमादेन घृतस्नानं स्नानमुष्णाम्बुभिस्ततः ॥१५॥

---

९. d: M. T. धूप for यूप;

१०. c: A. चितिस्पर्शम् for चितिं स्पर्शा;
d: A. योग्यम् for अयोग्यम्;

[अत्युष्णादिहविर्निवेदने प्रायश्चित्तम्]

अत्युष्णमतिशीतं वा विना शाकादिभिस्तु वा ।
हविर्निवेदने कुर्यात् 'पञ्चोपनिषदां' शतम् ॥१६॥

[शवादिदूषिते ग्रामे प्रायश्चित्तम्]

शवादिदूषिते ग्रामे पक्वान्नं विनिवेदयेत् ।
पयसा स्नपनं कृत्वा 'पञ्चोपनिषदां' जपः ॥१७॥

[पूजारंभानन्तरं मरणाशौचे विधिः]

आरब्धायां तु पूजायामन्तरा म्रियते यदि ।
तन्त्रेण सकलं कृत्वा देवदेवे समापयेत् ॥१८॥

न स्नानादिक्रिया तत्र न होमो न बलिर्महः ।
नैवेद्यमेकं कुर्वीत तत्तन्त्रमिति कथ्यते ॥१९॥

[निवेदितस्य अन्यस्मै निवेदने प्रायश्चित्तम्]

भूयो निवेदयेत्पूर्वम् अन्यस्मै वा निवेदितम् ।
कुशोदकैः स्नापयित्वा 'मूलमन्त्रा'युतं जपः ॥२०॥

[अन्यदेवार्चनप्रयुक्तसाधनोपयोगे प्रायश्चित्तम्]

अन्यदेवार्चितं पुष्पम् अन्यदीयं रथादिकम् ।
पूजादिषूपयुक्तं चेत् गन्धवस्त्रादिकं तथा ॥२१॥

कल्याणस्नपनं कृत्वा 'मूलमन्त्रं' शतं जपेत् ।

[कृम्यादिदूषितपुष्पाद्युपयोगे प्रायश्चित्तम्]

कृमिकीटादिभिर्दुष्टमन्यदेवाय निर्मितम् ॥२२॥

पूजादिषूपयुक्तं चेत् दध्ना स्नानं समाचरेत् ।

[समर्पितावशेषोपयोग प्रायश्चित्तम्]

भुक्तशेषेण वा विष्णोर्दत्तशेषेण वा पुनः ॥२३॥

---

२०. c: A. कुशोदके for कुशोदकैः;

२१. c: M. उपयुक्तः T. उपयुक्ताः for उपयुक्तम्;

२२. b: M. मन्त्र° for मन्त्रम्;

'मूलमन्त्र'सहस्र तु जपेदष्टोत्तरं बुधः ।

[पूजायां पर्युषितोदकोपयोगे प्रायश्चित्तम्]

पूजायां स्नपने वापि यदि पर्युषितोदकम् ॥२४॥
योजयेच्छान्तये तस्य कुशोदकघटाप्लवः ।

[मलादिदुष्टवस्तुप्रयोगे प्रायश्चित्तम्]

मलमूत्रादिदुष्टेन वस्तुना पूजिते यदि ॥२५॥
स्नापयेद्वैष्णवैः कुम्भैः पुनः पूजादि कारयेत् ।

[कूपदोषे प्रायश्चित्तम्]

शवादिदूषितात् कूपात् जलं सर्वं समुद्धरेत् ॥२६॥
पुण्याहं वाचयित्वान्ते प्रोक्षयेज्जलशुद्धये ।

[विहितोपचारभङ्गे प्रायश्चित्तम्]

क्लृप्तोपचारभङ्गे तु द्विगुणं कारयेत्ततः ॥२७॥
शान्तयेऽष्टोत्तरशतं 'मूलमन्त्रं' जपेत्सुधीः ।

[पूजावैकल्यादौ प्रायश्चित्तम्]

वैकल्ये देवदेवस्य पूजायाः द्विगुणार्चनम् ॥२८॥
पूजावैकल्यकालानां द्विगुणैर्वस्तुभिः पुनः ।
प्रायश्चित्तावसाने तु पूजयेत्परमेश्वरम् ॥२९॥

[पूजाकालवैकल्ये प्रायश्चित्तविधिः]

एकाहपूजावैकल्ये स्नपनं शान्तिवारिणा ।
दिनमेकमतिक्रम्य वैकल्यञ्चेद्दिनत्रये ॥३०॥

---

२४. a: T. सहस्रान्तम् for सहस्रं तु;
२६. c: T. कुंभात् for कूपात्;
२८. d: M. T. पूजया for पूजायाः;
२९. d: T. पूरयेत् for पूजयेत्;
३०. d: A. वैकल्यः for वैकल्यम्;
M. त्रयम् for त्रये;

मङ्गलोदककुंभेन स्नपनं कारयेत्सुधीः ।
अत ऊर्ध्वं द्वादशाहं पूजावैकल्यसंभवे ॥३१॥

स्नापयेत्सर्वगन्धेन पक्षान्तं विकले सति ।
मूलौषधीभिः स्नपनं मासं पूजाविपर्यये ॥३२॥

ब्राह्मेण कारयेत्स्नानं वत्सरान्तं यदा भवेत् ।
स्नापयेत्पारमेष्ठेन वत्सरद्वयलङ्घने ॥३३॥

वासुदेवं भवेत्स्नानं ततः संवत्सरावधि ।
संप्रोक्षणं प्रकुर्वीत प्रतिष्ठावत्सरत्रयात् ॥३४॥

प्रायश्चित्तेषु सर्वेषु कुर्याद्ब्राह्मणभोजनम् ।

[अशास्त्रीयपूजादौ प्रायश्चित्तम्]

अशास्त्रीयेण पूजां वा बलिं वा होमकर्म वा ॥३५॥

कुरुतेऽक्षततोयेन स्नपनं तस्य निष्कृतिः ।
एवं बहुदिने जाते विधिवर्जितपूजने ॥३६॥

स्नापयेद्वासुदेवेन तेन शान्तिर्भविष्यति ।

[अग्निदोषे प्रायश्चित्तम्]

अस्पृश्यस्पर्शने वह्नेः कृमिकेशादिदूषणे ॥३७॥

अष्टोत्तरशतं होमो व्याहृत्या तेन शाम्यति ।
चण्डालसूतकोदक्याशवपुल्कसदूषिते ॥३८॥

अयुतं होम उदितो व्याहृत्या हव्यवाहने ।

[परिवारार्चननाशादौ प्रायश्चित्तम्]

परिवारार्चने नष्टे भङ्गे वा बलिकर्मणः ॥३९॥

तत्तन्मन्त्रैर्यथाकालं द्विगुणीकृत्य पावके ।
जुहुयाच्छान्तये तेषां समिधा वा घृतेन वा ॥४०॥

---

३३. b: A. यथा for यदा;

३६. c: T. °विधे for °दिने;

३९. a: A. व्यावृत्या for व्याहृत्या;

४०. d: M. T. समिदा for समिधा;

[बलिद्रव्यबलिबिम्बपतने प्रायश्चित्तम्]

पतिते तु बलिद्रव्ये पुनरन्येन कारयेत् ।
शान्तये स्नपनं कुर्यात् नारिकेलाम्भसा हरेः ॥४१॥

बलिबिम्बे निपतिते यानादेः स्थापयेत्पुनः ।
बलिशेषं समाप्याथ वैष्णवं स्नपनं चरेत् ॥४२॥

[अज्ञातजातिचौरैः स्पृष्टे बिम्बे प्रायश्चित्तम्]

अज्ञातजातिभिश्चोरैः स्पृष्टे बिम्बे जगत्पतेः ।
प्राजापत्यं प्रकुर्वीत स्नपनं तस्य शान्तये ॥४३॥

[मृण्मयादिबिम्बदोषे प्रायश्त्तिम्]

मृण्मयं चित्रलिखितं कौतुकं च त्रिवस्तुकम् ।
चण्डालाद्यैर्दूषितं चेत् त्यक्त्वा सर्वं पुनः सृजेत् ॥४४॥

[अस्पृश्यैः स्पृष्टे बिम्बे प्रायश्चित्तम्]

बिम्बे पातकिभिः स्पृष्टे ब्राह्मं स्नपनमाचरेत् ।
शूद्रेण कौतुके स्पृष्टे पुण्येन स्नापयेद्धरिम् ॥४५॥

सामान्यैर्ब्राह्मणैः स्पृष्टे कौतुके परमेष्ठिनः ।
स्नापनं कुशतोयेन तस्य निष्कृतये भवेत् ॥४६॥

दुष्टस्त्रीभिस्तथाऽस्पृश्यैः कुण्डैर्वा गोलकैस्तु वा ।
स्पृष्टे तच्छान्तये कुर्यात् पुण्येन स्नपनं हरेः ॥४७॥

[वैश्यादिभिः गर्भगेहप्रवेशे प्रायश्चित्तम्]

वैश्यशूद्रानुलोमाद्यैर्गर्भगेहप्रवेशने ।
स्त्रीभिर्वा पञ्चगव्येन प्रोक्षणं तत्र कल्पयेत् ॥४८॥

गर्भगेहप्रवेशश्चेत् चण्डालैः पुल्कसादिभिः ।
मृदादिकौतुकं त्याज्यं क्षालयेत् गोमयाम्बुभिः ॥४९॥

प्रोक्षयेत्पञ्चगव्येन पुण्याहं वाचयेत्ततः ।
पुनः सृष्ट्वा यथापूर्वं सर्वमन्यद्यथा पुरम् ॥५०॥

———————

४९. a: M. T. प्रवेशं for प्रवेशः;
c: M. मृगादि for मृदादि°;

शैलादीनां तु बिम्बानां स्पर्शे ब्राह्मं समाचरेत् ।
अशौचवत्प्रवेशेऽपि स्नानं चण्डालवत् स्मृतम् ॥५१॥

[शूद्रादिभिः सम्पादिते कर्मणि प्रायश्चित्तम्]

शूद्रपुल्कसचण्डालयवनाशौचिपापिनः ।
कर्मस्वधिकृता ज्ञानादज्ञानात्कामतोऽपि वा ॥५२॥

कुर्वीरन् यदि कर्माणि शोधयेन्मन्दिरं ततः ।
पुण्याहं वाचयेत् पश्चात् वेदान् विप्रैश्च घोषयेत् ॥५३॥

स्नापयेद्वासुदेवेन कुर्याद्ब्राह्मणभोजनम् ।

[मन्दिरे चाण्डालादिप्रवेशे प्रायश्चित्तम्]

चण्डालपुल्कसस्वानसृगालाशौचिगर्दभैः ॥५४॥

धामावरणभूभागे प्रविष्टे निष्कृतिं शृणु ।
प्रोक्षणं पञ्चगव्येन पुण्याहं वाचयेत्ततः ॥५५॥

स्पर्शे तत्रत्य बिम्बानां परिवारगणस्य वा ।
पीठानां वा यथापूर्वं कृत्वा कुर्याच्च निष्कृतिम् ॥५६॥

[खद्योतस्पर्शादौ प्रायश्चित्तम्]

खद्योतवर्षसंस्पर्शे यात्रायामथवाग्निना ।
कुर्वीत पुण्यस्नपनं दग्धश्चेत् सर्वथा ततः ॥५७॥

पुनर्निर्माय विधिवत् यथापूर्वं समाचरेत् ।
स्नापयेद्वासुदेवेन प्रतिष्ठान्ते जगत्पतिम् ॥५८॥

स्थापिते यागशालायां कलशेऽग्नौ प्रतिष्ठिते ।
चण्डालप्रतिलोमाद्यैरस्पृश्यैरितरैरपि ॥५९॥

स्पृष्टे त्यक्त्वापरं स्थाप्य मूलेनाष्टौ शताहुतीः ।
तत्तद्दैवतमन्त्राणि जपेदष्टोत्तरं शतम् ॥६०॥

---

५१. c: A. आशौच for अशौच°

५३. a: A. कार्य्याणि for कर्माणि;

५७ d: M. दग्ध्यं T. दग्धं for दग्धः;

५८. a: M. निर्मीय for निर्माय;

६०. c: A. मन्त्रेण for मन्त्राणि;

स्नपने वापि यात्रायां पतिते कौतुके भुवि ।
पुनः संस्थाप्य तद्बिम्बं पुण्यस्नपनमाचरेत् ॥६१॥

मण्डूकमूषिकाद्यैस्तु सर्वैर्मार्जारकादिभिः ।

[चाण्डालादिभिःकलशादिस्पर्शे प्रायश्चित्तम्]

स्थापिते कलशे स्पृष्टे नष्टे वा तं परित्यजेत् ॥६२॥

कुंभान्तरं तु संस्थाप्य तत्तदावाहनं चरेत् ।
तद्दैवत्यान् जपेन्मन्त्रान् ध्वजपूर्वे महोत्सवे ॥६३॥

स्खालित्यं यदि जायेत पुष्पयागेन शाम्यति ।
हीननित्योत्सवे धाम्नि कार्यं न ध्वजपूर्वकम् ॥६४॥

उत्सवं कारयेद्धीमान् कृते तन्निष्कृतये पुनः ।
स्नानेन पारमेष्ठचेन प्रीणयेत्परमेश्वरम् ॥६५॥

[स्नपनादौ बिम्बपतने प्रायश्चित्तम्]

महोत्सवे वर्तमाने ध्वजे केनापि हेतुना ।
नष्टे ध्वजान्तरं कृत्वा भोजयेद्ब्राह्मणान् बहून् ॥६६॥

ध्वजे तु पतिते भूमौ हेतुना येन केन वा ।
पुनरारोप्य तं पश्चात् विप्रेभ्यो भूरिभोजनम् ॥६७॥

भङ्गच्छिद्रादिविषये वर्णलोपादिसंभवे ।
संधाय च यथायोगं संप्रोक्ष्य विधिपूर्वकम् ॥६८॥

पुनरारोप्य तच्छान्त्यै ब्राह्मणेभ्योऽन्नतर्पणम् ।
चण्डालादिप्रवेशेन यथाकुंभान्तरं भवेत् ॥६९॥

[चाण्डालादिभिः पालिकादिस्पर्शे प्रायश्चित्तम्]

तथैव पालिकादीनां मृण्मयानां भवेद्ध्रुवम् ।
अङ्कुराण्यर्पयेद्भूयः तच्छान्त्यै विप्रभोजनम् ॥७०॥

---

६३. c: M. T. देवतान् for दैवत्यान्;

६४. d: M. T. काम्यं for कार्यम्;

६५. b: M. निष्क्रिये for निष्कृतये;

६८. a: T. वर्ण for भङ्ग°;

[अङ्कुरे अप्राशस्त्यादौ प्रायश्चित्तम्]

अङ्कुरेष्वप्रशस्तेषु मूषिका पशुवाजिभिः ।
भक्षितेष्वपि तच्छात्यं वल्मीकादिसमुद्भवे ॥७१॥

शान्तिहोमो व्याहृतिभिः ब्राह्मणानां च भोजनम् ।

[ग्रामादिरहिते मन्दिरे परिक्रमणविधिः]

ग्रामादिरहिते धाम्नि धामन्येव परिक्रमः ॥७२॥

[महोत्सवे वर्षादिभिः शैथिल्ये प्रायश्चित्तम्]

महोत्सवे वर्तमाने वर्षवातानलादिभिः ।
ग्रामादौ शिथिले पश्चात् प्रायश्चित्तं पुनर्महः ॥७३॥

प्राजापत्यविधानेन स्नपनं निष्कृतिर्भवेत् ।

[उत्सवे विघ्ने संजाते सति प्रायश्चित्तम्]

उत्सवे दैवयोगेन विघ्निते मानुषेण वा ॥७४॥

बलिमेव क्षिपेद्धाम्नि ग्रामे वीथ्यां चतुर्दिशम् ।
नष्टकर्माण्यशेषाणि पुनः कृत्वा यथापुरम् ॥७५॥

कर्तव्यमखिलं पश्चात् कुर्याद्विध्युक्तवर्त्मना ।
बलिप्रदानेऽप्यकृते अतिक्रान्तं पुराचरेत् ॥७६॥

अन्यद्यथावत् कर्तव्यं महावाताद्युपद्रवे ।
चण्डप्रचण्डयोरेव भूतेभ्यश्च तदन्तरे ॥७७॥

[तीर्थयात्राहीने उत्सवे प्रायश्चित्तम्]

हीनायां तीर्थयात्रायां स्नपनं वासुदेवजम् ।

[उत्सवबिम्बचौर्यादौ विधिः प्रायश्चित्तञ्च]

नष्टे चोरादिभिर्बिम्बे कुर्यात्कर्मार्चया महः ॥७८॥

---

७२. d: M. धाम्नि for धामनि;

७३. b: T. पात for वात;

७६. b: A. वा for विध्यु°;
c: M. प्रकृते for प्यकृते;

७८. c: A. नले for नष्टे;

बिम्बे तु पतिते वीथ्यां यानमारोप्य तत्पुनः ।
वोथीपरिक्रमं कृत्वा प्राजापत्यमथाचरेत् ॥७९॥

पतनेनाङ्गहीनं चेत् कुर्यात् कर्मार्चया महः ।
सन्धाय विधिवत् सर्वमन्यत् कार्यं विचक्षणैः ॥८०॥

यानभङ्गे नयेद्देवं यानेनान्येन केनचित् ।

[कर्माधिकृतजने विघ्निते विधिः]

कर्मण्यधिकृता ये च प्रतिष्ठायाः सवस्य वा ॥८१॥

दैवाद्वा मानुषाद्यद्वा विघ्निता यदि कारणात् ।
तां क्रियां पूरयेदन्यैः सदृशैरधिकारिभिः ॥८२॥

[पवित्रादिन्यूनाधिक्ये पायश्चित्तम्]

पवित्रभूषणानां वा कुण्डानां मण्डलस्य वा ।
न्यूनातिरेकशान्त्यर्थमस्त्रमन्त्रं शतं जपेत् ॥८३॥

[जलाधिवासहीनप्रतिष्ठायां प्रायश्चित्तम्]

जलाधिवासरहितं प्रतिष्ठा कारिता यदि ।
स्नपनं पारमेष्ठ्येन 'मूलमन्त्रं' शतं जपेत् ॥८४॥

[क्लेशवासावध्यतिक्रान्ते प्रायश्चित्तम्]

मासादूर्ध्वं द्वादशाब्दादर्वाक्क्लेशं सहेद्धरिः ।
अत ऊर्ध्वं क्लेशवासं वासुदेवो न मन्यते ॥८५॥

क्लेशावधावतिक्रान्ते कुर्यात् बालालयान्तरम् ।
प्रायश्चित्तं वासुदेवं स्नपनं परिकल्पयेत् ॥८६॥

---

८०. a: A. हाने for हीनं;
c: M. कार्यम् for सर्वम्;
d: T. सर्वम् for कार्यम्;

८३. d: T. अस्त्रमस्त्रम् for अस्त्रमन्त्रम्;

८४. a: b: c: om T;

८६. a: M. T. °वीतिकृते for °वतिक्रान्ते;

[सिद्धान्तानां परस्परसांकर्ये प्रायश्चित्तम्]

सिद्धान्तानां तु सर्वेषां संकरो जायते यदि ।
परस्परं वा तन्त्राणां पारमेष्ठ्यं तु निष्कृतिः ॥८७॥

[मन्त्रसिद्धान्तस्वरूपम्]

परिवारयुता वापि विना वा तैः समर्च्यते ।
मन्त्रसिद्धान्तमित्युक्तं मूर्तिरेकैव नान्यथा ॥८८॥

[आगमसिद्धान्तस्वरूपम्]

वासुदेवादयो व्यूहाः परिवारविवर्जिताः ।
चत्वारो यत्र पूज्यन्ते सिद्धान्तं स्यात्तदागमम् ॥८९॥

[तन्त्रसिद्धान्तस्वरूपम्]

वासुदेवादिभिः सार्धं नारायणहयाननौ ।
विष्णुश्च नरसिंहश्च मूर्तयो नव सूकरः ॥९०॥

पूज्यन्ते परिवारैश्च सिद्धान्तं तन्त्रसंज्ञितम् ।

[तन्त्रान्तरसिद्धान्तस्वरूपम्]

नृसिंहकपिलक्रोडहंसवागीश्वरादयः ॥९१॥

वक्तृभेदेन पूज्यन्ते द्वित्र्यादिवदनास्तथा ।
एकैव मूर्तिस्तत्रापि परिवारैर्विनापि वा ॥९२॥

तत्तन्त्रान्तरमुद्दिष्टं तन्त्रमेतच्चतुर्विधम् ।

[सिद्धान्तादीनां परस्परसांकर्यनिषेधः]

सिद्धान्तानां च तन्त्राणां साङ्कर्यं व्यसनाय तत् ॥९३॥

---

९०. d: M. T. यत्रतत् for सूकरः;

९१. b: M. संज्ञिकम् for संज्ञितम्;

९२. a: M. वक्त्र for वक्तृ;

९३. b: T. चतुष्टयम् for चतुर्विधम्;
c: T. वा, M. वापि for च;

तस्मादसंकरेणैव पूजयेत्परमेश्वरम् ।

[तन्त्रचतुष्टयं सांकर्यदोषः एकत्रैकस्यैव ग्राह्यत्वञ्च]

वैखानसं पाञ्चरात्रं भार्गवं शैवमित्यपि ॥९४॥

तन्त्राण्यमूनि चत्वारि प्रशस्तान्यर्चनाविधौ ।
असंकरेण देवेशमर्चयेत्पुरुषोत्तमम् ॥९५॥

साङ्कर्यं यदि जायेत प्रतिष्ठोत्सवकर्मसु ।
पूजायां स्नपनादौ वा राजराष्ट्रक्षयो महान् ॥९६॥

तस्मादसंकरेणैव तथैवान्याधिकारिणाम् ।
अस्पर्शनेन कुर्वीत कर्मजालं यथाविधि ॥९७॥

कर्षणादिप्रतिष्ठान्ता क्रिया येन पुरातनी ।
तेनैव पुनरुद्धारे नान्यथा परिकल्पयेत् ॥९८॥

सा मूर्तिस्तच्च तन्त्रं च स एव स्थापकः पुनः ।
पुनः प्रकल्पनेनैव क्रियाजालविपर्ययः ॥९९॥

[अज्ञाताधिकारिजीर्णमन्दिरादौ विधिः]

लुप्ते पुरातने धाम्नि प्रतिमा वा पुरातनी ।
न ज्ञायते चाधिकारी पुनः सृष्टिर्यथेच्छया ॥१००॥

[ज्ञाताधिकारिमन्दिरादौ पूजालोपादौ विधिः]

अधिकारी परिज्ञातः अजीर्णं ध्रुवकौतुकम् ।
मन्दिरं च मनोहारि पूजालोपश्चिरादभूत् ॥१०१॥

पूर्वतन्त्रानुरोधेन भूयस्तेनाधिकारिणा ।
कुर्वीत सकलं कर्म राष्ट्रक्षोभो विपर्यये ॥१०२॥

[तन्त्रान्तरानुसारं भगवतः आराधनावसरः]

क्लेशवासं गते देवे ग्रामे वा पत्तनेऽपि वा ।
आमूलकर्मनिर्वृत्तिर्न कुर्यात्तत्र मङ्गलम् ॥१०३॥

---

९८. a: T. अर्पण for कर्षण;

१००. a: A. M. सर्वात्मना for पुरातने;
c: A. ऽधिकारीच for चाधिकारी;

१०२. d: M. T. क्रोध for क्षोभ;

१०३. c: A. धाम for कर्म

किं पूनर्देवदेवस्य पूजावैकल्यसंभवे ।
तस्मात् सर्वात्मना तीव्रं संप्रोक्ष्याथ समर्चयेत् ॥१०४॥

हेतुना येन केनापि पूजालोपे तु शार्ङ्गिणः ।
तन्त्राधिकार्यलाभश्चेत् यजमानेच्छयार्चनम् ॥१०५॥

[भगवदाराधनादौ सिद्धान्तादीनां व्यतिक्रमनिषेधः]

वैकल्यशान्तिं कृत्वाथ संप्रोक्ष्य विधिवत्प्रभुः ।
तन्त्रान्तरेण यजनं ततः प्रीतो भवेद्धरिः ॥१०६॥

सिद्धान्ते वाऽथवा तन्त्रे शास्त्रे वा न व्यतिक्रमः ।
कार्योऽनापदि शास्त्रज्ञैः भूतिकामैर्विशेषतः ॥१०७॥

[गृहार्चाक्रमे पूजालोपे प्रायश्चित्तम्]

पूजालोपे गृहार्चायाः पञ्चगव्याभिषेचनम् ।
मासादुपरि षण्मासं पुण्यस्नपनमाचरेत् ॥१०८॥

षण्मासाद्वत्सरादर्वाक् संप्रोक्षणविधिर्भवेत् ।
अत ऊर्ध्वं प्रतिष्ठा स्याद्गृहार्चाराधनक्षये ॥१०९॥

त्रिदशादिप्रतिष्ठायां पूजावैकल्यसंभवे ।
केवलं पौरुषैः सूक्तैः स्नपनं नान्यदिष्यते ॥११०॥

[सालग्रामशिलापूजावैकल्यादौ प्रायश्चित्तम्]

सालग्रामशिलादीनां पूजावैकल्यसंभवे ।
अस्पृश्य स्पर्शने वापि क्षालयित्वार्चयेज्जलैः ॥१११॥

॥ इति भार्गवतन्त्रे द्वाविंशोऽध्यायः ॥

———

१०५. b: M. T. पूजालुप्तस्य for पूजालोपे तु;

त्रयोविंशोऽध्यायः

[सम्प्रोक्षणनिरूपणाध्यायः]

[सर्वत्र प्रायश्चित्तेषु सामान्यकृत्यानि]

श्रीरामः

प्रायश्चित्तानि सर्वाणि कथितानि महामुने ।
तेषु सर्वेषु कुर्वीत साङ्कुरं कौतुकं पुरा ॥१॥

अधिवासश्च कर्तव्यः प्रतिष्ठायां यथेरितः ।
अपरेद्युर्भवेत् प्रातः कलशस्थापनक्रमः ॥२॥

ब्राह्मवैष्णवपुण्यानां विनान्यत्रापराजितम् ।
प्रायश्चित्ते द्रव्यकुंभस्थापने सोदकं भवेत् ॥३॥

मध्ये न्यसेद्द्रव्यकुंभं परितः शुद्धवारि च ।
मौक्तिकं रजतं वापि तेषु न्यस्याम्बुपूरणम् ॥४॥

आवाह्य देवमभ्यर्च्य प्रतिष्ठाप्य हुताशनम् ।
हुत्वा यथाविधि गुरुः पूर्णाहुत्यवसानिकम् ॥५॥

स्नापयित्वाथ जप्त्वा च भोजयित्वा द्विजोत्तमान् ।
गुरुमभ्यर्च्य नत्वा च दत्त्वा तस्मै च दक्षिणाम् ॥६॥

ऋत्विग्भ्यः सहकारिभ्यो ब्राह्मणेभ्यश्च दक्षिणाम् ।
वितीर्य देवं निनयेत् मन्दिरान्तर्भुवं गुरुः ॥७॥

[सम्प्राक्षणावसरः]

शृणु वक्ष्येऽधुना ब्रह्मन् संप्रोक्षणविधिं क्रमात् ।
अङ्गभङ्गादिसन्धाने धाम्नो वा कौतुकस्य वा ॥८॥

चिराय पूजालोपे वा भूगुप्ते मरणेऽपि या ।
जनने मैथुने धाम्नि शिल्पिस्पृष्टेऽपि कौतुके ॥९॥

---

२. b: A. यथेरितम् for यथेरितः;

एवमादिषु चान्येषु सम्प्रोक्षणमुदाहृतम् ।

[सम्प्रोक्षणसन्नाहः]

पुण्याहं वाचयेत्पूर्वं 'विष्णोर्नुकमि'ति ब्रुवन् ।।१०।।

प्रोक्षयेद्धामबिम्बादीन् अब्लिङ्गैः क्षालयेदपि ।
अङ्कुराण्यर्पयेत्पश्चात् बध्वा प्रतिसरं ततः ।।११।।

कर्माङ्गस्नपनं कुर्यात् वैष्णवेनैव वर्त्मना ।
शाययेच्छयने देवं प्रतिष्ठायामिवात्मवान् ।।१२।।

द्वारतोरणकुंभादीन् यथापूर्वं समर्चयेत् ।
वेदिकायां धान्यपीठे महाकुंभं निवेशयेत् ।।१३।।

सूत्रवेष्टितसर्वाङ्गं सरत्नं प्रतिमान्वितम् ।
कूर्चापिधानपत्राढ्यं वस्त्रयुग्मसमन्वितम् ।।१४।।

तस्यैव दक्षिणे पार्श्वे तादृशं करकं न्यसेत् ।
वासुदेवं महाकुंभे करके च सुदर्शनम् ।।१५।।

आवाह्याथ यथान्यायं नैवेद्यान्तं समर्चयेत् ।

[सम्प्रोक्षणाङ्गहोमविधिः प्रोक्षणप्रकारश्च]

अग्निं संसाध्य विधिवत् तत्रावाह्य जगत्प्रभुम् ।।१६।।

समिद्भिराज्यैश्चरुभिस्तिलैश्चापि पृथक् पृथक् ।
अष्टोत्तरशतं हुत्वा शान्तिहोमं यथापुरम् ।।१७।।

पूर्णाहुतिं ततो हुत्वा समुद्वास्यानलस्थितम् ।
अन्यांश्च देवानुद्वास्य देवमन्तर्निवेशयेत् ।।१८।।

महाकुंभजलेनैव प्रोक्षयेत्पुरुषोत्तमम् ।
कूर्चेन पञ्चोपनिषदैरब्लिङ्गैरितरैरपि ।।१९।।

---

१३. d: A. होम for महा;

१४. c: T. विधान for पिधान;
d: T: समञ्चितम् for समन्वितम्;

१६. a: M. धान्यायं for यथान्यायम्;
b: M समाचरेत् for समर्चयेत्;

शान्तिमन्त्राणि समये पठेयुर्ब्राह्मणोत्तमाः ।
एवं सम्प्रोक्ष्य देवेशं यथापूर्वं समर्चयेत् ॥२०॥

[ब्राह्मणादिसम्माननं दक्षिणाप्रदानं च]

ब्राह्मणान् भोजयेद्भक्त्या देया ताम्बूलदक्षिणा ।
आचार्यदक्षिणां दद्यात् शतनिष्कं ततोऽधिकम् ॥२१॥

॥ इति भार्गवतन्त्रे त्रयोविंशोऽध्यायः ॥

———

चतुर्विंशोऽध्यायः

[अष्टाक्षरमन्त्रनिरूपणाध्यायः]

[रामस्य माहात्म्यकीर्तनं कार्तज्ञ्यज्ञापनञ्च]

अगस्त्यः

भगवन् सर्वलोकेश सर्वर्षिगणसेवित ।
त्वमेव भगवान् विष्णुस्त्वं ब्रह्मा त्वं महेश्वरः ॥१॥

त्वमादित्यस्त्वमग्निश्च चन्द्रमास्त्वं पुरन्दरः ।
वायुस्त्वं सर्वभूतात्मा नागराजोऽसि वासुकिः ॥२॥

अनन्तः फणिनामिन्द्रः स्रष्टा त्वं सर्वदेहिनाम् ।
अन्तश्चरसि भूतानामादिमध्यान्तवर्जितः ॥३॥

पुरुषस्त्वं परं ब्रह्म जगद्बीजं सनातनम् ।
त्वां विना नैव पश्यामि परात्परतरं प्रभुम् ॥४॥

कल्पान्ते सागरे क्षुब्धे संहृत्य निखिलं जगत् ।
कुक्षौ वहसि देवेश शेषत्वं शेषमण्डले ॥५॥

त्वं यासि पक्षिराजेन श्रियं वहसि वक्षसि ।
शेषं सर्वं जगदिदं शेषी त्वं परमेश्वर ॥६॥

त्वयाद्यानुगृहीतोऽस्मि कटाक्षाभ्यां विलोकितः ।
पूतोऽस्मि पुरुषेशान पुण्यलोकेऽस्मि कश्चन ॥७॥

कृत्स्नस्य पञ्चरात्रस्य सारमग्राहिषं प्रभो ।

[अष्टाक्षरमन्त्राधिकारित्वविषये जिज्ञासा]

कृपया ते दयासिन्धो शुश्रूषा काचिदस्ति मे ॥८॥

---

२. d: A. अपि for असि;

५. d: T. शेवे त्वं for शेषत्वं ;

तदप्यद्योपदेष्टव्यं रहस्यमपि दुर्लभम् ।
अष्टाक्षराख्यमन्त्रस्य अधिकारी च तज्जपे ॥९॥

[अष्टाक्षरमन्त्राधिकारिलक्षणम्]

श्रीरामः

सम्यक् पृष्टं मुनिश्रेष्ठ सर्वस्वं सङ्ग्रहेण ते ।
उपदेक्ष्यामि तन्मन्त्रमधिकारी प्रपञ्च्यते ॥१०॥

आत्मानं मन्यते शेषं शेषिणं परमेश्वरम् ।
अनुकम्पास्य भूतेषु तैरप्येषोऽनुकम्प्यते ॥११॥

निरीहः सर्वकार्येषु सोऽहमस्मिञ्जगत्रयम् ।
मृत्युमप्यात्मनो मित्रं मन्यतेऽस्माद्बिभेति सः ॥१२॥

क्षुधितो वा न तृषितः चिन्तयानः सदा हरिम् ।
वर्षं वातं च भानुं च सहजं मन्यते समम् ॥१३॥

कृच्छ्रेष्वप्यतिसंतुष्टो विनीतः क्षेमवृद्धिषु ।
वनितासु भवेत् षण्डः जन्मान्धो दोषदर्शने ॥१४॥

परदोषप्रवचने मूको निन्दाप्रशंसने ।
बधिरो वेदबिद्गोष्ठ्याम् आनन्दाश्रुपरिप्लुतः ॥१५॥

किङ्करो हरिभक्तानां हरिसेवैकमानसः ।
अधिकारी भवेदेषः ग्रहीतुं मनुमीदृशम् ॥१६॥

[शुद्धमिश्रयोः सामान्यभेदः]

शुद्धो मिश्र इति द्वेधीं भजेत स मुनीश्वरः ।
आद्यमेकायनं वेदं ब्रह्मैकप्रतिपादकम् ॥१७॥

तेनैव संस्कृतः शुद्धः मिश्रस्त्रैय्या प्रकीर्तितः ।
अष्टाक्षरस्त्रैविद्यानां शुद्धानां द्वादशाक्षरी ॥१८॥

---

१०. d: M. प्रपञ्चते for प्रपञ्च्यते;
११. d: M. °कम्पते for °कम्प्यते;
१७. c: T. अधिकारे for अधिकारी;
१८. b: A. भजते for भजेत;
१९. b: A. त्रैधा for त्रैय्या;

[शुद्धवैष्णवानां लक्षणमाचारश्च]

बलादिमन्त्रैरच्छिद्रं पञ्चकालप्रवर्तनम् ।
एकाध्वना निषेकादिसंस्कारश्च बलादिभिः ॥१९॥

द्वादशाक्षरविद्यैव तेषां विद्या न च त्रयी ।
न सावित्री न मन्त्रोऽन्यः स्वाध्यायजपकर्मणोः ॥२०॥

मूलेषु निस्पृहाः सर्वे 'द्वादशाक्षर'चिन्तकाः ।
शावसूतकहीनास्ते केवलं मोक्षकामिनः ॥२१॥

कर्षणादिक्रियास्वेते कल्प्यन्ते नाधिकारिणः ।
अज्ञानाद्यदि ताः कुर्युश्च्यवन्ते नात्र शंसयः ॥२२॥

मन्त्रसिद्धान्तनिष्ठेन दीक्षितेन प्रतिष्ठितम् ।
पूजार्थमात्मनो बिम्बं प्रतिगृह्य समर्चयेत् ॥२३॥

बीजशक्त्यङ्गरहितं 'द्वादशाक्षर'विद्यया ।
कृत्वा प्रतिष्ठां तद्बिम्बं दापयन्मूलशाखिने ॥२४॥

न दीक्षा नैव देहस्य दहनादिविशोधनम् ।
नाङ्गन्यासादिसकलं नेष्टमेकायनेऽध्वनि ॥२५॥

एकायनप्रविष्टानां त्रैविद्यानामपीदृशः ।
बीजशक्त्यङ्गरहितम् ऋषिच्छन्दो विवर्जितम् ॥२६॥

स्वरूपमेव मन्त्रस्य जपः स्वाध्यायकर्मणोः ।

[दीक्षया योग्यतोत्पादनं मुख्या दीक्षा च]

दीक्षया जायते योग्यः त्रैविद्यः देवपूजने ॥२७॥

चक्राब्जमण्डले दीक्षा तस्य मुख्या प्रकीर्तिता ।
अनुकल्पा भवेद्दीक्षा केवलं वह्निसन्निधौ ॥२८॥

दीक्षितो देवदेवस्य कर्षणादिक्रियां चरेत् ।
नाधिकारी भवेद्यस्तु दीक्षाविरहितो द्विजः ॥२९॥

---

२६. c: A. °न्यासानि for °न्यासादि;
२७. a: A. एकायनम् for एकायन;

तस्माद्धर्यर्चनाकाङ्क्षी दीक्षेत हरिसन्निधौ ।
कुंभे च मण्डले चाग्नौ हरिमावाह्य पूजयेत् ॥३१॥

मायासूत्रं च निर्भिद्य पूतो भवति मानवः ।
नेत्रबन्धाद्विनिर्मुक्तो दृष्ट्वा चक्राब्जमण्डलम् ॥३२॥

विकीर्णस्वर्णकुसुमो लब्धपुण्ड्राह्वयो गुरोः ।
अधीत्य सकलान् मन्त्रान् अष्टाक्षरपुरस्सरान् ॥३३॥

विद्यां हर्यर्चनमयीम् अभिषिक्तो घटोदकैः ।
अर्हत्यर्चयितुं विष्णुं प्रतिष्ठातुं यथाविधि ॥३४॥

महोत्सवादिकं कर्तुं नित्यनैमित्तिकादिकम् ।
एषा मुख्या भवेद्दीक्षा जघन्या वक्ष्यते शृणु ॥३५॥

[जघन्यायाः दीक्षायाः स्वरूपम्]

स्थण्डिलं प्रतिमां विष्णोः कुंभमर्चिश्च पूजयेत् ।
अथवा तु यथालाभं केवलं वा हुताशनम् ॥३६॥

जुहुयाद्धेतिराजेन बाहुमूले समङ्कितः ।
पाञ्चजन्येन वा साकं ततो नामादिपूर्ववत् ॥३७॥

लब्ध्वा गुरोर्यथाशास्त्रं भूयादेषोऽर्चनाविधौ ।
नित्ये नैमित्तिके काम्ये कर्षणादिषु कर्मसु ॥३८॥

एषा दीक्षा द्वितीया स्यात् पञ्चसंस्कारलक्षणा ।
इमेऽधिकारिणः प्रोक्ताः वासुदेवार्चनाविधौ ॥३९॥

एते ह्यष्टाक्षरान् जप्तुम् इतरान् अपि वा मनून् ।
नान्येऽधिकारिणस्तेषां कीर्तने स्मरणेऽपि वा ॥४०॥

---

३३. a: T. विकीर्णम्, for विकीर्ण;
b: M. पुण्ड्रांश्च यो for पुण्ड्राह्वयो;
३५. c: M. एष for एषा;
३६. b: M. अग्नि for अर्चिः;
c. A. °त्र for तु;
c: T. लोभम् for लाभम्;
३७. c: A. व्यातं for साकम्;
३८. b: A. मन्त्रदोष for भूयादेषो;

[अष्टाक्षरमन्त्रोद्धारप्रकारः]

अष्टाक्षरमनुं वक्ष्ये सावधानमनाः शृणु ।
आदौ तु छन्दसामादिर्विघ्नेशस्तदनन्तरम् ॥४१॥

ओतदेहेन जीवात्मा तृतीयो वर्ण ईरितः ।
विष्णुना सह विघ्नेशः चतुर्थः कलशोद्भव ॥४२॥

विष्णुं बिभ्रन् महाज्वालः पञ्चमो मारुतस्ततः ।
स विष्णुः सुमुखः षष्ठादनन्तर उदीरितः ॥४३॥

अवसाने मरुद्भाति प्राणो भूतभृतां सदा ।
एष तेऽष्टक्षरो मन्त्रो यथावदुदितो मया ॥४४॥

[अष्टाक्षरमन्त्रस्य ऋष्यादिनिर्देशः]

ऋषिर्नारायणो देवो देवता चास्य कीर्तितौ ।
छन्दस्तु देवी गायत्री बीजं विष्णुः सबिन्दुकः ॥४५॥

त्रिभिः पदैश्च भूयोऽपि षडङ्गानि महामुने ।
समस्ते कथितो भावः व्यस्ते वक्ष्यामि तच्छृणु ॥४६॥

भरद्वाजः कौशिकश्च जमदग्निरुदीरितः ।
वसिष्ठः कस्यपश्चात्रिरगस्त्यः ऋषयः क्रमात् ॥४७॥

द्वितीयाद्यास्तारकस्य परमेष्ठी ऋषिर्भवेत् ।
छन्दांसि प्रणवादीनां गायत्र्यादीनि चाञ्चले ॥४८॥

विराट् च देवता वच्मि क्रमादेषां धरो ध्रुवः ।
सोम आपस्तथाऽग्निश्च षष्ठो वरुण ईरितः ॥४९॥

प्रत्यूहश्च प्रभातश्च देवा अष्टौ यथाक्रमम् ।
नाभ्यादिहृदयान्तेषु न्यसनीयाश्च भूमिषु ॥५०॥

---

४३. a: M. नहाज्वाल for महाज्वालः;

४४. a: T. सदा for मरुत्;
b: A. भृता for भृताम्; M. मरुत् for सदा;

४६. a: T. M. पञ्चै for पदैः;

[अष्टाक्षरमन्त्रजपात् पूर्वं ध्येयं भगवत्स्वरूपम्]

चतुर्भुजमुदाराङ्गं शंखचक्रधरं विभुम् ।
कालमेघप्रतीकाशं पद्मपत्रनिभेक्षणम् ॥५१॥

किरीटहारकेयूरकाञ्चीकटकमण्डितम् ।
श्रीवत्सकौस्तुभोरस्कं कुण्डलाङ्गुलिभूषणम् ॥५२॥

पीताम्बरेण संवीतं यज्ञसूत्रोपशोभितम् ।
ललाटे चोर्ध्वतिलकं श्वेतया मृदुमृत्स्नया ॥५३॥

श्रिया भूम्या च सततं वालव्यजनवीजितम् ।
प्रफुल्लवारिजमुख मेघगम्भीरनिःस्वनम् ॥५४॥

एवं ध्यात्वा जपेन्मन्त्रं चतुर्वर्गफलप्रदम् ।

[अष्टाक्षमन्त्रोपयोगः तस्य फलश्रुतिश्च]

अनेन सकलाः देवाः साध्याः सन्ति न संशयः ॥५५॥

कुर्यादनेन मन्त्रेण प्राणायामं द्विजोत्तमः ।
सर्वपापविनिर्मुक्तो महायोगी भवेद्ध्रुवम् ॥५६॥

अङ्गानिवेदाश्चत्वारः शास्त्राणि विविधान्यपि ।
सर्वमष्टाक्षरे मन्त्रे स्वयमेव प्रतिष्ठितम् ॥५७॥

एतज्जपन् सदा ध्यायन् सर्वपापात् प्रमुच्यते ।
किमन्यैर्बहुभिर्मन्त्रैः सर्वमेतेन सिध्यति ॥५८॥

॥ इति भार्गवतन्त्रे चतुर्विंशोऽध्यायः ॥

---

५१. d: M. निभेषक्षम् for निभेक्षणम्;

५६. b: A. M. प्रणायामान् for प्राणायामम्;

पञ्चविंशोऽध्यायः

[पञ्चकालप्रक्रियानिरूपणाध्यायः]

[वैष्णवानां कृते पञ्चकालपरत्वनिर्देशः]

श्रीरामः

त्रैविद्यो दीक्षितस्त्वेवं जपध्यानपरायणः ।
हरिन्यस्तमना भूत्वा पञ्चकालपरो भवेत् ॥१॥

[पञ्चकालविभागक्रमः]

प्रातः कुर्यादधि(भि ?)गममुपादद्यात्ततः परम् ।
इज्यां कुर्वीत तदनु स्वाध्यायनिरतस्ततः ॥२॥

योगेन गमयेदन्ते एवं कालं नयेद्द्विजः ।

[अधिगमनादिविधीनां संक्षिप्तवर्णनम्]

प्रातरुत्थाय शयनाद्धरेर्नामानि कीर्तयेत् ॥३॥

शोधयित्वा ततो देहं दन्तधावनपूर्वकम् ।
अवगाह्याप्सु नद्यादे'रघमर्षणमु'च्चरन् ॥४॥

वासोभ्यामथ संवीतश्चन्दनेन मृदापि वा ।
ऊर्ध्वपुण्ड्रं वहेत् काले दद्यादर्घ्यं विवस्वते ॥५॥

सावित्र्या त्रिःपरिक्रम्य तर्पयित्वाथ देवताः ।
प्राणानायम्य सङ्कल्प्य जपेदासूर्यमण्डलम् ॥६॥

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
उपस्थाय रविं दृष्ट्वा कर्मशेषं समाप्य च ॥७॥

अग्नौ च हुत्वा देवेशं प्रणम्यापीठमस्तकम् ।
आलोक्य त्रिःपरिक्रम्य पुत्रदारादिभिः सह ॥८॥

---

१. a: M. त्वंवम् A. चैवम् for त्वेवम्;

२. a: A. अधिगरम् for अधिगमम्;

सम्भार्यानपि सम्भारान् सम्भार्याराधनात्मकान् ।
स्नात्वाराध्य जगन्नाथं यतीनप्यतिथीनपि ॥९॥

तोषयित्वाथ भुञ्जीत गुरुशेषं हविः स्वयम् ।
ततो ऋगादीन् शास्त्रान् वा पठेद्वा पाठयेदपि ॥१०॥

[योगप्रक्रियानिर्देशः]

स्नात्वा साध्यं समाप्याघ्यं जप्त्वाग्निं परिचर्य च ।
प्रणम्य देवदेवेशं पुण्डरीकाक्षविद्यया ॥११॥

स्तुत्वा भुक्त्वा च युञ्जीत स्वात्मानं ध्यानकर्मणि ।
प्राणायामपरो भूयात् 'मूलमन्त्रे'ण तत्त्ववित् ॥१२॥

नाडीमिडां पिङ्गलां च शोधयेच्च गतागतैः ।
तत्र तत्र च योगेन कारयेद्वायुधारणम् ॥१३॥

पृथिवीमप्सु तां वह्नौ तं वायावम्बरे च तम् ।
तं जीवे तं परे ब्रह्मण्यमले विनिवेशयेत् ॥१४॥

रात्रौ निशीथे विमले स्नात्वा तीर्थेऽन्वहं सुधीः ।
आसने सम्यगासीनः विविक्तेऽमलमानसः ॥१५॥

एवं ध्यायेत् परं ब्रह्म योगकर्मणि दीक्षितः ।
हृत्पुण्डरीकमध्यस्थं चैतन्यं ज्योतिरव्ययम् ॥१६॥

कदम्बमुकुलाकारं नित्यतृप्तं निरामयम् ।
अनन्तमानन्दमयं चिन्मयं भास्वरं विभुम् ॥१७॥

---

९. b: T. °नयनात्मवान्, M. °नघनात्मवान् for °राधनात्मकान्;

१०. b: A. गुरम् for गुरु°;
c: T. ऋगादि for ऋगादीन्;
d: T. पठेत् for पठेद्वा;

११. a: M. T. गृहीत्वा for समाप्य;

१४. a: T. तम् for ताम्;
c: T. तज्जीवे for तं जीवे;

१५. a: T. स्नात्वा for रात्रौ;
b: T. रात्रौ for स्नात्वा;

१७. d: T. भास्करम् for भास्वरम्;

निवातदीपसदृशमकृत्रिममणिप्रभम् ।
एवं ध्यायन्नयेत्कालं योगविद्याविशारदः ॥१८॥

[निद्रास्वीकारप्रकारः]

योगावसाने भूयोऽपि लयक्रमविपर्ययात् ।
जीवादिवसुमत्यन्तं सृष्ट्वा देवाय तर्पयेत् ॥१९॥

ततः शयीत खट्वायां सुवासिन्या विनापि वा ।
एवं दिनानि गमयन्नन्ते देवं हरिं व्रजेत् ॥२०॥

[निद्रास्वीकाराभावे विकल्पः अष्टाक्षरमंत्रजपफलश्च]

अथवा'ष्टाक्षरं मन्त्रं' यथाशक्ति जपेच्छुचिः ।
मुमुक्षुर्लभते मुक्तिं मुक्तिकामोऽतुलां श्रियम् ॥२१॥

आरोग्यं पुत्रसंपत्तिं धरणीं सस्यमालिनीम् ।
राजश्रीवस्यमतुलं राज्यलक्ष्मीं च शाश्वतीम् ॥२२॥

आयुश्च ज्ञानमतुलं प्रावण्यं सर्वकर्मसु ।
यद्यदिच्छन्ति जप्तारः सर्वं करतले भवेत् ॥२३॥

[अस्य शास्त्रस्य ग्रहणे अधिकारिणः]

शास्त्रमेतन्मुनिश्रेष्ठ सर्वगुह्यं सनातनम् ।
विष्णुभक्ताय दातव्यं जगतामुपकारिणे ॥२४॥

पुण्यकृद्भ्यः प्रदातव्यं भीरुभ्यः पापकर्मणः ।
न नास्तिकाय दातव्यं नाभक्ताय कदाचन ॥२५॥

गोपनीयमिदं शास्त्रं यदेतद्ब्रह्मसम्पुटम् ।

[अस्य शास्त्रस्याध्ययनफलश्रुतिः]

एतद्यः पठते भक्त्या तस्मिन् देवः प्रसीदति ॥२६॥

---

२२. c: T. स्त्री for श्री;
d: A. राज for राज्य°

२३. b: A. प्रावर्ण्यम् for प्रावण्यम्;

२५. b: A. M. om;
c: d: M. om;

तस्य मुक्तिः करतले स पापेभ्यः प्रमुच्यते ।
सुतार्थी सुतमाप्नोति स्त्रीकामः सुदतीं द्रुतम् ॥२७॥

आयुष्कामो दीर्घमायुः रुग्णो रोगाद्विमुच्यते ।
अतुलां श्रियमाप्नोति लक्ष्मीकामो न संशयः ॥२८॥

बहुनात्र किमुक्तेन लभते यद्यदीप्सितम् ।

[पाञ्चरात्रोपदेशानन्तरं रामस्यान्तर्ध्यानत्वम्]

एतद्रहस्यमुदितं प्रीतया त्वयि मुनीश्वर ॥२९॥

मुक्तस्त्वं किल्विषात्सर्वात् व्रज स्थानमिति ब्रुवन् ।
आलोकितश्च स मया परमेष्ठी जगत्प्रभुः ॥३०॥

पश्यतोऽन्तर्दधे देवो रामो रक्तान्तलोचनः ।
सरहस्यमिदं शास्त्रमग्रहीषं जगत्प्रभोः ॥३१॥

ओं नमो वासुदेवाय निर्मलानन्तशक्तये ।
पुण्याय पुरुहूताय पुरुषाय परात्मने ॥३२॥

[विष्णवाराधनफलकीर्तनं ग्रन्थोपसंहारश्च]

अगस्त्यः

अनेन विधिना यूयमर्चयध्वमधोक्षजम् ।
सर्वपापहरं देवं जगद्बीजं परात् परम् ॥३३॥

तत्परं तत्परं तीर्थं तत्तपो मङ्गलं बहु ।
तेन सर्वं करतले भवत्यत्र न संशयः ॥३४॥

यः पूजयति देवेशं वासुदेवं सनातनम् ।
किं तस्य बहुभिस्तीर्थैः किं यज्ञैः किं व्रतैरपि ॥३५॥

---

२७. d: A. दृढम् M. ध्रुवम् for द्रुतम्;
३१. a: A. T. पश्यन्तो for पश्यतो;
d: A. अग्रणीषु for अग्रहीषम्;
३२. b: M. शान्तये for. शक्तये;
३४. b: M. गुरुः T. वसु for बहु;

तत्सर्वं विष्णुयजनात् हस्तप्राप्तं भविष्यति ।
तस्मात् सर्वप्रयत्नेन वासुदेवं समर्चयेत् ॥३६॥

इति शास्त्रं महद्दिव्यं गृहीतं भार्गवान्मुनेः ।
उपादिशत्तपस्विभ्यः अगस्त्यो भगवान् ऋषिः ।

॥ इति भार्गवतन्त्रे पञ्चविंशोऽध्यायः ॥

———

परिशिष्टम्

परिशिष्टम्-१

भार्गवतन्त्रे प्रयुक्ताः वैदिकमन्त्राः

मन्त्राः	भार्गवतन्त्र-अ० श्लो०	वैदिकाकरः
अग्निर्मूर्धा	१४.४२;	ऋ.वे ८.४४.१६;
अग्निर्मे	१५.१७;	तै० ब्रा० ३.१०.८.४;
	१५.३३;	
अग्नेनय सुपथा राये	१७.६६;	ऋ.वे. १.१८९.१;
अघोरचक्षुषा	१४.३७;	ऋ.वे. १०.८५ ४४;
अतो देवा	६.६७;	ऋ.वे. १.२२ १६;
		सा० वे० १६७४;
अपराजित	२०.१०४;	आपस्तंब मंत्रपाठः १.१३.४;
अर्यमण	१४ ४०;	अ.वे. सं. १४.१.१७;
अश्वक्रान्त	६.५०;	तै० आ० १०.१.८;
		म० ना० उ०४.४;
असुनीते	७.६;	ऋ वे. १०.५९.६;
	९.७१;	
असुन्वन्ते	२०.१००;	ऋ.वे. १.१७६ ४;
आत्वाहार्षं	१०.१८;	ऋ.वे. १०.१७३.१;
आप्यायस्व	२०.६७;	ऋ वे. १.९१.१६;
आमागन	१४.२१;	अथर्व वे. १९.३१.७;
आयानश्चाग्ने	२०.१००;	मैत्रायणीं सं.१.४.३;
आशासान सौमनसम	१४.४४;	अथर्व वे. १४.१.४२;
इदं मे वरुण	६.७३; १४.११,१३;	ऋ.वे. १.२५ १९;
इदं विष्णु	६.६७,७०; ७.११; ८.४२; १२.१५; २१.४४;	ऋ.वे. १.२२.१७;
इदमहं तु	१४.३८;	शतपथ ब्रा० १४.९.४.५;
इन्द्रं नत्वा	२०.५०;	ऋ.वे. ६.४.७;
इरावतीं	१४.२४; १६.५३;	ऋ.वे. ७.९९.३;
उत्तिष्ठ	१२.१४; १६.९;	ऋ.वे. १.४०.१;
उद्दीप्यस्व	१६.५४;	तै० आ० १०.१.४;
उद्वयं तमसे	८.१४;	ऋ.वे. १.५०.१०;
ऋतं (च) सत्यम्	६.६४; १६.५०;	ऋ.वे. १०.१९०.१;

मन्त्राः	भार्गवतन्त्र-अ० श्लो०	वैदिकाकरः
(ओं) कल्पयत	१४.२९;	तै० ब्रा० १.१.१.४;
आमुत्सृजत	१४.२८;	तै० आ० ६.१२.१;
ओषधयः संवदन्ते	२०.६५;	ऋ वे. १०.९७.२२;
ओषधयस्त्वा	२०.६८;	तै० ब्रा० ३.७.७.८;
गन्धद्वार	१६.५२; २०.६९;	ऋ.वे. (खि) ५.८७.९;
गी (गि) र्वणा	१४.४३;	ऋ.वे ६ ४५.२०;
गौरसि (गौर्गौं रसि)	१४.२७;	ऋ.वे. ६.४५.२६;
घृतं मिमिक्षि	७.२३; २०.६९;	ऋ.वे. २ ३.११;
चित्रं देवानाम्	८.१९;	ऋ वे. १.११५.१;
जीवां रुदन्ति	१४.३९;	ऋ.वे. १०.४० १०;
तच्चक्षु	८.१९;	ऋ.वे ७.६६.१६;
तदस्य	६.६६; ९.१५;	ऋ.वे. १.१५४.५;
तद्विप्रास	१६.४९;	ऋ.वे. १.२२.२१;
तद्विष्णो	१६.४९; २०.६६;	ऋ.वे. १.२२.२०;
तमीशानम्	२०.१०१;	ऋ.वे. १.८९.५;
त्रातारम्	२०.६८;	ऋ वे. ६.४७.११;
त्रीणि पदा	१४.१९; १६.४८;	ऋ.वे. १.२२.१८;
त्र्यम्बक	१४.१४;	ऋ.वे. ७ ५९.१२;
दधिक्राव्णेति	२० ६७;	ऋ.वे. ४.३९.६;
दम्पती	१४.५५;	ऋ.वे. २.३९.२;
देवस्य त्वेति	१४.३४; १६ ५८;	तै. आ. ३.१०;
धूरसि	१६.५४;	वा. सं. १.८;
ध्रुवं ते	१४.३६;	ऋ वे. १०.१७३.५;
ध्रुवा द्यौः	६.६६; १०.१८;	ऋ.वे. १०.१७३.४;
सो अस्य	६.६६;	ऋ.वे. १०.९३.३;
न ते विष्णो	२०.६७;	ऋ.वे. ७.९९.२;
परित्वा	१४.४३;	ऋ.वे. १.१०.१२;
परिव्राज	७.१२; ९.३७;	ऋ.वे. ४.१५.३;
प्रतद्विष्णु	६.६६;	ऋ.वे. १.१५४.२;
प्रविष्णु	६.६६;	ऋ.वे. ७.१००.३;
ब्रह्मजज्ञानम्	२०.१००;	अथ०वे. ४.१.१;
भूतं सेति (भूतमसीति ?)	१४.२९;	शां.श्री. सू. ८.२१.३;
मधुनक्तम्	२०.६५;	ऋ.वे. १.९०.७;
मधुमान्नो वनस्पति	२०.६५;	ऋ.वे. १.९०.७;
मधुवाता	२०.६५,६८;	ऋ.वे. १.९०.६,७,८;

मन्त्राः	भार्गवतन्त्र-अ० श्लो०	वैदिकाकरः
मयि मह	१४.१६;	ऐ० आ० ५.१.५.८;
मानस्तोक	७.२४;	ऋ.वे. १.११४.८;
मूर्धानम्	६.७२; १४.१२;	ऋ.वे. ६.७.१;
यन्मधुन	१४.२६;	हि. के० गृ. सू. १.१३.८;
यस्योरु	६.६६;	ऋ.वे. १.१५४.२;
या ओषधी	२० ६६;	ऋ.वे. १०.९७.१८;
या जाता	१४.६;	सा.वे. सं. २.१४३;
यामाहर	१४.१८;	हि.के. गृ. स. १.११.४;
युवं वस्त्रेति	१४.२३;	ऋ.वे. १.१५२.१;
युवा सुवासा	१४.३०; १६.५१;	ऋ.वे. ३.८.४;
यो देवेभ्यः	२०.८१;	वा. सं. ३१.२०;
यो ब्रह्म	८.३१; १४.१६;	ऋ.वे. ७ ६ ११;
रक्षोहण	७.३३;	ऋ.वे. १०.८७;
वास्तोस्पते प्रति	७.१०;	ऋ.वे. ७.५४.१;
विचक्रमे	६.६६;	ऋ.वे. ७.१००.४;
विराजो दोह	१४.२२;	शां० श्रौ. सू० ४.२१.३;
विश्वेत्तात	१४.१५;	ऋ.वे. ८.१००.६;
विष्णुः	१२.३६;	ऋ.वे. १०.१८४.१;
विष्णोः कर्म	२०.६७;	ऋ.वे. १.२२.१९;
विष्णोर्नुकम्	१६.५२; २०.६६; २३.१०;	ऋ.वे. १.१५४.१;
वेदाहम्	२०.६५; २०.८०;	तै. आ. ३.१२.१३;
व्यूक्षत्क्रूरम्	१४.४०;	आ. मं. पा. १.१.७;
शंते हिरण्यम्	१४.४१;	आ. मं. पा. २.८.६;
शन्नो देवींश्च	२०.६८;	ऋ.वे. १०.६.४;
शुभिके शिर	१४.१७;	आ. मं. पा. २.८.६;
संते पयांसि	६.६५,६६;	ऋ.वे. १.९१.१८;
सविराज	८.१६;	तै. १.७.१०.१;
सामो धेनु	८.१५; १४.११;	शां. श्रौ. सू. ३.१६.४;
सुपर्णोऽसीति	११.२६;	तै. ४.१.१०.५;

भार्गवतन्त्रे वैदिकसूक्तानि सामानुवाकादयश्च

देवीसूक्तम्	१४.४६;
नारायणसूक्तम्	१३.४२;
नृसूक्तम्	१२.१२,३२,६६;
	२१.४३,४६;

पुंसूक्तम् २१.६५;
पुरुषसूक्तम् १३.४२; १४.४८;
पुरुषात्ममन्त्रः ११.२६;
पौरुषमन्त्रः ६.६०; १६.५०; २०.७३; २२.११०;
विष्णुसूक्तम् ६.१५;
श्रीसूक्तम् १०.६; १२.७२; १४.४७; २०.८३;
बृहत्साम ८.३२; ११.१३; १४.१६;
नारायणानुवाक् २०.३६;
त्रैलोक्यमन्त्रः २०.१०५;
पञ्चोपनिषन्मन्त्रः ७.८; १०.३६; १२.११२; १३. ४२; १४.५६; १६.१८; २२.६, ८, १६, १७; २३. १६;

भार्गवतन्त्रे प्रयुक्ताः पूर्णमन्त्राः

ओं अग्नये स्वाहा १७.२७;

ओं नमो वासुदेवाय निर्मलानन्तशक्तये
पुण्याय पुरुहूताय पुरुषाय परात्मने २५.३२;

ओं भूतेभ्यः नमः १५.२१;

ओं भूर्भुवः सुवः स्वाहा ६.७६;

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ १.२६;
१६.५३;

परिशिष्टम्-२

पारिभाषिकपदानां लघुविवरणम्

अक्षतद्रव्याणि

१ नीवारः २. वेणुशाली ३. प्रियङ्गुः
४. षाष्टिकः ५. गोधूमः ६. तण्डुलः
[अ० २० श्लो० २१;]

अर्घ्यद्रव्याणि

१. कुशाग्रः २. अक्षतम् ३. सिद्धार्थः
४. तिलः ५. पुष्पम् ६. फलम् ७. यवः
८. चन्दनम्
[अ० २०. श्लो० २४-२५;]

अष्टदेव्यः

१. वागीश्वरी २. क्रिया ३. कीर्ति ४. लक्ष्मीः
५. सृष्टिः ६. प्रह्वी ७. सत्या ८. ब्राह्मी;
[अ० १५. श्लो० १३;]

अष्टबन्धद्रव्याणि

१. चूर्णः २. गुग्गुलः ३. लाक्षा ४. कुरुबिन्दम्
५. मधूच्छिष्टः ६. तुला ७. सर्पिस्
८. गैरिकः
[अ० १०. श्लो० १९-२१;]

आचामद्रव्याणि

१. एला २. लवङ्गः ३. तक्कोलः ४. जातिः
५. कर्पूरः ६. चम्पकः ७. चन्दनम् ८. कुसुमम्
[अ० २० श्लो० २६-२७;]

आलयाः (विंशतिः)

१. मेरुः २. मन्दरः ३. कैलासः
४. विमानच्छन्दः ५. नन्दनम् ६. समुद्रः
७ पद्मम् ८. गरुडः ९. नदीवर्धनम्
१०. कुञ्जरः ११. गुहराजः १२. वृषः
१३. सिंहः १४. सर्वतोभद्रकः १५. घटः
१६. हंसः १७. वृत्तः १८. चतुष्कोणः
१९. षोडशाश्रः २०. अष्टाश्रः
[अ. ३. श्लो १९-२१]

उपचाराः—(नव)

१. अर्घ्यम् २. पाद्यम् ३. आचामम्
४. स्नानम् ५. वस्त्रम् ६. उपवीतम्
७. गन्धः ८. पुष्पम् ९. भूषणम्
[अ० १३. श्लो० ३२-३३;]

कषायोदकद्रव्याणि

१. शमी २. पलाशः ३. खदिरः ४. बिल्वः
५. अश्वत्थः ६. विकङ्कतः ७. औदुम्बरः
८. न्यग्रोधः
[अ० २०. श्लो० २८-२९;]

गन्धोदकद्रव्याणि

१. चन्दनम् २. अगरुः ३. कुष्ठः ४. मुरा
५. मांसी ६. कुंकुमम् ७. ह्रीबेरः ८. उशीरः
९. गिरिजः
[अ० २०. श्लो० १९-२०;]

पञ्चगव्यद्रव्याणि

१. गोमूत्रम् २. गोमयः ३. क्षीरम्
४. दधि ५. सर्पिः
[अ० २० श्लो २७-२८;]

पञ्चविधवर्णाः द्रव्याणि च

१. श्वेतवर्णः – (शालिपिष्टम्, गन्धचूर्णम्)
२. पीतवर्णः – (हरिद्रा)
३. नीलवर्णः – (यज्ञीयाङ्गारः)
४. श्यामवर्णः – (यज्ञीयदलचूर्णम्)
५. रक्तवर्णः – (कुंकुमम्)
[अ० १३ श्लो० १६-१८;]

पञ्चाङ्गभूषणम्

१. हारः २. उपवीतम् ३. कटकः ४. केयूरः
५. अङ्गुलिभूषणम्

पाद्यद्रव्याणि

१. तुलसी २. पद्मम् ३. दूर्वा ४. श्यामाकः
५. अक्षतम् ६. विष्णुक्रान्ता ७. बिल्वपत्र
८. चन्दम्

[अ० २०. श्लो० २३-२४]

पुण्यसुमनसः

१. यूथिका २. मल्लिका ३. उत्पलम्
(त्रिप्रकारकम्) ६. जातिः ७. चम्पकम्
८. केतकी

[अ० २० श्लो० ३२-३३]
(मण्डलकल्पनक्रमे)

पुण्यस्नपनद्रव्याणि स्थानानि च

१. घृतम् —ब्राह्मे २. पाद्यम् —प्राच्याम्
३. अर्घ्यम् —याम्ये ४. आचामम् —वारुणे
५. पञ्चगव्यम् —उदीचिने ६. दधि —आग्नेये
७. पयः —नैर्ऋते ८. मधु—मारुते
९. कषायः—ईशकोणे;

[अ० २०. श्लो० ७८-८०;]

फलोदकद्रव्याणि

१. कदली २. बीजपूरः ३. आम्रम् ४. धातृ
५. बिल्वः ६. नालिकेरः ७ पनसः
८. मातुलुङ्गः

[अ० २०. श्लो० १५-१६;]

बेर-पवित्राणि (दश)

१. प्रामाण्यम् २. ग्रन्थिसंज्ञम् ३. अलङ्कारः
४ उत्तमम् ५. मध्यमम् ६. अधमम्
७. किरीटः ८. श्रीवत्सः ९. कौस्तुभः
१०. वनमाला

[अ० २१. श्लो० १३-१४;]

भूतशुद्धिक्रमे अङ्गेषु वर्णन्यासक्रमः

१. प्रणवम् — नाभौ २. नकारः—मेहने
३. मोकारः—जानुयुगले ४. नाकारः—पादद्वये
५. राकारः—मूर्धनि ६. यकारः—नयनद्वये
७. णकारः— वदनाम्भोजे ८. यकारः—
हृदयाम्बुजे;

[अ० १६. श्लो० २३-२५;]

मङ्गलोदकद्रव्याणि

१. इन्द्रवल्यङ्कुरः २. अश्वत्थपल्लव
३. कुशेशय; ४. एकपत्राम्बुज ५. कुष्ठः
६. कुंकुमम् ७. रोहिणीद्रुम ८. यूथिका
९. मल्लिका १०. त्रीण्युत्पलानि १३. जाति
१४ चम्पक १५. केतकी

[अ० २० श्लो० ३१-३३;]

मार्जनद्रव्याणि

१. रजनी २. सूर्यवर्तिनी ३. सहदेवी
४. शिरीषः ५. सदाभद्रा ६. कुशाञ्चलः

[अ० २० श्लो० १८-१९;]

मूलौषधिद्रव्याणि

१. व्याध्री २. सिंही ३. बलाका ४. अग्निः
५. शरपुंखा ६. शतावरी ७. बिल्वमूलम्
८. वचा ९. शुण्ठी १०. कोरण्डः
११. शतमूलिका

[अ० २०. श्लो० ३९-४०;]

मृत्तिकोदकद्रव्यस्थानानि

१. पुण्यक्षत्रम् २. नदीतीरम् ३. पर्वतः
४. पुलिसनम् ५. ह्रदः ६. निर्झरः ७. सङ्गमः
८. अशोष्यः ९. बेदिका १०. उर्वर
११. शालिक्षेत्रम् १२. देवखातः
१३. वृषशृङ्गम् १४. हस्तिः १५. वराहधृष्टः
१६. वल्मीकः १७. कुलीरावसथः १८. नलिनी
१९. दीर्घिका

[अ० २०. श्लो० ४३-४५;]

यवाम्बुद्रव्याणि

१. यवः २. व्रीहिः ३. वेणुः
[अ० २०. श्लो० २२;]

रत्नोदकद्रव्याणि

१. माणिक्यम् २. पद्मरागम् ३. नीलम्
४. वज्रः ५. पुष्यकम् ६. प्रवालः ७. मौक्तिकम्
८. मरकतम् ९. वैडूर्यम्
[अ० २०. श्लो० १४-१५;]

लोहोदकद्रव्याणि

१. सुवर्णः २. रजतः ३ ताम्र ४. सीसक
५. त्रपुक ६. कांस्यः ७. आयससारः
[अ० २०. श्लो० १६-१७;]

शान्तिकुंभद्रव्याणि

१. तुलसी २. वेणुः ३. नीवारः ४. यवः
५ श्वेतसर्षपः ६ तिलः
[अ० २० श्लो० ३०-३१;]

सर्वगन्धोदकद्रव्याणि

१. कर्पूरः २. कुंकुमः ३. कुष्टः ४. मांसीः
५. मलयजः ६. मुरा ७. प्रियङ्गुः
८. केसरः ९. मुस्ता १०. तमालः
११. नागकेसरः १२. मूलद्वयम् १३. कच्चोरः
१४. सुरसर्पिककेसरः १५. उशीरः १६. तगरः
१७. लोध्रः १८. हरिचन्दनम् १९. अगरुः
२०. उद्वासितकुष्ठः २१. कालेयः
२२. ग्रन्थिपल्लवः २३. मुकुलः (चम्पकस्य)
[अ० २०. श्लो० ३५-३८;]

सर्वौषधिद्रव्याणि

१. मांसी २. कुष्ठः ३. हरिद्राद्वयम् ४. मुरा
५. चम्पकः शैलेयः ६. मुस्ता ७. वचा
८. कर्पूरः
[अ० २० श्लो० ३४-३५;]

होमद्रव्याणि

१. यवः २ व्रीहिः ३. वेणुः ४. तिलः
५. लाजः ६. सुमम् ७. अगरुः ८. घृतम्
९. समिध्
[अ० २१ श्लो० ५०;]

———

परिशिष्टम्-३

स्नपनद्रव्यदेवानाम् विवरणम्

स्नपनद्रव्याणि	देवता:	अध्यायसंख्या	श्लोकसंख्या
अक्षतवारि	अनन्तः	२०	५६
अर्घ्यवारि	मधुहन्ता	२०	५७
आचामवारि	त्रिविक्रमः	२०	५७
उष्णवारि	पुरुषः	२०	५५
ऐक्षवोदकम्	नृसिंहः	२०	५६
कषायाम्भः	दामोदरः	२०	५६
गन्धवारि	माधवः	२०	५६
गुडोदकम्	वराहः	२०	५६
घृतोदकम्	वासुदेवः	२०	५५
चूर्णोदकम्	लक्ष्मीः	२०	४२
दधिभाजनम्	श्रीधरः	२०	५८
दुग्धकुंभः	हृषीकेशः	२०	५८
नारिकेलोदकम्	श्रीधरः	२०	६०
निशाचूर्णम्		२०	४२
पञ्चगव्यम्	वामनः	२०	५८
पाद्योदकम्	विष्णुः	२०	५७
फलतोयम्	सत्यः	२०	५५
मङ्गलोदकम्	वासुदेवः	२०	६०
मणिवारि	केशवः	२०	५६
मधु	पद्मनाभः	२०	५८
मूलौषधिः	अनिरुद्धः	२०	६१
यवोदकम्	गोविन्दः	२०	५७
लोहांभः	नारायणः	२०	५६
शान्तिवारि	हयास्यः	२०	६०
सर्वगन्धवारि	प्रद्युम्नः	२०	६१
सर्वौषधिः	सङ्कर्षणः	२०	६०
स्नानवारि	अच्युतः	२०	५५

परिशिष्टम्-४

भगवतः उत्सवप्रसङ्गे उपयोगार्हाः स्वरतालादयः

देवताः	स्वरः	नृत्तम्	तालः
चण्ड दिद्वारपालाः	ऋषभः	वैजयन्ती	मल्लः
खगेशः	मध्यमः	विष्णुक्रान्तम्	गारुडः
विष्वक्सेनः	ऋषभः	स्वस्तिकम्	बलिः
गणेशः	पञ्चमः	स्वस्तिकम्	बलिः
दुर्गा	धैवतः	सर्वमङ्गलम्	भद्रतालः
ब्रह्मा	मध्यमः	सर्वमङ्गलम्	ब्रह्मतालः
शुनासीरः	षड्जः	विलासम्	समतालः
वह्निः	ऋषभः	सर्वतोभद्रम्	बद्धावतालः
यमः	गान्धारः	खेटकम्	श्रृङ्गिणी
निर्ऋतिः	मध्यमः	चक्रमण्डलम्	मल्लतालः
वरुणः	पञ्चमः	कान्तारम्	मङ्गलतालः
मरुत्	धैवतः	पृष्ठकुट्टिमम्	जयः
सोमः	निषादः	कटिबन्धनम्	भद्रः
शङ्करः	धैवतः	वामजानूर्ध्वम्	ढक्करी,
अन्य देवताः	पञ्चमः	सर्वमङ्गलम्	भद्रतालः
भूताः	गान्धारः	सर्वमङ्गलम्	बलितालः

[भार्गवतन्त्रम् अ० १८ श्लो० १०-२३;]

परिशिष्टम्-५

दशपवित्राणां प्रमाणादिः

पवित्रनाम	मानम्	ग्रन्थिसंख्या
प्रामाण्यपवित्रम्	नाभिपर्यन्तम्	द्वात्रिंशत्
ग्रन्थिपवित्रम्	हृदयान्तम्	पञ्चविंशतिः
अलङ्कारपवित्रम्	जङ्घान्तम्	द्वात्रिंशत्
उत्तमपवित्रम्	जानुसीमान्तम्	अष्टोत्तरशतम्
मध्यमपवित्रम्	ऊर्वन्तम्	अशीतिः
अधमपवित्रम्	नाभ्यन्तम्	षष्टिः
किरीटपवित्रम्	किरीटमानम्	द्वात्रिंशत्
श्रीवत्सपवित्रम्	स्तनपर्यन्तम्	सप्तविंशतिः
कौस्तुभपवित्रम्	हृदयान्तम्	द्वात्रिंशत्
वनमालापवित्रम्	चरणान्तम्	अनेकग्रन्थिसहितम्

[भार्गवतन्त्रम् अ० २० १३-२०;]

परिशिष्टम्-६

वह्नेः सप्तजिह्वानां नामस्थानादयः

नाम		स्थानम्		होमफलम्		स्वरूपम्
१. काली	—	मध्यमे	—	शान्तिकर्म	—	कार्ष्ण्यम्
२. कराली	—	पूर्वदिशि	—	विजयदा	—	लौहित्यम्
३. सुमना	—	आग्नेय्याम्	—	पुष्टिदा	—	लौहित्यम्
४. लोहिता	—	वारुणे	—	वशीकरणम्	—	लौहित्यम्
५. धूम्रा	—	सोमदिशि	—	मारणादिकर्म	—	श्यामवर्णा
६. स्फुलिङ्गिनी	—	अनिलाश्रया	—	सर्वसिद्धिकर्म	—	स्फटिकाभा
७. विश्वरूपा	—	ईशानकोणे	—	—	—	तपनीयनिभा

[भार्गवतन्त्रम्-१७. २९-३५]

अग्नित्रयपरिचयः

नाम		वयः		उद्भवक्रमः:
१. नित्याग्निः	—	वृद्धः	—	लौकिकाग्निः
२. उत्सवाग्निः	—	युवा	—	सूर्यकान्तास्मजातः
३. दीक्षादिकर्माग्निः	—	बालः	—	अरणिमथनोद्भूतः

[भार्गवतन्त्रम् १७. ३६-३७]

———

परिशिष्टम्-७

श्लोकानुक्रमणिका

अ

श्लोकानां प्रथमः पादः	अध्यायसंख्या	श्लोकसंख्या
अक्षमालाप्रतिष्ठायाम्	१५	३२
अक्षय्यसंख्यं तन्त्रं तत्	२	१
अगस्त्यं मुनिशार्दूलम्	१	२
अग्निं संसाध्य विधिवत्	६	६९
अग्निमध्ये तु कुण्डेषु	६	३९
अग्निः कनकवर्णाभः	६	१००
अग्निर्मे वाचि मन्त्रेण	१५	१६
अग्नीन् विसर्जयेत् पश्चात्	१२	११३
अग्ने नयेति मन्त्रेण	१७	६६
अग्नेरुत्तरतः स्थाप्यम्	१७	१७
अग्नौ च हुत्वा देवेशम्	२५	८
अग्रतः सेचयेन्मार्गम्	१०	१५
अग्रमेकाङ्गुलं सार्धम्	४	३७
अग्रं त्र्यङ्गुलविस्तारम्	४	७८
अघमर्षणसूक्तं तत्	१२	८५
अघोरचक्षुषा देवीम्	१४	३७
अङ्कुराण्यर्पयित्वैवम्	७	१
अङ्कुराण्यर्पयेत्पश्चात्	१९	१९
अङ्कुराण्यर्पयेत्पूर्वम्	२०	४६
अङ्कुराण्यर्पयेद्रात्रौ	२१	२६
अङ्कुराण्यर्पयेत् सद्यो	१४	८
अङ्कुरार्पणभूभागम्	५	१८
अङ्कुरेष्वप्रशस्तेषु	२२	७१
अङ्गणे पीठिकास्थाने	३	४६
अङ्गदे कटके रम्ये	४	८७
अङ्गबिम्बाङ्गसन्धाने	१९	८
अङ्गानि वेदाश्चत्वारः	२४	५७

अङ्गानि हृदयादीनि	१३	३४
अङ्गुलं चाङ्गुलं सार्धम्	४	६१
अङ्गुष्ठतर्जनीमध्ये	४	८३
अङ्गुष्ठानामिकाभ्यां तु	८	२७
अङ्गुष्ठे मूलविस्तारो	४	४५
अजीर्णं धाम बिम्बं वा	१९	५
अज्ञातजातिभिश्चोरैः	२२	४३
अतिप्रसन्नवदनम्	९	३०
अतीन्द्रियममर्यादम्	९	२३
अतुला श्रीश्च तस्य स्यात्	१०	६१
अतो देवा इदं विष्णुः	६	६७
अत्युग्रं तप आतिष्ठम्	१	१३
अत्युग्रं तप आतिष्ठम्	१	५४
अत्युष्णमतिशीतं वा	२२	१६
अथ तेऽलङ्कृताः सम्यक्	६	५६
अथ पुण्यं प्रवक्ष्यामि	२०	७७
अथर्वणं तथोदीच्याम्	९	१३
अथवा वैष्णवं स्नानम्	२०	२
अथवाष्टाक्षरं मन्त्रम्	२५	२१
अद्भिरापूर्य चोत्पूय	१७	१२
अद्भिः परिसमूह्यास्त्रैः	१७	८
अधिकारी परिज्ञातः	२२	१०१
अधिवासं प्रकुर्वीत	१२	१०
अधिवासश्च कर्तव्यः	२३	२
अधीतान्यपि शास्त्राणि	१	४
अधोमुखे वामहस्ते	४	८४
अध्यर्धमङ्गुलं वृत्तम्	४	७०
अनन्त अक्षते कुंभे	२०	५६
अनन्तशयने देवे	२	२९
अनन्तः फणिनामिन्द्रः	२४	३
अनन्तोऽथ मही पश्चात्	१६	३७
अनर्घमक्षतमिदम्	९	८७
अनलं त्रिःपरिक्रम्य	१४	४९
अनलाद्रससंयुक्ता	१६	२२
अनाप्लुत्य स्त्रियं गत्वा	२२	८
अनिच्छन्निखिलं भोगम्	२	१९

अनुज्ञातः समुत्थाय	१	२५
अनेकमूर्तये तुभ्यम्	१	३०
अनेकाभरणैर्युक्तम्	६	२४
अनेन विधिना यूयम्	२५	३३
अनेन सर्वं देवस्य	१३	५३
अनेनैव प्रकारेण	२०	१०२
अन्तर्बहिर्यदि हरिः	१	१६
अन्तर्हाराह्वयोपेते	३	३७
अन्तः प्रविश्य विन्यस्य	१०	३८
अन्तः प्रविश्य सदनम्	१८	२
अन्तः प्रवेशयेद्द्वम्	१०	१७
अन्ते च विष्णुगायत्र्या	२०	७६
अन्नं निवेदयत्तस्मै	१३	४४
अन्नेनान्नादिकामस्तु	१७	४८
अन्यं नीत्वावरोप्याथ	१२	६४
अन्यदेवार्चितं पुष्पम्	२२	२१
अन्यद्यथावत्कर्तव्यम्	२२	७७
अन्यत्सर्वं यथापूर्वम्	१५	१४
अन्यत्सर्वं यथापूर्वम्	२०	८९
अन्यत्सर्वं यथापूर्वम्	२०	१०६
अन्यथा वा न कुर्वीत	१६	६
अन्यान्यप्युपचाराणि	२	१४
अन्यासां यदि देवीनाम्	१४	४८
अन्येन चोरुविश्रान्ताः	४	१०२
अन्येषां परिवाराणाम्	१८	२७
अन्येषां विष्णुभक्तानाम्	१६	६४
अन्येषामेवमेवोह्य	१५	२२
अन्यैश्च मङ्गलैः साकम्	१२	५४
अपराह्णे तु सम्प्राप्ते	८	६
अपराह्णे तु सम्प्राप्ते	१२	७५
अपिधाय ब्रह्मरन्ध्रम्	१०	४३
अपिधाय शरावेण	८	४८
अपिधाय स्त्रीशिलया	१०	९
अपिधाय स्रुवेणाथ	१७	७१
अप्रमेयं धनं धान्यम्	६	४
अवलानुगुणैरन्यैः	४	९९

अब्लिङ्गैः पवनैर्मन्त्रैः	६	३४
अभिषिच्य द्रव्यकुंभैः	२०	९६
अभीतिदं चर्मधरम्	१७	२९
अभ्यर्चयेच्च विधिवत्	१२	२६
अभ्यर्चयेद्यथापूर्वम्	१९	४०
अभ्यर्चयेद्यथायोगम्	१२	९३
अभ्यर्च्य कुम्भमर्घ्याद्यैः	१९	२३
अभ्यर्च्य गन्धपुष्पाद्यैः	७	२३
अभ्यर्च्य गन्धपुष्पाद्यैः	९	८१
अभ्यर्च्य विधिवत्सर्वम्	१२	९७
अमारिक्ताष्टमीतिथ्यः	६	२२
अमृताधानमन्त्रेण	१४	२७
अमृतोपस्तरणमसी	१४	२६
अम्भोजदलतुल्यानि	१३	१६
अयाज्ञियैः कोद्रवाद्यैः	२२	१५
अयुतं होम उदितो	२२	३९
अयोग्यं तुच्छितं धीमान्	१९	३
अरणीमथनाज्जातः	१७	३७
अर्घ्यं पाद्यं तथाचामम्	९	१८
अर्घ्यादिप्रणवान्तं तम्	२०	६४
अर्घ्याद्यैरर्चयेद्देवम्	१७	६९
अर्घ्याद्यैरुपचर्याथ	९	४८
अर्चयेद्गन्धपुष्पाद्यैः	१०	२
अर्चयेद्देवदेवेशम्	१०	४७
अर्चयेद्देवदेवेशम्	२२	७
अर्धमण्डपकद्वारे	३	२९
अर्धमण्डपमानेन	३	२४
अर्धरात्रे तु सम्प्राप्ते	१२	९४
अर्हणीया आप इति	१४	२१
अलङ्कुर्याद्यथायोगम्	८	५३
अलम्बुसायां कुकरम्	६	६९
अलाभे ऋत्विजां यज्ञम्	६	११
अलाभे चापि चक्रस्य	१२	१०७
अलाभे सर्वकुण्डेषु	९	४२
अवन्यां विसृजेच्छेषम्	१७	६४
अशक्तश्चेत् त्रिपादं वा	१०	५१

अशक्ये तूच्छिते धाम्नि	१९	२
अशीति पक्षरोमाणि	४	५६
अश्वत्थदलवद् श्याम्	५	१६
अश्वत्थोदुम्बरवट	८	५
अश्वमेधसहस्राणि	१३	५२
अष्टबन्धनवस्तूनि	५	४२
अष्टभिर्वा चतसृभिः	४	६३
अष्टभिश्चापि देवीभिः	६	२९
अष्टभिश्च भवेत्तस्या	४	७३
अष्टाक्षरं ततो मन्त्रम्	१२	११८
अष्टाक्षरमनुं वक्ष्ये	२४	४१
अष्टाक्षरस्य मन्त्रस्य	१०	२८
अष्टाङ्गुला तदर्धा वा	१७	५१
अष्टादशाङ्गुलमुरः	४	९६
अष्टाविंशतिभिर्दर्भैः	७	२९
अष्टाविंशतिरष्टौ वा	१२	३२
अष्टोत्तरशतं वारान्	७	११
अष्टोत्तरशतं होमः	६	४६
अष्टोत्तरशतं होमो	२१	५१
अष्टोत्तरशतं होमो	२२	३८
अष्टोत्तर सहस्रं वा	२५	७
अष्टौ देवीः श्रियाद्याश्च	४	९१
असंख्यातमिदं शास्त्रम्	२	७
असुनीतेति मन्त्रेण	७	६
असुन्वन्तेति च ऋचा	२०	१०१
अस्ताचलं गतश्चन्द्रः	१६	६
अस्नातोऽनुपनीतो वा	२२	३
अस्पृश्यैरपि शूद्राद्यैः	२२	१४
अस्मादालोकनेनैव	१	५९
अस्वतन्त्राः यदा देव्याः	४	१००
अहंकृति ततो बुद्धौ	६	५०
अहो रक्षो द्वयं नष्टम्	१	८

आ

आकाशवाणीमश्रौषम्	१	१४
आग्नेयादिषु कोणेषु	१२	२५

आग्नेयैशानयोः स्थाप्या	१७	२३
आघोष्य चतुरो वेदान्	१६	५५
आचामो विष्णुगायत्र्या	१६	४९
आचार्यदक्षिणकरे	४	४
आचार्यदेवपद्मानाम्	२१	११
आचार्यस्तोषयित्वा तान्	६	३०
आचार्याणीं मूर्तिपानाम्	८	२९
आचार्यो ऋत्विजाश्चान्ये	१०	१६
आचार्यो वापयेद्बीजम्	६	७२
आच्छाद्य नववस्त्रेण	६	५२
आजानुदीर्घैः पृथुलैः	९	३५
आजानुपादौ प्रक्षाल्य	६	३६
आज्यपात्रं चरुं स्थाली	१७	४
आज्यस्थाल्यां न्यसेन्मूलम्	१७	६२
आढकद्वयमात्रेण	७	२१
आत्मनोऽग्रे स्रुवं याम्ये	१७	६१
आत्मानं मन्यते शेषम्	२४	११
आत्वाहार्षं प्रतिष्ठासि	१०	१८
आदद्यान्मुद्रया मुष्ठ्या	१७	२५
आदाय क्षालयित्वाद्भिः	२१	८
आदित्यमपरेऽपीन्दुम्	८	१५
आदिमध्यान्तशून्याय	१	३५
आद्यन्तयोस्तु पत्राणाम्	१३	२१
आद्यैश्च मूलमन्त्रस्य	१६	१६
आधारशक्त्यादिमन्त्रैः	१७	५४
आनीतानि यथायोग्यम्	१६	५७
आयामसमविस्ताराम्	१०	३
आयुधैः सह देवीभिः	११	५१
आयुश्च ज्ञानमतुलम्	२५	२३
आयुष्कामस्तु दूर्वाभिः	१७	४५
आयुष्कामो दीर्घमायुः	२५	२८
आरब्धायां तु पूजायाम्	२२	१८
आराधनं त्वं देवेश	१७	६७
आराधनमिदं भक्त्या	२१	६१
आराधितो यदि हरिः	१	१५
आरुढं पक्षिराजे वा	४	८९

आरोग्यं पुत्रसम्पत्तिम्	२५	२३
ओरोप्य चैवं विहगम्	११	३०
आरोप्य देवं भूषाद्यैः	१२	६०
आलयाभ्यन्तरं गत्वा	१३	२
आवाभ्यामिति संकल्पः	१४	२८
आवाहनं तु सर्वत्र	९	१३
आवाहनं महाकुंभे	१५	६
आवाहनप्रोक्षणादि	१०	३०
आवाहनाह्वयं पात्रम्	१६	३०
आवाहयेत् पिण्डिकायाम्	१०	१०
आवाहयेन्महाकुंभे	८	५५
आवाह्य गन्धपुष्पाद्यैः	६	६८
आवाह्य देवमभ्यर्च्य	२३	५
आवाह्य पूजयेद्धोमम्	१५	१८
आवाह्य भूमिमन्त्रेण	६	४३
आवाह्य मूलमन्त्रेण	१०	२४
आवाह्याथ यथान्यायम्	२३	१६
आशास्वष्टस्वष्टकुंभान्	८	४४
आश्रमेषु मुनीनां च	३	१०
आश्रितानां च भक्तानाम्	१८	३०
आश्रितानां तु पार्थक्यम्	१९	२९
आसने प्राङ्मुखो भूत्वा	१६	२
आसितैर्नैमि वसतिम्	१३	२३
आसीनः प्राङ्मुखो भूत्वा	६	४०
आसीनेऽश्रायतं यद्वा	४	११५
आहूय देवताः सर्वाः	११	५३
आह्वानार्थमशेषाणाम्	११	३८

इ

इतः प्रभृति युष्माभिः	९	६४
इति तं प्रार्थयेद्देवम्	२१	६३
इति पुष्पाञ्जलिं सम्यक्	११	३६
इति प्रार्थ्य खगेशानाम्	११	२७
इति प्रार्थ्य ततो देवम्	१९	२७
इति बीजानि संजप्त्वा	१४	१०
इति मन्त्रेण भूतेभ्यो	२१	४०

इति विज्ञाप्य देवेशम्	१३	३१
इति शास्त्रं महद्दिव्यम्	२५	३७
इनि सम्प्रार्थ्य सान्निध्यम्	११	२०
इति स्तुत्वा च नत्वा च	६	५०
इत्यादिमानसेनैव	१६	२८
इत्युक्तो जामदग्नेन	१	४६
इत्येते विंशतिः प्रोक्ताः	३	२१
इत्येष कथितो ब्रह्मन्	२१	६६
इदं विष्णुरिति श्रुत्या	६	७०
इदं विष्णुरिति श्रुत्या	१२	१५
इदमाराधनं विष्णोः	१६	६८
इन्द्रादयो लोकपालाः	३	३६
इन्द्रादीनग्निकुण्डस्य	१७	१९
इन्द्राद्वा वरुणाद्वापि	१	४३
इमं मे वरुणेत्येव	६	७३
इमं मे वरुणेत्येव	१४	४३
इष्टापूर्तेन लभ्यन्ते	३	३

ई

ईदृशं मङ्गलदिनम्	६	२७
ईशानभागे ग्रामस्य	७	१३

उ

उच्छ्रायः परिवाराणाम्	४	११८
उच्छ्रायात्पादविस्तीर्णा	३	१५
उत्तरत्रितये स्वातौ	२१	६
उत्तरे विष्टरे बिम्बम्	८	१०
उत्तरोष्ठायतं सार्धम्	४	६४
उत्तिष्ठोत्तिष्ठ गोविन्द	१६	१०
उत्सवं कारयेद्धीमान्	२२	६५
उत्सवं चान्वहं कुर्यात्	१४	५३
उत्सवप्रतिमां तत्र	११	२८
उत्सवप्रतिमां पश्चात्	११	३७
उत्सवान्तं परमधाम्नः	११	२६
उत्सवान्ते हरिं तत्र	१८	२५

उत्सवारंभदिवसात्	१२	१
उत्सेधमानं मूर्धादि	४	६
उत्सेधे बालबिम्बस्य	१९	१३
उदकं च प्रदातव्यम्	१८	१०
उदगग्रा च परिधिः	१७	२२
उदगुत्तीयं तत्पात्रम्	१७	१६
उदग्रवदनो भूत्वा	११	३३
उदानं हस्तिजिह्वायाम्	९	६८
उद्यानानि च रम्याणि	२	१७
उद्वास्य देवताः सर्वाः	८	७
उद्वाहदिवसात् पूर्वम्	१४	५
उद्वाहशेषहोमं तत्	१४	५५
उद्वाहहोमं कुर्वीत	१४	४५
उद्वाहानन्तरं देवम्	१४	५९
उन्मील्य दक्षिणं नेत्रम्	८	१८
उपकुंभाम्बुभिः पश्चात्	१०	४२
उपकुंभाष्टकयुतम्	२०	१०४
उपकुर्वन्ति ये मर्त्याः	१०	६२
उपानहादि पश्चाङ्गम्	४	११२
उपेन्द्रं गोपुरशिरो भागे	३	४४
उपेन्द्रः प्राकृतः पुण्यः	३	४५
उशीरं तगरं लोध्रम्	२०	३७
उष्णीषं कवचं चापि	१२	९१
उष्णीषात्पार्श्वकेशान्तम्	४	७१

ऊ

ऊर्ध्वं चक्रमधः पद्मम्	२१	३८

ऋ

ऋग्यजुः सामवेदानाम्	१२	७७
ऋजुबुद्धि सदा ब्रह्म	६	८
ऋतं सत्यमिति श्रुत्या	१६	५०
ऋतं सत्येति मन्त्रेण	६	६४
ऋत्विक्षु शान्ति मन्त्राणि	१०	२५
ऋत्विग्भिः सहितः कुंभान्	२०	७१

ऋत्विग्भ्यः सहकारिभ्यो	२३	७
ऋषिभिश्च मरीच्याद्यै	६	२५
ऋषिर्नारायणो देवो	२४	४५
ऋषीणामग्निकल्पानाम्	१	५७
ऋषीणामग्निकल्पानाम्	११	५०

ए

एकत्रिंशद्यवायामा	४	२२
एकपत्राम्बुजं कुष्ठम्	२०	३२
एकबेरविधानं चेत्	२०	६८
एकबेरे तदितरे	२१	३३
एकबेरे मूलबेरम्	१२	१००
एकस्मिन्नेव कुण्डे	१५	७
एकस्मिन्नेव कुर्वीत	११	१३
एकस्मिन्नेव कुर्वीत	१५	३८
एकादशाङ्गुलं वृत्तम्	४	६५
एकायनप्रविष्टानाम्	२४	२७
एकाहपूजावैकल्ये	२२	३०
एकीकृत्य द्वयं क्षेत्रम्	१३	१५
एकैकमपि पर्याप्तम्	२	१०
एतच्छ्रुत्वा ततो देवो	१	५६
एतच्छ्रुत्वा महातेजाः	१	६
एतच्छ्रुत्वाम्बराद्वाणीम्	१	१८
एतज्जपन् सदा ध्यायन्	२४	५८
एते पाद्यमयाः प्रोक्ताः	१६	३६
एतेषान्तु नमोन्तेन	१६	४३
एतेषामुदकुंभानाम्	२०	६१
एते ह्यष्टाक्षरान् जप्तुम्	२४	४०
एलालवङ्गतक्कोल	२०	२६
एवं चतुर्विधैर्युक्तः	१६	१५
एवं ध्यात्वा जपेन्मन्त्रम्	२४	५५
एवं ध्यायेत् परं ब्रह्म	२५	१६
एवं निरवशेषेण	६	७५
एवं निवेद्य विधिवत्	१६	५६
एवं महोत्सवं कुर्वन्	१३	५१
ऐवं महोत्सवं कृत्वा	१३	४६

एवं महोत्सवे विष्णोः	१२	६२
एवं यः स्थापयेद्देवम्	१०	५९
एवं रजस्वलावस्त्रम्	२२	९
एवं शुद्धे नदीतोये	७	३८
एवं संस्थाप्य देवेशम्	१०	५७
एवं संस्थाप्य मेधावी	८	५४
एवं समाप्य तां पूजाम्	९	२०
एवं समाप्य मेधावी	१६	३२
एवं स्तुतो जगन्नाथः	१	४१
एवमादिषु चान्येषु	२३	१०
एवमावाह्य देवेशम्	१०	२९
एवमाहूय मेधावी	११	५५
एषादीक्षा द्वितीया स्यात्		

ऐ

ऐन्द्रं च जुहुयादग्नौ	१७	२६
ऐन्द्रे शुद्धोदकुंभानाम्	२०	१०५
ऐशान्यां विश्वरूपी तु	१७	३२

ओ

ओं नमो वासुदेवाय	२५	३२
ओं भूर्भुवः सुवः स्वाहा	९	७६
ओतदेहेन जीवात्मा	२४	४२

क

ककारोऽम्बरतत्त्वात्मा	९	६४
कक्षयोर्मध्यविस्तारः	४	३४
कटिप्रदेशविस्तारः	४	३६
कटिप्रदेशविस्तार	४	७६
कथं नु देवदेवीयम्	१४	१
कथं नु भगवन् विष्णो	५	१
कथं महोत्सवविधिः	११	१
कथं वयं समुत्तीर्णाः	१	५
कथं वा वासुदेवस्य	४	१
कदम्बमुकुलाकारम्	२५	१७
कदली नारिकेराद्यैः	८	२५

कनिष्ठाङ्गुष्ठतुलिता	४	२७
कम्यकारुचिराश्चापि	५	३७
कम्बुकण्ठं महासत्वम्	९	३२
करकं विन्यसेत् कुंभान्	१२	२३
करकेण समायुक्तम्	८	४९
कराकिला विजयदा	१७	३४
कर्णिकां पीतवर्णेन	१३	१९
कर्णिकाक्षेत्रमानेन	१३	९
कर्णिकायां वासुदेवम्	१३	३२
कर्तव्यमखिलं पश्चात्	२२	७६
कर्मबिम्बं च निर्मेयम्	४	१०४
कर्माङ्गस्नपनं कुर्यात्	२३	१२
कर्मार्चादीनि यद्वत् स्यात्	४	१०९
कर्मार्चा सहजे पीठे	१६	४५
कर्मावसाने ब्रह्मादीन्	१७	६०
कर्मिणां तु पुनर्जन्म	१०	६६
कर्षणादिक्रियास्वेते	२४	२३
कर्षणादिप्रतिष्ठान्ता	२२	९८
कल्पयेत्कर्णिकाक्षेत्रे	१३	१२
कल्पान्ते सागरे क्षुब्धे	२४	५
कल्याणकौतुके कुंभे	२१	४५
कल्याणस्नपनं कृत्वा	२२	२२
कषायमीशकोणे च	२०	८०
कस्मिंश्चित् दिवसे पश्चात्	१२	७४
कांस्यमायससारं च	२०	१७
काकपाषण्डपतित	२२	१०
कालद्वयेऽपि होमं च	२१	६४
किं तद्धयर्चनातन्त्रम्	१	६१
किं पुनः फलमिच्छद्भिः	१०	६८
किं पुनर्देवदेवस्य	२२	१०४
किङ्करो हरिभक्तानाम्	२४	१७
किञ्चिदम्येन पात्रेण	१६	३४
किमर्थं कुंभतनय	१	४२
किरीटं कुण्डले हारान्	४	८६
किरीटकुण्डलधरम्	११	७
किरीटहारकेयूर	२४	५२

कीदृशोऽप्यधिकारी वा	६	२
कुंभप्रतिकृतिः पञ्च	५	३५
कुंभमेकं समभ्यर्च्य	१५	४०
कुंभयोरुभयोस्तत्र	९	७
कुंभयोर्वीरसेनं च	९	१०
कुंभान्तरं तु संस्थाप्य	२२	६३
कुंभाय च यथाशास्त्रम्	११	२१
कुंभेभ्यः देवताः सर्वाः	८	११
कुङ्कुमक्षोदकर्पूर	१२	८२
कुण्डं च हव्यवाहं च	२१	५२
कुरुतेऽक्षततोयेन	२२	३६
कुर्यादनेन मन्त्रेण	२४	५६
कुर्वन्तु विघ्नं ये भूताः	९	९०
कुर्वीत स्विष्टकृद्धोमम्	१७	७३
कुर्वीरन् यदि कर्माणि	२२	५३
कुशैः काशैस्तृणैश्चान्यैः	१९	३३
कुशैः काशैस्तृणैश्चापि	७	३
कुशोदकेन स्नपनम्	२२	१३
कुसुमैरप्यलङ्कृत्य	७	४
कूपेषु च तटाकेषु	९	८४
कूर्चग्रन्थि विसृज्याद्भिः	१७	१८
कूर्चाग्रपतितैर्धीमान्	१२	१०६
कूर्चेन पल्लवन्यासः	२०	५२
कूर्चेन शयनं कार्यम्	४	१०७
कूर्माकारं लिखेत्तत्तत्	५	२७
कृच्छ्रेऽप्यतिसंतुष्टः	२४	१५
कृत्तो वनस्पतिरिव	१	२४
कृत्वा च नित्यहोमान्तम्	१२	१९
कृत्वा तत्तद्विधयैव	९	७४
कृत्वा तु स्विष्टकृद्धोमम्	१२	४०
कृत्वा प्रभूतं सलिलम्	३	२
कृत्स्नस्य पाञ्चरात्रस्य	२४	८
कृष्णमण्डलविस्तारो	४	९८
केवलेनैव तूर्येण	१२	११६
केसरेषु श्रियाद्यष्टौ	१३	३६
कैवल्यशान्ति कृत्वाथ	२२	१०६

को वा ध्यातुं क्षमो लोके	९	२६
कौतुकं बन्धयेत्कुंभे	१५	२९
क्रौञ्चक्रौञ्चीकलापाश्च	३	७
क्लेशवासं गते देवे	२२	१०३
क्लेशावधावतिक्रान्ते	२२	८६
क्षुधितो वा न तृषितः	२४	१४

ख

खद्योतवर्षसंस्पर्शे	२२	५७
खात्वा द्वितालं धरणीम्	८	४

ग

गङ्गाद्यास्सरितस्तत्र	१२	८४
गङ्गाद्याः सरितस्तत्र	१५	३१
गण्डातिगण्डयोगेन	६	२१
गन्धं ददाति यो भक्त्या	२	२३
गन्धं पुष्पं तथा धूपम्	१६	२७
गन्धं पुष्पं भूषणं च	१३	३३
गन्धद्वारेति मन्त्रेण	१६	५२
गन्धर्वलोके वसतिः	१०	६४
गन्धवस्तुभिरालिप्य	२१	३६
गन्धर्वेभ्यश्च यक्षेभ्यः	१२	३८
गन्धोद्गारीणि धूपानि	१२	५३
गमयित्वोत्सवाङ्गेन	१२	१०३
गम्भीरवेदनिर्घोष	९	१
गर्भगेहप्रवेशश्चेत्	२२	४९
गर्भगेहसमायामम्	३	२३
गलमर्धाङ्गुलं सार्धम्	४	१३
गायन्तश्चापि नृत्यन्तः	१८	५
गीतं नृत्यं तथा वाद्यम्	२	२८
गीतवादित्रकुशलान्	११	४३
गीतवादित्रघोषेण	१०	५८
गीतवादित्रनिर्घोषैः	९	१०१
गुल्फं पादाङ्गुलोत्सेधम्	४	६६
गुहराजो वृषो सिंहः	३	२०
गुहार्चा स्थापने सर्वम्	१५	४१

गोपनीयमिदं शास्त्रम्	२५	२६
गोमयालेपिते भूमि	९	८२
गोमयालेपिते भूमौ	६	३२
गोमयेन समालिप्ताम्	६	५८
ग्रन्थिं विसृज्य कूर्चस्य	१७	२१
ग्रन्थीनां पूरणं कुर्यात्	२१	२५
ग्रामं प्रदक्षिणीकृत्य	१९	३४
ग्रामस्य परितो वीथ्याम्	११	५४

घ

घटोध्नीर्गास्सवत्साश्च	१०	५०
घृतं ब्राह्मे न्यसेत् कुंभम्	२०	७८
घृतं मध्ये दध्यनले	२०	९८
घृतकुंभं पदे ब्राह्मे	८	३४
घृतकुंभे वासुदेवः	२०	५५
घृतमुष्णोदकं रत्नम्	२०	९
घ्राणात्मा तु टकारः स्यात्	९	५९

ङ

ङकारः पृथिवीतत्त्वम्	९	६२

च

चक्रवाकद्विजगणैः	१६	९
चक्राब्जं वर्तयेद्धीमान्	१३	३
चक्राब्जमण्डले दीक्षा	२४	२९
चक्री च मुसली शंखी	३	४१
चक्षुः कनीनिकायामो	४	५४
चण्डप्रचण्डावारभ्य	१८	७
चण्डादिदेवतानां च	१५	३६
चण्डादिद्वारपालानाम्	१२	४३
चण्डादीनां च पीठानाम्	९	७३
